DATE LABEL

THE ASIATIC SOCIETY
1, Park Street, CALCUTTA-16.

The Book is to be returned on the date last stamped :

15.11.52.

Taittiriya samhita of the Black Yajurveda
with commentary ~~of~~ by Sayanacharya
~~Satya~~ edited by Satyavrata samasrami
Calcutta The Asiatic Society
1899

BI 26, v.5

तैत्तिरीयसंहिता-पञ्चमकाण्डस्य।

सूचीपत्रम्।

अग्निचयनब्राह्मणम्।

प्रपाठकाः १—७।

प्रपाठकः १।

		पृष्ठे।
१—११	अनुवाकाः—उखाग्निब्राह्मणम्	१-२५
१	अनुवाकः...सौविष्टकृतिः, अग्न्यादानञ्च	१-२
२	,, ... मृदाद्यर्थिका...	३-६
३	,, ... मृत्खननम्, उदकसुखलेन अग्नेः निर्गमनम्, उदकसेचनञ्च	६-७
४	,, ... मृत्खननं, पुष्करपर्णे मृदः सम्भरणं, स्थाण्डिले मृदः स्थापनञ्च	७-१०
५	,, ... अवघातोपधादिपूर्वकं यज्ञभूमौ मृदाहरणम्,	१०-१३
६	,, ... उखानिर्म्माणम्	१३-१५
७	,, ... उखासंस्कारः	१५-१७
८	,, ... मधुघृतौदनसम्भारादि	१७-१९
९	,, ... दीक्षासंस्कारः, उखाप्रतापनादि च ...	२०-२१
१०	,, ... उखाग्नौ समिदाधानादि	२२-२३
११	,, ... एकादशाग्नेः अग्निवाक्या मन्त्राः ...	२३-२५

प्रपाठकः २।

पृष्ठे।

१—१२ अनुवाकाः—चित्युपक्रमब्राह्मणम् १२-४१

१ अनुवाकः...आसन्धाम् उखाग्निस्थापनम्, वात्सप्रेय उपस्थानञ्च १२-२३

२ ,, ... उखस्य अग्नेश्चयनप्रदेशं प्रति नयनम् .. २४-२७

३ ,, ... गार्हपत्याग्नेश्चयनम् २८-३०

४ ,, ... गार्हपत्याग्नौ उखाग्निसन्निधायः ३०-३१

५ ,, ... अग्निचयनभूमेः कर्षणम् ३२-३३

६ ,, ... सिकतादिवापः ३३-३४

७ ,, ... पुष्करपर्णे वक्त्राद्युपधानम् ३४-३८

८ ,, ... स्वयमातृण्णेष्टकोपधानम् ३८-५१

९ ,, ... उखाद्युपधानम् ५१-५३

१० ,, ... प्रथमचितौ अपस्याप्राणभृदपानभृदिष्टकोपधानम् ५३-५५

११ ,, ... सौवर्णसूचीभिः अश्वस्य असिच्छेदेषु स्थानेषु रेखाकरणमन्त्राः ५६

१२ ,, ... अश्वस्य तच्छेदनमन्त्राः ५७-६१

प्रपाठकः ३।

१—१२ अनुवाकाः—चितिचतुष्टयाश्वमेधविधानब्राह्मणम् ६३-८३

१ अनुवाकः..द्वितीयचितौ आश्विनीनाम्, ऋतव्यानाम्, प्राणभृताम्, अपस्यानां, वयस्यानाञ्च इष्टकानामुपधानम् ६३-६५

२ ,, ... तृतीयचितौ स्वयमातृण्णायाः, पक्षाणां दिश्यानां, दर्शानां प्राणभृतां, षड्विंशतां दक्षिणीनां, सप्तीनां वाजिन्यानाञ्च इष्टकानामुपधानम् ... ...

पृष्ठे ।

३ ,, ... चतुर्थचितौ अश्वायाश्लोमीयानाम् इष्टकानामुपधानम् ६८-७०

४ ,, ... चतुर्थचितौ वृष्टीनां व्युष्टीनाञ्च इष्टकानामुपधानम् ७०-७३

५ ,, ... पञ्चमचितौ असपत्नानां किरीणाञ्च इष्टकानामुपधानम् ७३-७५

६ ,, ... पञ्चमचितौ श्लोमभागानामिष्टकानामुपधानम् ७५-७६

७ ,, ... पञ्चमचितौ पञ्चानां गाकसदां, पञ्चानां घोड़ानाम्, स्वयमातृण्णायाः विकर्ण्याश्च इष्टकायाः उपधानम् ७६-७८

८ ,, ... पञ्चमचितौ छन्दसामिष्टकानामुपधानम् ... ७८-७९

९ ,, ... अष्टानां वसूनामिष्टकानां, तिसृणां मरुत्वतीष्टकानां, तिसृणां विश्वज्योतिषामिष्टकानाञ्चोपधानम्... ... ... ७९-८०

१० ,, ... पञ्चानां कृत्तिकानीनाम्, अष्टानां संयानीनाम्, अष्टानाम् आदित्यानामिष्टकानां, पञ्चानां कृतेष्टकानां, पञ्चानां यज्ञोदानामिष्टकानाञ्च उपधानम् ८०-८२

११ ,, ... पञ्चानां भूयस्कृतां, पञ्चानामभिरूपाणाम्, पञ्चानां क्रविष्योदानां, षण्णामायुष्याणाम् इष्टकानाम्, अग्निहृदयेष्टकायाः, सप्तानाम् ऋतव्यानाञ्च इष्टकानामुपधानम् ... ८२-८३

१२ ,, ... अश्वमेधविधानम् ८३-८४

प्रपाठकः ४।

	पृष्ठे।
१—१२ अनुवाकाः—चितिसंस्कारः	८६-१११
१ अनुवाकः ..इन्द्रतनु-यज्ञतनु-नक्षत्रेष्टकानामुपधानम्	८६-९०
२ ,, ... ऋतव्येष्टकोपधानादि, साङ्गवता मन्त्रेण प्रोक्षणञ्च	९०-९२
३ ,, ... घृतवतीयहोमः	९२-९३
४ ,, ... अग्निपरिषेचनविकर्षणे	९३-९५
५ ,, ... आधारयाम्, वैश्यकर्म्मसूक्ताभ्यामाऊतिञ्च	९५-९७
६ ,, ... समिदाधानाग्निप्रणयने, अग्नियनाङ्गस्य दशर्चस्य पञ्चर्चस्य वा अग्नितिरश्चसूक्तस्य विनियोगः	९७-९९
७ ,, ... वह्निस्थापनम्	९९-१०२
८ ,, ... वसोर्धाराहोमविधानम्	१०२-१०४
९ ,, ... वाजप्रसवीयहोमविधानम्	१०४-१०५
१० ,, ... वह्नियोगमन्त्रविनियोगः, पुनस्थितिविधानञ्च	१०६-१०८
११ ,, ... काम्यचयनानां विष्टयेष्टकोपधानस्य च विधानम्	१०८-१०९
१२ ,, ... अश्वमेधीय-वह्निध्यवमानस्तोत्रादौ ऋक्स्तोम-सामविशेषाणामभिधानम्	११०-१११

प्रपाठकाः ५—७।

अग्निचितेः शिष्टाङ्गविषयकम् औपानुवाक्यम्

उत्तरं काण्डम्।

प्रपाठकः ५।

१—२४ अनुवाकाः—औपानुवाक्यगतमन्त्रविशेषाणुक्तिः	११७-१९६

		पृष्ठे ।
१	अनुवाकः...चिद्दविर्दीक्षणीयेष्टिकथनम्... ...	११७-११९
२	,, ... अग्निचयनविधिः, तत्कालकथनम्, उखाग्नि-धारणस्य विधिश्च	१२७-१३०
३	,, ... उखाहोम-पुरुषशीर्षोपधान-वामशदिष्टकोपधानविधानानि	१३९-१३७
४	,, ... रेतःसिग्घोम-चितिस्पर्शविधानम् ...	१४१-१४३
५	,, ... द्वितीयेष्टका-खयमातृष्टकोपधानविधानम्	१४८-१४९
६	,, ... अक्षां-रूपाभिधेयानामिष्टकानामुक्तिः, तासां लोकंपृणायाश्चार्थवादौ	१५३-१५४
७	,, ... एकयूपादिविधयः	१५८-१५९
८	,, ... गायत्रसामादिना उपस्थानादिविधिः, आत्मे-ष्टकोपधानविधिश्च	१६४-१६६
९	,, ... पत्नीसंयाजेति-जप-चरूपधान-प्रोक्षणानि	१७०-१७१
१०	,, ... षट्सपाऽऽहुति-षड्महाहोमाग्निमोक्षविधयः	१७५-१७७
११—२४	अनुवाकाः—अश्वमेधाङ्गपशुसङ्गविषयाः ...	१८४-१९७
११	अनुवाकः...एकादशिनी नाम प्रथमो वन्यपशुसङ्गः...	१८४
१२	,, ... दशिनी नाम द्वितीयो वन्यपशुसङ्गः ...	१८५
१३	,, ... तृतीयो वन्यपशुसङ्गः	१८६
१४	,, ... चतुर्थो वन्यपशुसङ्गः	१८७
१५	,, ... पञ्चमो वन्यपशुसङ्गः	१८८
१६	,, ... षष्ठो वन्यपशुसङ्गः	१८९
१७-१४	,, ... सप्तमो वन्यपशुसङ्गः...	१९०
१८	,, ... अष्टमो वन्यपशुसङ्गः	१९१
१९	,, ... नवमो वन्यपशुसङ्गः	१९२
२०	,, ... दशमो वन्यपशुसङ्गः..	१९३

पृष्ठे।

२१ अनुवाकः...एकादशो वन्यपशुसङ्गः १९२
२२ ,, ... प्रथमो ग्राम्यपशुसङ्गः १९३
२३ ,, ... द्वितीयो ग्राम्यपशुसङ्गः १९५
२४ ,, ... तृतीयो ग्राम्यपशुसङ्गः १९६

प्रपाठकः ६ ।

१—२३ अनुवाकाः,—अग्निविधेरुत्तरं काण्डं, १—१०, अश्वमेधप्रवः ११—२३ ... ... २००-२७५

१ अनुवाकः—कुम्भेष्टकाभिमन्त्रणार्थाश्चयोदश मन्त्राः ... २००-२०१
२ ,, कुम्भेष्टकोपधान-चरूपधानयोर्विधिः ... २०८-२०९
३ ,, भूतेष्टकाभिषेक-चयनाङ्गसौत्रार्थ...र्विधिः ... २१५-२१७
४ ,, दर्भस्तम्बे होमविधानादि २२३-२२४
५ ,, आग्नेयाष्टाकपालाद्यभिजिदङ्गहविःपञ्चक-विधानं २२९-२३०
६ ,, अश्वाजिनोपानत्प्रतिमोचनविध्यादेः प्रशंसा २३३-२३५
७ ,, दीक्षाकालविकल्पः २४०-२४१
८ ,, अन्वारोहणादिविधयः २४३-२४९
९ ,, आसन्युद्यामोक्षाद्युपधानादिप्रशंसोपधान-कल्पविधयः २५३-२५४
१० ,, अग्निचयनप्रशंसा २५८-२५९

									पृष्ठे।
११	अनुवाकः	अश्वमेधाङ्गानाम्	अष्टादशिवाक्यानाम्	अष्टादशानां	पशूनां	प्रथमः	सङ्घातः	...	२६२
१२	,,	,,	,,	,,	,,	द्वितीयः	,,	...	२६३
१३	,,	,,	,,	,,	,,	तृतीयः	,,	...	२६४
१४	,,	,,	,,	,,	,,	चतुर्थः	,,	...	२६५-२६६
१५	,,	,,	,,	,,	,,	पञ्चमः	,,	...	२६७
१६	,,	,,	,,	,,	,,	षष्ठः	,,	...	२६७-२६८
१७	,,	,,	,,	,,	,,	सप्तमः	,,	...	२६८-२६९
१८	,,	,,	,,	,,	,,	अष्टमः	,,	...	२६९
१९	,,	,,	,,	,,	,,	नवमः	,,	...	२७०
२०	,,	,,	,,	,,	,,	दशमः	,,	...	२७१
२१	,,	,,	पशुद्वयरूपाः द्वन्द्विनः पशवः			...	...	...	२७२
२२	,,	,,	तृतीयदिनप्रातरालभ्या एकादश पशवः				...	...	२७३
२३	,,	,,	ऋतुपशवः ...	...	...	...	...	...	२७४-२७५

प्रपाठकः ७।

पृष्ठे।

१—२६ अनुवाकाः—अग्निकाण्डम्, १—१०, अश्वमेधाङ्ग-
मन्त्राः ११—२६ ... ... २७७-३५४

१ अनुवाकः गायत्र्यादिपञ्चमन्त्रैः पञ्चचितिस्तूर्ग्दिकं ... २७७-२७८

२ ,, ... ऋषभेष्टकोपधानादि २८२-२८४

३ ,, ... वपिष्णी-चिचिण्डीष्टकोपधान-वसुधारा-
प्रशंसादि २८१-२८२

४ ,, ... अदाभ्यादीनां तिसृणामाञ्जतीनां राष्ट्रभृता-
ख्येष्टकाया विधिः २८८-२८९

५ ,, ... पुनः परीन्धन-होमविशेष-पञ्चचितिप्रशंसादि २०५-२०६

६ ,, ... व्रताचरण-हिरण्येष्टकोपधान-वराङ्कस्तूप-
प्रशंसादि २१२-२१३

७ ,, ... दश्च आकूत्याञ्जतिमन्त्राः २१९-२२०

८ ,, ... स्वयंचितिमन्त्रेण क्षेत्राभिमर्शनं, कूर्मोपधा-
नादि च २२४-२२५

९ ,, ... अग्निग्रहणं, शयनप्रशंसा, हिरण्येष्टकाभिः
सर्वतोमुखस्याग्नेरुपधानं दिग्नि दिक्प्रोता-
भिधानञ्च २२९-२३०

१० ,, ... पशुशीर्षाणां प्रशंसा विशेषविधानञ्च ... २३४ २३५

११	अनुवाकः	...	अश्वस्य	दंष्ट्रादिभिः	अङ्गैः	स्तेगादीनां	देवतानां	होमार्थाः	मन्त्राः	...	३३७
१२	,,	...	,,	हन्वादिभिः	,,	वाजादीनां	,,	,,	,,	...	३३९
१३	,,	...	,,	प्रपादिभिः	,,	कूर्म्मादीनां	,,	,,	,,	...	३४१
१४	,,	...	,,	कक्षादिभिः	,,	योक्त्रादीनां	,,	,,	,,	...	३४२
१५	,,	...	,,	जघनमांसादिभिः	,,	मित्रावरुणादीनां	,,	,,	,,	...	३४३
१६	,,	...	,,	गजभागादिभिः	,,	इन्द्रादीनां	,,	,,	,,	...	३४४
१७	,,	...	,,	प्रौढान्त्रादिभिः	,,	पूषादीनां	,,	,,	,,	...	३४५
१८	,,	...	,,	ग्रीवादिभिः	,,	ओजआदीनां	,,	,,	,,	...	३४६
१९	,,	...	,,	गुह्येन्द्रियादिभिः	,,	आनन्दादीनां	,,	,,	,,	...	३४७
२०	,,	...	,,	मांसादिभिः	,,	अहरादीनां	,,	,,	,,	...	३४८
२१	,,	...	,,	दक्षिणपक्षत्वादिभिः	,,	अग्न्यादीनां	,,	,,	,,	...	३४९
२२	,,	...	,,	उत्तरपक्षत्वादिभिः	,,	वाय्वादीनां	,,	,,	,,	...	३५०
२३	,,	...	,,	अनूकाशादिभिः	,,	पथ्यादीनां	,,	,,	,,	...	३५१
२४	,,	...		अश्वं प्रति प्रार्थनमन्त्रः		...	...	...	...	...	३५२
२५	,,	...		अश्वानुमन्त्रणमन्त्रः		...	...	...	...	...	३५३
२६	,,	...		अश्वस्योदकावघ्रापनमन्त्रः		...	...	...	...	...	३५४

INDEX

TO THE

FIFTH KAṆDA

OF

THE TAITTIRIYA-SANHITA.

AGNICHAYANA BRAḤMAṆAṀ

PRAPAṬHAKA 1–7.

Prapáṭhaka 1.

			Pages
1—11	Anuvákas—Ukhyagnibráhmaṇam...	...	1—25
1	Anuváka—Sávitryáhutih, abhryádánancha	...	1—2
2	„ Mridákránthih	... ...	4—6
3	„ Mritkhananam udaṅmukhatvena aśvasya nirgamanam udakasechanancha	... ...	6—8
4	„ Mritkhananam, pushkaraparṇe mridah sambharaṇam, krishnajine mridah sthápanancha	...	8—10
5	„ Jalakshepanádipúrvakam yajnabhúmau mridáharaṇam	...	10—13
6	„ Ukhánirmáṇam	... ...	14—15
7	„ Ukhásanskárah	... ...	15—17
8	„ Paśuśírshasampádanádi	...	17—19
9	„ Díkshásanskárah, ukhápratápanádicha	... ...	20—21
10	„ Ukhyágnau samidhádhánádi	...	22—23
11	„ Ekádaśaśvasya apriyajchah	...	24—25

Pages

PRAPÁṬHAKA 2.

1—12 Anuvákas—Chityupakramabráhmaṇam ... 32—61

1 Anuváka—Á́sandhyám ukhyágnisthápanam, bátsapreṇa upasthánancha ... 32—34

2 „ Ukhyasya agneś-chayanapradeśam prati nayanam ... ... 36—37

3 „ Gárhapatyágne-schayanam ... 38—40

4 „ Gárhapatyágnau ukhyágnisannibápah 40—41

5 „ Agnichayanabhúmeh karshaṇam ... 42—44

6 „ Sikatádibápah ... ... 44—46

7 „ Pushkaraparṇe rukmádyupadhánam 46—48

8 „ Svayamátriṇṇeshṭakopadhánam ... 48—51

9 „ Ukhádyúpadhánam ... ... 51—53

10 „ Prathamachitau apasyá-praṇabhrid-apánabhridishṭakopadhánam ... 53—55

11 „ Saubarṇasúchivih aśvasya asichchhedyeshu stháneshu rekhákaraṇa-mantráh 56

12 „ Asvasya tachchhedanamantráh ... 60—61

PRAPÁṬHAKA 3.

1—12 Anuvákas—Chitichatushṭaya-áśvamedhavidhána-bráhmaṇam ... ... 64—84

1 Anuváka—Dvitíyachitau áśviníṇám, ṛitabyáṇám, práṇabhritám, apasyánám, bayasyánáncha ishṭakánám-upadhánam 64—66

2 „ Tritíyachitau svayamátriṇṇáyáh, panchánám diśyánám, dasánám prápabhritám, shaḍbinśatám bṛihatínám, saptánám bálakhilyánámcha ishṭakánám upadhánam 66—68

3 „ Chaturthachitau akshṇayástomíyánám ishṭakánám-upadhánam ... 68—70

4 „ Chaturthachitau sṛishṭínám byushṭínáṇcha ishṭakánám upadhánam... 70—73

			Pages
5	Anuváka—	Panchamachitau asapatnánám birajáncha ishṭakánámupadhánam ...	73—75
6	„	Panchamachitau stomabhágánám ishṭakánámupadhánam ...	75—76
7	„	Panchamachitau panchánám nákasadám, panchánám chodánám svayamátriṇṇáyáh bikarṇyáścha ishṭakáyáh upadhánam ...	76—78
8	„	Panchamachitau chhandasámishṭakánám upadhánam	78—79
9	„	Ashṭánám sayujámishtakánám, tisrínám mandaleshṭakánám, tisrínám biśvajyotisháṁ ishṭakánácha upadhánam	79—80
10	„	Panchánám bṛishṭisaníném, ashtánám samyánínám, ashṭánám-ádityánám ishṭakánám, panchánám ghriteshṭakánám, panchánám yaśodánámishṭakánám upadhánam ...	80—82
11	„	Panchánám bhúyaskṛitám, panchánám agnirúpánám, panchánám drabiṇodánám, shaṇṇám áyushyánám iśhṭakánám, agnihṛidayeshṭakáyáh, saptánám ṛitabyánáncha ishtakánám upadhánam ...	82—83
12	„	Aśvamedhavidhánam	83—84

PRAPÁṬHAKA 4.

1—12	Anuvákas—	Chitisanskárah	89—111
1	Anuváka—	Indratanu-yajnatanu-nakshatreshṭakánám-upadhánam	89—90
2	„	Ṛitabyeshṭakopadhánádi, sáhasrabatá mantreṇa prokshaṇamcha ...	90—92
3	„	Śatarudríyahomah	92—93
4	„	Agniparishechana-bikarshaṇe ...	94—95

			Pages
5	Anuváka—	Byágháraṇam baiśyakarma-súktábhyám-áhutiścha	95—97
6	„	Sabhiidádhánágnipraṇayne agnichayanángasya daśarchasya pancharchasya bá apratirathasúktasya viniyogah	97—99
7	„	Vahnisthápanam	99—102
8	„	Basordháráhomavidhánam ...	102—104
9	„	Bájaprasabíyahomavidhánam ...	104—105
10	,	Vahniyogamantraviniyogah, punaśchitividhánancha	106—108
11	„	Kámyachayanánám bihabyeshṭakopadhánasya cha vidhánam ...	108—109
12	„	Asvamedhíya-bahishpabamánastotrádau ṛikstomasámaviśeshánámabhidhánam	110—111

Prapáṭhakas 5—7.

Agnichiteh śishtángavishayakam aupánuvákyam uttaram káṇḍam.

Prapáṭhaka 5.

1—24	Anuvákas—	Aupanuvákyagata-mantraviśeshadyuktih	117—196
1	Anuváka—	Trihabirdíkshaṇíyeshṭikathanam ...	117—119
2	„	Agnichayanavidhih, tatphalakathanam, ukhyágnidháranasyavidhiścha	127—130
3	„	Ukháhoma-purushaśírshopadhána-bámabhridishtakopadhánavidhánáni	136—137
4	„	Retah sigghomachitisparśavidhánam	141—143
5	„	Hiranyeshṭaká-svayamátriṇṇeshṭakopadhánavidhánam	148—149
6	„	Ahnám rúpábhidheyánámishṭakánámuktih, tásám lokampriṇáyáśchárthabádau	153—154

		Pages
7	Anuváka—Ekayúpádividhayah	158—159
8	„ Gáyatrasámádiná upasthánádividhih, átmeshṭakopadhánavidhiścha ...	164—166
9	„ Panchájyáhuti-japa-charúpadhána-prokshaṇani	170—171
10	„ Shatsarpáhuti-shaḍmaháhomágni-mokshavidhayah	175—177
11—24	Anuvákas—Aśvamedhánga-paśusanghabishayáh	184—199
11	Anuváka—Ekádaśiníniáma prathamo banya-paśusanghah	184
12	„ Daśíní náma dvitíyo banyapaśu-sanghah	185
13	„ Tritíyo banypaśusanghah ...	186
14	„ Chaturtho „ ...	187
15	„ Panchamo „ ...	188
16	„ Shashṭo „ ...	189
17	„ Saptamo „ ...	190
18	„ Ashṭamo „ ...	191
19	„ Navamo „ ...	192
20	„ Daśamo „ ...	193
21	„ Ekádaśo „ ...	193
22	„ Prathamo grámyapaśusanghah ...	194
23	„ Dvitíyo „ ...	195
24	„ Tritíyo „ ...	196—197

Prapáṭhaka 6.

1—23	Anuvákás—Agnibidhe-ruttaram káṇḍam—1—10; Aśvamedhapaśabah—11—23. ...	200—275
1	Anuváka—Kumbheshṭakábhimantranárthás-trayodaśa-mantráh	200—201
2	„ Kumbheshṭakopadhána-charúpadhánayor-vidhih	208—209
3	„ Bhúteshṭakávisheka-chayanánga-sautráyaní-vidhih	215—217
4	„ Darbhastambhe homabiḍhánádi ...	223—224

		Pages
5 Anuváka—	Agneyáshṭákapáládyabhijidanga-habihpan-chakabidhanam	229—230
6 „	Krishnájinopánat-pratimochana-bidhyádeh praśamsá	233—235
7 „	Díkshákálabikalpah	240—241
8 „	Anvárohaṇádibidhayah	244—246
9 „	Asandyudyámokhádyupadhánádi praśamso-padhánakartribidhayah	253—254
10 „	Agnichayana-prasámsá	258—259
11 „	Asvamedhángánám ashṭadaśinámnám ashṭá-daśánám paśúnám prathamah sanghátah	262
12 „	„ „ „ dvitíyah „	263
13 „	„ „ „ tritíyah „	264
14 „	„ „ „ chaturthah „	265—266
15 „	„ „ „ panchamah „	267
16 „	„ „ „ shashṭhah „	267—268
17 „	„ „ „ saptamah „	268—269
18 „	„ „ „ ashtamah „	269
19 „	„ „ „ navamah „	270
20 „	„ „ „ daśamah „	271
21 „	„ Pasúdvayarúpáh dvandvinah paśavah	272
22 „	„ Tritíyadinaprátarálabhyá ekádaśa paśavah	273
23 „	„ Ritupaśavah	274—275

Prapáṭhaka 7.

1—26 Anuvákas—	Agnikáṇḍam—1—10. Aśvamedhángamantráh—11—26 ...	277—354
1 Anuváka—	Gáyatryádipanchamantraih paśuchiti-sparśadikam	277—278
2 „	Rishabheshṭakopadhánádi	282—284
3 „	Bajriní-chitriníshṭakopadhána-basudhárá-prasámsádi	291—292
4 „	Adábhyádínam tisríṇám-áhutínam rásh-trabhṛiṭámcheshṭakánám vidhih ...	298—299

			Pages
5	Anuváka—	Punah parindhanahomaviśesha-pancha-chitiprasamsádi	305—306
6	„	Bratácharaṇa-hiraṇyeshtakopadhána-rugá-hutyagni-praśamsadi	312—313
7	„	Daśa ákútyáhutimantráh	319—320
8	„	Svayam chitimantreṇa kshetrábhimarśaṇam, kúrmopadhánádi cha	324—325
9	„	Agnigrahaṇam, chayanaprasamsá, hiraṇyesh-takábhih sarbatomukhasyágne-rupadhá-nam diśi dikprotábhidhánamcha ...	329—330
10	„	Paśuśirsháṇám praśaṃsa viśeshavidhánamcha	334—335
11	„	Aśvasya danshtrádibhih aṅgaih stegádiṇám devatánám homártháh mantráh	337
12	„	„ hanvádibhih aṅgaih bájádínám devatánám homártháh mantráh	339
13	„	„ śaphádibhih aṅgaih kúrmádiṇám devatánám homártháh mantráh	341
14	„	„ kakshádibhih aṅgaih yoktrádínám devatánám homártháh mantráh	342
15	„	„ jaghanamánsádíbhih aṅgaih mitrá-varuṇádínám devatánám hom-ártháh mantráh	343
16	„	„ galabhágádibhih aṅgaih indrádínám devatánám homártháh mantráh	344
17	„	„ prauḍhántradibhih aṅgaih púshádí-nám devatánám homártháh mantráh	345
18	„	„ gríbádibhih aṅgaih oja-ádínám devatánám homártháh mantráh	346
19	„	„ guhyendriyádibhih aṅgaih ánandádí-nám devatánám homártháh mantráh	347
20	„	„ mánsádibhih aṅgaih aharádínám devatánám homártháh mantráh	348
21	„	„ dakshiṇapakshatyádibhih aṅgaih agnyádínám devatánám ho-mártháh mantráh ...	349

		Page
22	Anuváka—Aśvasya uttarapakshatyádibhih aṅgaih váshvádínám devatánám homártháh mantráh	350
23	„ „ anúbṛigádibhih aṅgaih pathyádínám devatánám homártháh mantráh	351
24	„ Asvam prati prárthanamantrah ...	352
25	„ Asvánumantraṇamantrah	353
26	„ Asvasyodakábaghrápanamantrah ...	354

॥ • ॥ श्रीगणेशाय नमः ॥ • ॥

तैत्तिरीयसंहिताभाष्ये

पञ्चमकाण्डे प्रथमप्रपाठके

प्रथमोऽनुवाकः ।

हरिः ओम् ।

सावित्राणि जुहोति प्रसूत्यै चतुर्गृहीतेन जुहोति चतुष्पादः पशवः पशूनेवावरुन्धे चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठति छन्दाꣳसि देवेभ्योऽपाक्रामन् न वो भागानि हव्यं वक्षाम इति तेभ्य एतच्चतुर्गृहीतमधारयन् पुरोऽनुवाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुर्गृहीतं जुहोति छन्दाꣳस्येव तत् प्रीणाति तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्ति यं कामयेत ॥ १ ॥

पापीयान्त्स्यादित्येकैकं तस्य जुहुयादाहुतीभिरेवैनमपि गृह्णाति पापीयान् भवति यं कामयेत वसीयान्त्स्यादिति सर्वाणि तस्यानुद्रुत्य जुहुयादाहुत्यैवैनमभिक्रामयति वसीयान् भवत्यथो यज्ञस्यैवैषाभिक्रान्तिरेति

वै एष यज्ञमुखादृध्याः योऽग्नेर्देवतायाऽएत्यष्टावेतानि साविचाणि भवन्ति अष्टाक्षरा गायत्री गायत्रः ॥ २ ॥

अग्निस्तेनैव यज्ञमुखादृध्या अग्नेर्देवतायै नैत्यष्टौ साविचाणि भवन्ति आहुतिर्नवमी चिकृतमेव यज्ञमुखे वि यातयति यदि कामयेत छन्दाꣳसि यज्ञयज्ञसेनार्पयेयमित्यृचमन्तमां कुर्याच्छन्दाꣳस्येव यज्ञयज्ञसेनार्पयति यदि कामयेत यजमानं यज्ञयज्ञसेनार्पयेयमिति यजुरन्तमं कुर्याद्यजमानमेव यज्ञयज्ञसेनार्पयत्यृचा स्तोमꣳ समर्द्धयेति ॥ ३ ॥

आह समर्द्ध्यै चतुर्भिरभिमा दत्ते चत्वारि छन्दाꣳसि छन्दोभिरेव देवस्य त्वा सवितुः प्रसव इत्याह प्रसूत्यै अग्निर्देवेभ्यो निलायत स वेणुं प्राविशत् स एतामूतिमनु समचरद् यद्वेणोः सुषिरꣳ सुषिराऽग्निर्भवति स योनित्वाय स यत्रयत्रावसत् तत्कृष्णमभवत् कल्माषी भवति रूपसमृद्ध्यै उभयतःक्षणूर्भवतीतश्च, अमुतश्चाक्स्यावरुध्यै व्याममात्री भवत्येतावद्वै पुरुषे वीर्यं वीर्यसम्मिताऽपरिमिता भवत्यपरिमितस्यावरुध्यै यो वनस्पतीनां फलग्रहिः स एषां वीर्यावान् फलग्रहिर्वेणुर्वेणुवी भवति वीर्यस्यावरुध्यै* ॥ ४ ॥

* अस्य व्याख्यानं चतुर्थकाण्ड-प्रथमप्रपाठक-प्रथमानुवाकभाष्ये द्रष्टव्यम्।

कामयेत। गायत्रः। अर्हेयेति। च। सप्तविंशतिश्च ॥
॥ १ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे प्रथमप्रपाठके प्रथमोऽनुवाकः ॥ * ॥

श्रीगणेशाय नमः ॥

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
चतुर्थकाण्डे चित्यर्थमन्त्राः सर्वत्र वर्णिताः।
ब्राह्मणं पञ्चमे काण्डे, तत्र सप्त प्रपाठकाः ॥
मन्त्रव्याख्या चतुर्थादौ, शिष्टमौपानुवाक्यगम्।
एकादशानुवाका स्युराद्येऽर्थास्त्वेवमीरिताः ॥
सावित्राकृतिरभ्रेश्च स्वीकारः प्रथमे भवेत्।
द्वितीये मृत्खनं गच्छन्नश्वेनाक्रामयेद्ध्रुवम् ॥
तृतीये तूत्क्रमय्याश्वं* भूसंस्कारो जलादिभिः।
चतुर्थे तु गृहं खात्वा सम्भरेच्चर्मपञ्चयोः ॥
पञ्चमे सम्भृतामेतां यज्ञभूमौ समाहरेत्।
षष्ठे तूखां निर्मिमीत, सप्तमे संस्करोति ताम् ॥
अष्टमे पशवो वक्रेरुख्यस्य नवमे जनिः।

* 'मृत्क्रमय्याश्वम्' इति सार्व्वत्रिकः पाठो न सम्यगिव प्रतिभाति।

उखां दधीत दशमे, स्यादन्यस्याश्वमेधिकः*॥
अध्येतुमनुवाकोऽत्र प्रोक्तः, उत्तध्यतां ततः।
'समिद्धः' इत्येवमाद्या अश्वस्याप्रिय ईरिताः॥
आप्रियः स्युः प्रयाजानां याज्या एकादशात्र ताः।
अश्वमेधाख्यकाण्डे ताः विनियुक्ता स्फुटं श्रुतम्॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे प्रथमप्रपाठके प्रथमोऽनुवाकः॥०॥

व्यृद्धं वा एतद्यज्ञस्य यदयजुष्केण क्रियते "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" यजुष्कृत्यै यज्ञस्य समृद्ध्यै प्रतूर्त्तं वाजिन्ना द्रवेत्यश्वमभि दधाति रूपमेवास्यैतन्महिमानं व्याचष्टे युञ्जाथाꣳ रासभं युवमिति गर्दभमसत्येव गर्दभं प्रति ष्ठापयति तस्मादश्वाद्गर्दभो सत्तरो योगेयोगे तवस्तरमित्याह॥१॥

योगेयोग एवैनं युङ्क्ते वाजेवाजे हवामह इत्याहान्नं वै वाजोऽन्नमेवाव रुन्धे सखाय इन्द्रमूतय इत्याहेन्द्रियमेवाव रुन्धेऽग्निर्देवेभ्यो निलायत तं प्रजापतिरन्वविन्दत् प्राजापत्योऽश्वोऽश्वेन सम्भरत्यनुवित्यै पापवस्यसं वा एतत् क्रियते यच्छ्रेयसा च पापीयसा च समानं कर्म कुर्वन्ति पापीयान्॥२॥

---

† 'स्यादन्यस्याश्वमेधिकाः' इति अनेकेषु पाठो न संगच्छते।

क्ष्वाऽन्नर्दुभोऽश्वं पूर्वं नयन्ति पापवस्यसस्य व्याहत्यै तस्माच्छ्रेयाꣳसं पापीयान् पश्चादन्वेति बहुर्वै भवतो भातृव्यो भवतीव खलु वा एष योऽग्निं चिनुते वज्रोऽश्वः प्रतूर्वन्नेवाक्रामन्नशस्तीरित्याह वज्रेणैव पाप्मानं भातृव्यमव क्रामति रुद्रस्य गाणपत्यादित्याह रौद्रा वै पशवो रुद्रादेव ॥ ३ ॥

पशून्निर्याच्यात्मने कर्म कुरुते पष्णा सयुजा सहेत्याह पूषा वा अध्वनाꣳसन्नेता समष्ट्यै पुरीषायतनो वा एष यदग्निरङ्गिरसो वा एतमग्रे देवतानाꣳ समभरन् पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदच्छेहीत्याह सायतनमेवैनं देवताभिः सम्भरत्यग्निं पुरीष्यमङ्गिरस्वदच्छेमꣳ इत्याह येन ॥ ४ ॥

सङ्गच्छते वाजमेवास्य वृङ्क्ते प्रजापतये प्रतिप्रोच्याग्निः सम्भृत्य इत्याहुरीयं वै प्रजापतिस्तस्या एतच्छोचं यद्वल्मीकोऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामꣳ इति वल्मीकवपामुप तिष्ठते साक्षादेव प्रजापतये प्रतिप्रोच्याग्निꣳ सम्भरत्यग्निं पुरीष्यमङ्गिरस्वद्भराम इत्याह येन सङ्गच्छते वाजमेवास्य वृङ्क्ऽग्निरुषसामग्रं ॥ ॥ ५ ॥

अस्यदित्याहानुस्थात्या आगत्य काण्यध्वन आक्रम्य

वाजिन् पृथिवीमित्याहेच्छत्येवैनं पूर्वया विन्दत्युत्तरया द्वाभ्यामा क्रमयति प्रतिष्ठित्या अनुरूपाभ्यां तस्मादनुरूपाः पशवः प्र जायन्ते द्यौस्ते पृष्ठं पृथिवी सधस्थमित्याह एभ्यो वा एतं लोकेभ्यः प्रजापतिः समैरयत् रूपमेवास्यैतन्महिमानं व्याचष्टे वज्री वै, एष यदश्वो दक्षिरन्यतोदङ्मो भूयाल्लोमभिरुभयादङ्मो यं द्विष्यात्तमधस्पदं ध्यायेद्वज्रेणैवैनꣳ स्तृणुते* ॥ ६ ॥

आह। पापीयान्। रुद्रादेव। येन। अग्रं। वज्री वै। सप्तदश च ॥ २ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे प्रथमप्रपाठके द्वितीयोऽनुवाकः ॥०॥

उत्क्रामोदक्रमीदिति द्वाभ्यामुत्क्रमयति प्रतिष्ठित्या अनुरूपाभ्यां तस्मादनुरूपाः पशवः प्र जायन्तेऽप उप सृजति यत्र वा आपः उपगच्छन्ति तदोषधयः प्रति तिष्ठन्त्योषधीः प्रतितिष्ठन्तीः पशवोऽनु प्रति तिष्ठन्ति पशून् यज्ञो यज्ञं यजमानो यजमानं प्रजास्तस्मादप उप सृजति प्रतिष्ठित्यै यदध्वर्युरनग्नावाहुतिं जुहुयादुन्नोऽध्वर्युः ॥ १ ॥

* अस्य व्याख्यानं चतुर्थकाण्ड-प्रथमप्रपाठक-द्वितीयानुवाकभाष्ये द्रष्टव्यम।

स्याद्रक्षाꣳसि यज्ञꣳ हन्युर्हिरण्यमुपास्य जुहोत्यग्नि-वत्येव जुहोति नान्धोऽध्वर्युर्भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति जिघर्म्यग्निं मनसा घृतेनेत्याह मनसा हि पुरुषो यज्ञमभिगच्छति प्रतिष्ठन्तं भुवनानि विश्वेत्याह सर्वꣳ ह्येष प्रत्यङ् क्षेति पृथुं तिरश्चा वयसा बृहन्तमित्याहाल्पो ह्येष जातो महान् ॥ २ ॥

भवति व्यचिष्ठमन्नꣳ रभसं विदानमित्याहान्नमेवास्मै स्वदयति सर्वमस्मै स्वदते य एवं वेद आ त्वा जिघर्मि वचसा घृतेनेत्याह तस्माद्यत् पुरुषो मनसाभि गच्छति तद्वाचा वदत्यरक्षसेत्याह रक्षसामपहत्यै मयश्रीः स्पृहयद्वर्णो अग्निरित्याहापचितिमेवास्मिन् दधात्यपचितिमान् भवति य एवं ॥ ३ ॥

वेद मनसा तु *वै तामाप्तुमर्हति यामध्वर्युरन्नमाहुतिं जुहोति मनस्वतीभ्यां जुहोत्याहुत्योराप्त्यै द्वाभ्यां प्रतिष्ठित्यै यज्ञमुखेयज्ञमुखे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघांसन्त्येतर्हि खलु वा एतद्यज्ञमुखं यद्धोनदाहुतिरश्रुते परि लिखति रक्षसामपहत्यै तिसृभिः परि लिखति त्रिवृद्वा अग्निर्यावानेवाग्निस्तस्माद्रक्षाꣳस्यप घ्नन्ति ॥ ४ ॥

---

* त्वेतामिति B पु० पाठः ।

गायत्रिया परि लिखति तेजो वै गायत्री तेजसैवैनं परि गृह्णाति त्रिष्टुभा परि लिखतीन्द्रियं वै त्रिष्टुगिन्द्रियेणैवैनं परि गृह्णात्यनुष्टुभा परि लिखत्यनुष्टुप् सर्वाणि छन्दाꣳसि परिभूः पर्याप्त्यै मध्यतोऽनुष्टुभा वाग्वा अनुष्टुप् तस्मान्मध्यतो वाचा वदामो गायत्रिया प्रथमया परि लिखत्यथानुष्टुभाथ त्रिष्टुभा तेजो वै गायत्री, यज्ञोऽनुष्टुगिन्द्रियं त्रिष्टुप् तेजसा चैवेन्द्रियेण चोभयतो यज्ञं परि गृह्णाति* ॥ ५ ॥

अन्धोऽध्वर्युः। महान्। भवति य एवं। हन्ति। त्रिष्टुभा तेजो वै गायत्री। चयोदश च ॥ ३ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे प्रथमप्रपाठके तृतीयोऽनुवाकः ॥०॥

देवस्य त्वा सवितुः प्रसव इति खनति प्रसूत्या अथो धूममेवैतेन जनयति ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमित्याह ज्योतिरेवैतेन जनयति सोऽग्निर्जातः प्रजाः शुचार्पयत् तं देवा अर्धर्चेनाशमयन् शिवं प्रजाभ्योऽहिꣳसन्तमित्याह प्रजाभ्य एवैनꣳ शमयति द्वाभ्यां खनति प्रतिष्ठित्या अपां पृष्ठमसीति पुष्करपर्णमा ॥१॥

* अस्य व्याख्यानं चतुर्थकाण्ड-प्रथमप्रपाठक-द्वितीयानुवाकभाष्ये द्रष्टव्यम्।

हरत्यपां वै एतत् पृष्ठं यत् पुष्करपर्णꣳ रूपेणैवैनत् आ हरति पुष्करपर्णेन सम्भरति योनिर्वा अग्नेः पुष्करपर्णꣳ सयोनिमेवाग्निꣳ सम्भरति कृष्णाजिनेन सम्भरति यज्ञो वै कृष्णाजिनं यज्ञेनैव यज्ञꣳ सम्भरति यद् ग्राम्याणां पशूनां चर्मणा सम्भरेद् ग्राम्यान् पशून् शुचार्पयेत् कृष्णाजिनेन सम्भरत्यारण्यानेव पशून् ॥२॥

शुचार्पयति तस्मात् समावत् पशूनां प्रजायमानानामारण्याः पशवः कनीयाꣳसः शुचा ह्यृता लोमतः सम्भरत्यतो ह्यस्य मेध्यं कृष्णाजिनञ्च पुष्करपर्णञ्च सꣳस्तृणाति इद्मं वै कृष्णाजिनमसौ पुष्करपर्णमाभ्यामेवैनमुभयतः परि गृह्णात्यग्निर्देवेभ्यो निलायत तमथर्वान्वपश्यदथर्वा त्वा प्रथमो निरमन्थदग्ने इति ॥३॥

आह य एवैनमन्वपश्यत् तेनैवैनꣳ सम्भरति त्वामग्ने पुष्करादधि इत्याह पुष्करपर्णे ह्येनमुपश्रितमविन्दत्तमु त्वा दध्यङृषिरित्याह दध्यङ् वा आथर्वणस्तेजस्व्यासीत् तेज एवास्मिन् दधाति तमु त्वा पाथ्यो वृषेत्याह पूर्वमेवादितमुत्तरेणाभि गृणाति ॥ ४ ॥

चतसृभिः सम्भरति चत्वारि छन्दाꣳसि छन्दोभिरेव गायत्रीभिर्ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुग्भी राजन्यस्य त्रैष्टुभो हि राजन्यो यं कामयेत वसीया-

न्त्स्यादित्युभयीभिस्तस्य सम्भरेत् तेजश्चैवास्मै इन्द्रियं च समीची दधात्यष्टाभिः सम्भरत्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तꣳ सम्भरति सीद होतरिति, आह देवता एवास्मै सꣳ सादयति नि होतेति मनुष्यान्त्सꣳ सीदस्वेति वयाꣳसि जनिष्या हि जेन्यो अग्रे अह्नामित्याह देवमनुष्यानेवास्मै सꣳसन्नान् प्र जनयति ॥ ५ ॥

आ। एव पञ्चून्। इति। गृणाति। होतरिति। सप्तविꣳशतिश्च ॥ ४ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे प्रथमप्रपाठके चतुर्थोऽनुवाकः ॥०॥

क्रूरमिव वै अस्याः एतत् करोति यत् खनत्यप उपस्पृजत्यापो वै शान्ताः शान्ताभिरेवास्यै शुचꣳ शमयति सन्ते वायुर्मातरिश्वा दधात्वित्याह प्राणो वै वायुः प्राणेनैवास्यै प्राणाꣳ सन्दधाति सन्ते वायुरित्याह तस्माद्वायुप्रच्युता दिवो वृष्टिरीर्त्ते तस्मै च देवि वषडस्तु ॥ १ ॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयप्रथमप्रपाठकस्य तृतीयानुवाकभाष्ये द्रष्टव्यम्।

तुभ्यमित्याह षड्वा ऋतव ऋतुष्वेव वृष्टिं दधाति तस्मात् सर्वान् ऋतून् वर्षति यद्वषट्कुर्याद् यातयामा अस्य वषट्कारः स्याद्यन्न वषट्कुर्याद् रक्षाꣳसि यज्ञꣳ हन्युर्वडित्याह परोक्षमेव वषट्करोति नास्य यातयामा वषट्कारो भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति सुजातो ज्योतिषा सहेत्यनुष्टुभा उप नह्यत्यनुष्टुप् ॥ २ ॥

सर्वाणि छन्दाꣳसि छन्दाꣳसि खलु वा अग्नेः प्रिया तनूः प्रिययैवैनं तनुवा परि दधाति वेदको वासो भवति य एवं वेद वारुणो वै अग्निरुपनद्ध उद्तिष्ठ स्वध्वर ऊर्ध्व ऊ षु ण ऊतये इति सावित्रीभ्यामुत्तिष्ठति सवितृप्रसूत एवास्योर्ध्वां वरुणमेनिमुत्सृजति द्वाभ्यां प्रतिष्ठित्यै स जातो गर्भो असि ॥ ३ ॥

रोदस्योरित्याह इमे वै रोदसी तयोरेष गर्भो यत् अग्निस्तस्मादेवमाह अग्ने चारुर्विभृत ओषधिष्वित्याह यदा ह्येतं वि भरन्ति अथ चारुतरो भवति प्र मातृभ्यो अधि कनिक्रदद्गा इत्याह ओषधयो वा अस्य मातरस्ताभ्य एवैनं प्र च्यावयति स्थिरो भव वीड्वङ्ग इति गर्दभ आ सादयति ॥ ४ ॥

सन्नह्यत्येवैनमेतया स्थेम्ने गर्दभेन सं भरति तस्मात् गर्दभः पशूनां भारभारितमो गर्दभेन सं भरति तस्मा-

र्दभोऽप्यनाहेलेशेऽत्यन्यान् पशून् मेद्यत्यन्नꣳ ह्येने-नार्कꣳ सं भरन्ति गर्दभेन सं भरति तस्माद् गर्दभो द्विरेताः सन् कनिष्ठं पशूनां प्रजायतेऽग्निर्ह्यस्य योनिं निर्दहति प्रजासु वै एष एतर्ह्यारूढः ॥ ५ ॥

स ईश्वरः प्रजाः शुचा प्रदहः शिवो भव प्रजाभ्य इत्याह प्रजाभ्य एवैनꣳ शमयति मानुषीभ्यस्त्वमङ्गिर इत्याह मानव्यो हि प्रजाः मा द्यावापृथिवी अभि शूशुचो मा अन्तरिक्षꣳ मा वनस्पतीनित्याह एभ्य एवैनं लोकेभ्यः शमयति प्रैतु वाजी कनिक्रददित्याह वाजी ह्येष नानदद्रासभः पत्वेति ॥ ६ ॥

आह रासभ इति ह्येतमृषयोऽवदन् भरन्नग्निं पूरीष्यमित्याह अग्निꣳ ह्येष भरति मा पादि आयुषः पुरेत्याह आयुरेवास्मिन् दधाति तस्माद्गर्दभः सर्वमायु-रेति तस्माद्गर्दभे पुरा आयुषः प्रमीते बिभ्यति वृषाग्निं वृषणं भरन्नित्याह वृषा ह्येष वृषाग्निरपां गर्भं ॥ ॥ ७ ॥

समुद्रियमित्याह अपाꣳ ह्येष गर्भो यदग्निरग्न आ याहि वीतये इति वै इमौ लोकौ वि एतामग्न आ याहि वीतये इति यदाहानयोर्लोकयोर्वीत्यै प्रच्युतो वै एष आयतनात् अगतः प्रतिष्ठाꣳ स एतर्हि अध्वर्युश्च यज-

मानच्च ध्यायति कृतं सत्यमित्याह इयं वा कृतमसौ ॥ ॥ ८ ॥

सत्यमनयोरेवैनं प्रति ष्ठापयति नार्तिमार्च्छत्यध्वर्युर्न यजमानो वरुणो वै एष यजमानमभ्यैति यदग्निरुपनह्य ओषधयः प्रति गृह्णीताग्निमेतमित्याह शान्त्यै व्यस्यन् विश्वा अमतीररातीरित्याह रक्षसामपहत्यै निषीदन् नो अप दुर्मतिꣳ हनदित्याह प्रतिष्ठित्यै ओषधयः प्रति मोदध्वं ॥ ९ ॥

एनमित्याहौषधयो वै अग्नेर्भागधेयं ताभिरेवैनꣳ समर्द्धयति पुष्पावतीः सुपिप्पला इत्याह तस्मादोषधयः फलं गृह्णन्त्ययं वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमासदादित्याह याभ्य एवैनं प्र च्यावयति तास्वेवैनं प्रति ष्ठापयति द्वाभ्यामुपावहरति प्रतिष्ठित्यै* ॥ १० ॥

अस्तु। अनुष्टुप्। असि। सादयति। आरूढः। पत्वेति। गर्भम्। असौ। मोदध्वम्। द्विचत्वारिꣳशच्च ॥ ॥ ५ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे प्रथमप्रपाठके पञ्चमोऽनुवाकः ॥०॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयप्रथमप्रपाठकस्य चतुर्थानुवाकभाष्ये द्रष्टव्यम्।

वारुणो वै अग्निरुपनद्धो वि पाजसा इति वि संसयति सवितृप्रसूत एवास्य विषूचीं वरुणमेनिं वि सृजति अप उपसृजति आपो वै शान्ताः शान्ताभिरेवास्य शुचं शमयति तिसृभिरुपसृजति त्रिवृदै अग्निर्यावानेव अग्निस्तस्य शुचं शमयति मिचः संसृज्य पृथिवीमित्याह मिचो वै शिवो देवानां तेनैव ॥ १ ॥

एनꣳ सꣳ सृजति शान्त्यै यद् ग्राम्याणां पाचाणां कपालैः संसृजेद् ग्राम्याणि पाचाणि शुचार्पयेद् अर्भकपालैः सꣳ सृजत्येतानि वै अनुपजीवनीयानि तान्येव शुचार्पयति शर्कराभिः सꣳ सृजति धृत्यै अथो शुन्वायाजलोमैः सꣳ सृजत्येषा वै अग्नेः प्रिया तनूर्यदजा प्रिययैवैनं तनुवा सꣳ सृजत्यथो तेजसा कृष्णाजिनस्य लोमभिः सं ॥ २ ॥

सृजति यज्ञो वै कृष्णाजिनं यज्ञेनैव यज्ञꣳ सꣳ सृजति रुद्राः समभृत्य पृथिवीमित्याहैता वै एतं देवता अग्रे समभरन् ताभिरेवैनꣳ समभरति मुखस्य शिरोऽसीत्याह यज्ञो वै मुखस्तस्य एतच्छिरो यदुखा तस्मादेवमाह यज्ञस्य पदे स्थ इत्याह यज्ञस्य ह्येते ॥ ३ ॥

पदे अथो प्रतिष्ठित्यै प्र अन्याभिर्यच्छति अनु अन्यैर्मन्त्रयते मिथुनत्वाय व्युष्टिं करोति चय इमे लोका एषां

लोकानामाप्त्यै छन्दोभिः करोति वीर्यं वै छन्दाꣳसि वीर्येणैवैनां करोति यजुषा विलं करोति व्यावृत्त्यै इयतीं करोति प्रजापतिना यज्ञमुखेन सम्मितां द्विस्तनां करोति द्यावापृथिव्योर्दोहाय चतुस्तनां करोति पशूनां दोहाय अष्टास्तनां करोति छन्दसां दोहाय नवाश्रिम् अभिचरतः, कुर्यात् चित्रतमेव वज्रꣳ सम्भृत्य भ्रातृव्याय प्र हरति स्तृत्यै कृत्वाय सा मह्मीम् उखामिति नि दधाति देवतास्वेवैनां प्रति ष्ठापयति* ॥ ॥ ४ ॥

तेनैव। लोमभिः सं। एते। अभिचरतः। एकविꣳशतिश्च ॥ ६ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे प्रथमप्रपाठके षष्ठोऽनुवाकः ॥०॥

सप्तभिर्धूपयति सप्त वै शीर्षण्याः प्राणाः शिर एतद् यज्ञस्य यदुखा शीर्षन्नेव यज्ञस्य प्राणान् दधाति तस्मात् सप्त शीर्षन् प्राणा अश्वशकेन धूपयति प्राजापत्यो वै

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयप्रथमप्रपाठकस्य पञ्चमानुवाकभाष्ये द्रष्टव्यम्।

अश्वः सयोनित्वाय अदितिस्त्वेत्याह इयं वै अदितिरदित्या एव अदित्यां खनत्यस्याः अक्रूरङ्काराय न हि स्वः स्वꣳ हिनस्ति देवानां त्वा पत्नीरित्याह देवानाम्॥ ॥ १ ॥

वै एतां पत्नयोऽग्रेऽकुर्व्वन्ताभिरेवैनां दधाति धिषणास्त्वा इत्याह विद्या वै धिषणा विद्याभिरेवैनामभीन्धे ग्रास्त्वेत्याह छन्दाꣳसि वै ग्राश्छन्दोभिरेवैनाꣳ अपयति वरूचयस्त्वेत्याह हेचाः वै वरूचयो हेचाभिरेवैनां पचति जनयस्त्वा इत्याह देवानां वै पत्नीः॥ २ ॥

जनयस्ताभिरेवैनां पचति षड्भिः पचति षड्वै ऋतव ऋतुभिरेवैनां पचति द्विः पचन्त्वित्याह तस्मात् द्विः संवत्सरस्य सस्यं पच्यते वारुण्युखा अभीद्धा मैचिया उपैति शान्त्यै देवस्त्वा सविता उद्वपत्वित्याह सवितृप्रसूत एवैनां ब्रह्मणा देवताभिरुद्वपति अपद्यमाना पृथिवि आशा दिश आ पृण ॥ ३॥

इत्याह तस्मादग्निः सर्वा दिशोऽनु वि भाति उत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वमित्याह प्रतिष्ठित्यै असूर्यं पाचमनाच्छ्रमा च्छृणत्ति देवचा अकः अजक्षीरेण आ च्छृणत्ति परमं वै एतत् पयो यदजक्षीरं परमेणैवैनां पयसि आ च्छृणत्ति यजुषा व्यावृत्यै

न्दोभिरा च्छृणत्ति छन्दोभिर्वै एषा, क्रियते छन्दो-
भरेव छन्दाꣳसि आ च्छृणत्ति* ॥ ४ ॥

आद् देवानां । वै पत्नीः । पृण । एषा । षट् च ॥
७ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे प्रथमप्रपाठके
सप्तमोऽनुवाकः ॥ ० ॥

एकविꣳशत्या माषैः पुरुषशीर्षमच्छैति अमेध्या वै
माषा अमेध्यं पुरुषशीर्षममेध्यैरेवास्य अमेध्यं निरवदाय
मेध्यं कृत्वा आहरति एकविꣳशतिर्भवति एकविꣳशो
वै पुरुषः पुरुषस्याप्त्यै व्यृद्धं वा एतत् प्राणैरमेध्यं यत्
पुरुषशीर्षꣳ सप्तधा वितृण्णां वल्मीकवपां प्रति नि
दधाति सप्त वै शीर्षण्याः प्राणाः प्राणैरेवैनत् सम-
र्धयति मेध्यत्वाय यावन्तः ॥ १ ॥

वै मृत्युबन्धवस्तेषां यम आधिपत्यं परीयाय यम-
गाथाभिः परि गायति यमादेवैनदृङ्क्ते तिसृभिः परि
गायति त्रय इमे लोका एभ्य एवैनल्लोकेभ्यो दृङ्क्ते
तस्माद् गायते न देयं गाथा हि तद् दृङ्क्तेऽग्निभ्यः

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयप्रथमप्रपाठकस्य षष्ठानुवाक-
भाष्ये द्रष्टव्यम्।

पशूनालभते कामा वै अग्नयः कामानेवाव रुन्धे यत् पशून्नालभेत अनवरुद्धा अस्य ॥ २ ॥

पशवः स्युर्यत् पर्यग्निकृतानुत्सृजेद्यज्ञवेशसं कुर्य्यात् यत् संस्थापयेत् यातयामानि शीर्षाणि स्युर्यत् पशूनालभते नैव पशूनव रुन्धे यत् पर्य्यग्निकृतानुत्सृजति शीर्ष्णामयातयामत्वाय प्राजापत्येन सꣳस्थापयति यज्ञो वै प्रजापतिर्यज्ञ एव यज्ञं प्रति ष्ठापयति प्रजापतिः प्रजा असृजत स रिरिचानोऽमन्यत स एता आप्रीरपश्यताभिर्वै स मुखतः ॥ ३ ॥

आत्मानमा प्रीणीत यदेता आप्रिया भवन्ति यज्ञो वै प्रजापतिर्यज्ञमेवैताभिर्मुखत आ प्रीणाति अपरिमितछन्दसो भवन्ति अपरिमितः प्रजापतिः प्रजापतेराप्त्यै जनातिरिक्ता मिथुनाः प्रजात्यै लोमशं वै नामैतच्छन्दः प्रजापतेः पशवो लोमशाः पशूनेवाव रुन्धे सर्वाणि वै एता रूपाणि सर्वाणि रूपाण्यग्नौ चित्ये क्रियन्ते तस्मादेता अग्नेश्चित्यस्य ॥ ४ ॥

भवन्ति एकविꣳशतिꣳ सामिधेनीरन्वाह रुग्वै एकविꣳशो रुचमेव गच्छत्यथो प्रतिष्ठामेव प्रतिष्ठा हि एकविꣳशश्चतुर्विꣳशतिमन्वाह चतुर्विꣳशतिरर्द्धमासाः संवत्सरः संवत्सरोऽग्निर्वैश्वानरः साक्षादेव वैश्वानर-

मव रुन्धे पराचीरन्वाह पराङिव हि सुवर्गो लोकः समास्त्वाग्ने ऋतवो वर्धयन्त्वित्याह समाभिरेवाग्निं वर्धयति ॥ ५ ॥

ऋतुभिः संवत्सरं विश्वा आ भाहि प्रदिशः पृथिव्या इत्याह तस्मादग्निः सर्वा दिशोऽनु वि भाति प्रत्यौहतामश्विना मृत्युमस्मादित्याह मृत्युमेवास्मादप नुदति उत्वयं तमसस्परीत्याह पाप्मा वै तमः पाप्मानमेवास्मादप हन्ति अगन्म ज्योतिरुत्तममित्याह असौ वै आदित्यो, ज्योतिरुत्तमम् आदित्यस्यैव सायुज्यं गच्छति न संवत्सरस्तिष्ठति नास्य श्रीस्तिष्ठति यस्य एताः क्रियन्ते ज्योतिष्मतीमुत्तमामन्वाह ज्योतिरेवास्मै उपरिष्टाद् दधाति सुवर्गस्य लोकस्य अनुख्यात्यै* ॥ ६ ॥

यावन्तः । अस्य । मुखतः । चित्यस्य । वर्धयति । आदित्यः । अष्टाविंशतिश्च ॥ ८ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे प्रथमप्रपाठके अष्टमोऽनुवाकः ॥०॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयप्रथमप्रपाठकस्य अष्टमानुवाकभाष्ये द्रष्टव्यम् ।

षड्भिर्दीक्षयति षड्वै ऋतव ऋतुभिरेवैनं दीक्षयति सप्तभिर्दीक्षयति सप्त छन्दाꣳसि छन्दोभिरेवैनं दीक्षयति विश्वे देवस्य नेतुरित्यनुष्टुभा उत्तमया जुहोति वाग्वै अनुष्टुप् तस्मात् प्राणानां वागुत्तमा एकस्मात् अक्षरादनातं प्रथमं पदं तस्माद् यदाचोऽनातं तस्मनुष्या उप जीवन्ति पूर्णया जुहोति पूर्णो इव हि प्रजापतिः ॥ १ ॥

प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजानाꣳ सृष्ट्यै यदृचिषि प्रहृज्याद् भूतमव रुन्धीत यदङ्कारेषु भविष्यदङ्कारेषु प्र हृणक्ति भविष्यदेवाव रुन्धे भविष्यद्धि भूयो भूताद्भ्यां प्र हृणक्ति द्विपाद् यजमानः प्रतिष्ठित्यै ब्रह्मणा वै एषा यजुषा सम्भृता यदुखा सा यद्विद्येत आर्त्तिमार्च्छेत् ॥ २ ॥

यजमानो हन्येतास्य यज्ञो मिचैतामुखान्नपेत्याह ब्रह्म वै मिचो ब्रह्मन्नेवैनां प्रति ष्ठापयति नार्त्तिमार्च्छति यजमानो नास्य यज्ञो हन्यते यदि भिद्येत तैरेव कपालैः सꣳसृजेत् सैव ततः प्रायश्चित्तिर्यो गतश्रीः स्यान्मथित्वा तस्य अव दध्याद् भूतो वै एष स स्वां ॥ ३ ॥

देवतामुपैति यो भूतिकामः स्याद् य उखायै स-

भवेत् स एव तस्य स्यादतो ह्येष सम्भवति एष वै स्वयम्भू-र्नाम भवत्येव यं कामयेत भ्रातृव्यमस्मै जनयेयमित्य-न्यतस्तस्याहृत्य अव दध्यात् साक्षादेवास्मै भ्रातृव्यं जनयति अम्बरीषादन्नकामस्य अव दध्याद् अम्बरीषे वै अन्नं म्रियते सयोन्येवान्नं ॥ ४ ॥

अव रुन्धे मुञ्जानव दधाति ऊर्वै मुञ्जा ऊर्जमेवास्मै अपि दधाति अग्निर्देवेभ्यो निलायत स क्रुमुकं प्राविशत् क्रुमुकमव दधाति यदेवास्य तच न्यक्तं तदेवाव रुन्धे आज्येन सं यौति एतद्वै अग्नेः प्रियं धाम यदाज्यं प्रियेणैवैनं धाम्ना समर्द्धयति अथो तेजसा ॥ ५ ॥

वैकङ्कतीमा दधाति भा एवाव रुन्धे शमीमयीमा दधाति शान्त्यै सीद त्वं मातुरस्या उपस्थे इति तिसृभिर्जातमुप तिष्ठते त्रय इमे लोका एषैव लोकेषु आविदं गच्छति अथो प्राणानेवात्मन् धत्ते* ॥ ६ ॥

प्रजापतिः। कृक्कृत्। स्वा। एवान्नं। तेजसा। चतुस्त्रिꣳशच्च ॥ ९ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः ॥ ० ॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयप्रथमप्रपाठकस्य नवमानुवाक-भाष्ये द्रष्टव्यम्।

न ह स्म वै पुराग्निरपरभुवृक्णं दहति तदस्मै प्रयोगः एव ऋषिरस्वदयत् यदग्ने यानि कानि चेति समिधमा दधात्यपरभुवृक्णमेवास्मै स्वदयति सर्वमस्मै स्वदते य एवं वेद औदुम्बरीमा दधाति ऊर्ग्वै उदुम्बर ऊर्जमेवास्मै अपि दधाति प्रजापतिरग्निमसृजत तꣳ सृष्टꣳ रक्षाꣳसि ॥ १ ॥

अजिघाꣳसन्त्स एतद्राक्षोघ्नमपश्यत् तेन वै स रक्षाꣳस्यपाहत यद्राक्षोघं भवत्यग्नेरेव तेन जातान् द्रक्षाꣳस्यप हन्ति आश्वत्थीमा दधाति अश्वत्थो वै वनस्पतीनाꣳ सपत्नसाहो विजित्यै वैकङ्कतीमा दधाति भा एवाव रुन्धे शमीमयीमा दधाति शान्त्यै सꣳशितं मे ब्रह्म उदेषां बाहू अतिरमित्युत्तमे औदुम्बरी ॥ २ ॥

वाचयति ब्रह्मणैव क्षत्रꣳ सꣳशयति क्षत्रेण ब्रह्म तस्माद् ब्राह्मणो राजन्यवानति अन्यं ब्राह्मणं तस्माद् राजन्यो ब्राह्मणवानति अन्यꣳ राजन्यं मृत्युर्वै एष यत् अग्निरमृतꣳ हिरण्यꣳ रुक्ममन्तर् प्रति मुञ्चतेऽमृतमेव मृत्योरन्तर्धत्ते एकविꣳशतिर्निर्वाधो भवति एकविꣳशतिर्वै देवलोका द्वादश मासाः पञ्च कृतवस्त्रय इमे लोका असावादित्यः ॥ ३ ॥

एकविꣳश एतावन्तो वै देवलोकास्तेभ्य एव भ्रातृव्य-

मन्तरेति निर्वाधैवै देवा असुरान्निर्वाधेऽकुर्वत तत् निर्वाधानां निर्वाधत्वं निर्वाधी भवति भ्रातृव्यानेव निर्वाधे कुरुते सावित्रिया प्रति मुञ्चते प्रसूत्यै नक्तोषासेत्युत्तरया अहोरात्राभ्यामेवैनमुद्यच्छते देवा अग्निं धारयन् द्रविणोदा इत्याह प्राणा वै देवा द्रविणोदा अहोरात्राभ्यामेवैनमुद्यत्य ॥ ४ ॥

प्राणैर्दाधारासीनः प्रति मुञ्चते तस्मादासीनाः प्रजाः प्र जायन्ते कृष्णाजिनमुत्तरं तेजो वै हिरण्यं ब्रह्म कृष्णाजिनं तेजसा चैवैनं ब्रह्मणा चोभयतः परि गृह्णाति षड्भिः शिक्यं भवति षड्वै ऋतव ऋतुभिरेवैनमुद्यच्छते यद् द्वादशोद्यामꣳ संवत्सरेणैव मौञ्जं भवति ऊर्ग्वै मुञ्जा ऊर्जैवैनꣳ सम्, अर्धयति सुपर्णोऽसि गरुत्मानित्यवक्षते रूपमेवास्यै एतन्महिमानं व्याचष्टे दिवं गच्छ सुवः पतेत्याह सुवर्गमेवैनं लोकं गमयति* ॥ ५ ॥

रक्षाꣳसि। औदुम्बरी। आदित्यः। उद्यत्य। सं। चतुर्विꣳशतिश्च ॥ १० ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे प्रथमप्रपाठके दशमोऽनुवाकः ॥० ॥

अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयप्रथमप्रपाठकस्य दशमानुवाकभाष्ये द्रष्टव्यम्।

समीद्धो अञ्जन्नुदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः। वाजी वहन् वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम्[१]। घृतेनाञ्जन्त्सं पथो देव-यानान् प्रजानन्वाजी अप्येतु देवान्। अनु त्वा सप्ते प्रदिशः सचन्ताꣳ स्वधामस्मै यजमानाय धेहि[२]। इडास्यासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते। अग्निष्ट्वा ॥ १० ॥

देवैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः[३]। स्तीर्णं बर्हिः सुष्टरीमा जुषाणा उरु पृथु प्रथमानं पृथिव्याम्। देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु[४]। एता उ वः सुभगा विश्वरूपा वि पक्षोभिः श्रयमाणा उदातैः। कृधाः सतीः कवषः शुम्भमाना दारो देवीः सुप्रायणा भवन्तु[५]। अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभि संविदाने। उषासा वां ॥ २ ॥

सुहिरण्ये सुशिल्ये घृतस्य योनाविह सादयामि[६]। प्रथमा वाꣳ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा। अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता[७]। आदित्यैर्नो भारती वष्टु यज्ञꣳ सरस्वती सह रुद्रैर्न आवीत्। इडा उपहूता

वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त[८]। त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायते आशुरश्वः॥

॥ ३ ॥

त्वष्टेदं विश्वं भुवनं जजान बहोः कर्त्तारमिह यक्षि होतः[९]। अश्वो घृतेन त्मन्या समक्त उप देवाꣳ ऋतुशः पाथ एतु। वनस्पतिर्देवलोकं प्रजानन् अग्निना हव्याः स्वदितानि वक्षत्[१०]। प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने। स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः[११]॥

॥ ४ ॥

अग्निष्ट्वा। वाम्। अश्वः। द्विचत्वारिꣳशच्च॥

॥ ११ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे प्रथमप्रपाठके एकादशोऽनुवाकः॥०॥

सावित्राणि। व्यृद्धम्। उत्क्राम। देवस्य—खनति। क्रूरं। वारुणः। सप्तभिः। एकविꣳशत्या। षड्भिः। न ह स्म। समीद्धो अभ्यजन्॥ एकादश॥ ११॥

सावित्राणि[१।१]। उत्क्राम[२।१]। क्रूरं[३।१]। वारुणः[४।१]।

पशवः स्युः(८२)। न ह स्म(१०१)। नवपञ्चाशत्* ॥ ॥ ५९ ॥

समाप्तः प्रथमप्रपाठकः।

॥०॥ हरिः ओम् ॥०॥

एवं हि श्रूयते, 'समिद्धो अञ्जन्कृदरं मतीनामित्यश्वस्याप्रियो भवन्ति सरूपत्वाय' इति। तत्र प्रथमाह्नयमाह,—"समिद्धो अञ्जन् कृदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः। धाजी वहन् वाजिनं जातवेदो देवानां पथि प्रियमा सधस्थम्(१)" इति। हे 'जातवेदः' 'अग्ने', 'वाजिनं' (अश्वं) 'वहन्' (वह, देवान् प्रापयेत्यर्थः)। कीदृशोऽग्निः?—'समिद्धः' (सम्यक् प्रदीप्तः), 'वाजी' (अन्नवान्, अन्नसम्पादक इत्यर्थः)। किं कुर्वन्?-'मतीनां' 'कृदरं' 'अञ्जन्', कृदरशब्दो धान्यानां आवापनं कुसूलादिकमाचष्टे, 'मतीनां' (अभिज्ञानां) 'कृदरं' (कुसूलस्थानीयं) सरूपरूपम् 'अञ्जन्' (प्रकाशयन्), 'मधुमत्' (मधुरं) 'घृतं' 'पिन्वमानः' (पिबन्), तथा देवार्थं सर्वाणि हवींषि वहन्। कीदृशं वाजिनं?-'देवानां' 'प्रियं' (प्रीतिहेतुं), 'आ'+'सधस्थं' (सर्वतः पञ्चन्तरैः सह स्थितं)। अत एवाश्वमेधकाण्डे समाम्नायते,—'आग्नेयं कृष्णग्रीवं पुरस्ताल्ललाटे' इत्यादि।

---

* प्रथमे अनुवाके ४, द्वितीये ६, तृतीये ५, चतुर्थे ५, पञ्चमे १०, षष्ठे ४, सप्तमे ४, अष्टमे ६, नवमे ६, दशमे ५, एकादशे ४ इति नवपञ्चाशत्।

अथ द्वितीयाम्नचमाह,—"घृतेनाञ्जन्त्सं पथो देवयानान् प्रजानन् वाजी अप्येतु देवान्। अनु त्वा सप्ते प्रदिशः सचन्ताꣳ स्वधामस्मै यजमानाय धेहि[२]" इति। अयं 'वाजी' 'देवान्' 'अप्येतु' (प्राप्नोतु)। किं कुर्वन्?'—घृतेन' (स्वस्योपरिभूतेनाज्येन) 'देवयानान्' 'पथः' (देवलोकस्थितान् मार्गान्) 'सं'-'अञ्जन्' (सम्यक् द्रवीकुर्वन्), 'प्रजानन्' (तेन घृतस्याञ्जनेन मार्गो यथा ज्ञायते तथा कुर्वन्)। हे 'सप्ते' (अश्व), 'प्रदिशः' (प्रकृष्टाः सर्वा दिशः) 'त्वा' (त्वाम्) 'अनु'-सृत्य 'सचन्तां' (सर्वे वेत्तारो भवन्तु*), देवप्राप्तावानुकूल्यमेव कुर्वन्तु; त्वञ्च 'अस्मै' (यजमानाय) 'स्वधां' (स्वधाकारोपलक्षितमन्नं) 'धेहि' (सम्पादय)॥

अथ तृतीयाम्नचमाह,—"ईड्यश्वासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते। अग्निष्ट्वा देवैर्वसुभिः सजोषाः प्रीतं वहिं वहतु जातवेदाः[२]" इति। हे 'वाजिन्' (अश्व), त्वम् अस्माभिः 'ईड्यश्व' (स्तोतव्यश्च), 'वन्द्यश्च' (नमस्कार्यश्च) 'असि'। हे 'सप्ते' (अश्व), 'आशुश्च' (शीघ्रगामी च), 'मेध्यश्च' (यागयोग्यश्च) 'असि'। 'जातवेदाः' 'अग्निः' 'त्वा' (त्वां) 'वहतु' (देवान् प्रापयतु)। कीदृशः 'अग्निः'? 'वसुभिः' (जगन्निवासहेतुभिः) 'देवैः' 'सजोषाः' (समानप्रीतिः)। कीदृशं त्वां?-'प्रीतं' (प्रीतिविषयं) 'वहिं' (वोढारं)॥

अथ चतुर्थीम्नचमाह,—"स्तीर्णं बर्हिः सुष्टरीमा जुषाणा उरु पृथु प्रथमानं पृथिव्याम्। देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु[४]" इति। 'अदितिः' (भूमिदेवी) 'सुविते'

* सर्वा वेत्त्री भवन्तु इति s पु० पाठः।

(शोभनप्राप्तियोग्ये) स्थाने 'दधातु' अश्वं (स्थापयतु)। कीदृशी अदितिः?- 'बर्हिः' 'जुषाणा' (दर्भं पूर्णं सेवमाना)। कीदृशं बर्हिः? 'स्तीर्णं' सङ्क्षपनायाश्वं शाययितुं (आस्तीर्णं), 'सुष्टरीम' (सुष्ठु स्तरणयोग्यं), 'पृथिव्यां' (भूमौ) 'उरु' (बहुलं) यथा भवति तथा, 'पृथु' (अतिविस्तृतं) यथा भवति तथा 'प्रथमानं' (प्रसारितं)। तथा दृषदितिः, 'देवेभिः' (सर्वैः देवैः) 'सजोषाः' (समानप्रीतिः) तथा, 'युक्तं' (योग्यं) 'शोभनं' सुखकरं (स्थानं) 'कृणवाना' (कुर्वती)॥

अथ पञ्चमीमृचमाह,—"एता उ वः सुभगा विश्वरूपा वि पक्षोभिः अयमाणा उत् आतैः। कृण्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु[५]" इति। 'एता' अपि 'द्वारो' 'देवीः' (द्वाराख्या* देव्यः) 'सुप्रायणाः' 'भवन्तु' (सुष्ठु अश्वस्य† प्रापिका भवन्तु)। कीदृश्यो देव्यः?—'वः' (युष्माकं) ऋत्विग्यजमानानां 'सुभगाः' (सौभाग्यप्रदाः), 'विश्वरूपाः' (बहुविधरूपयुक्ताः), 'आतैः'‡ (सततगमनसाधनानि वाहनानि§), 'पक्षोभिः' (पक्षस्थानीयैः) गतैः विशेषेण 'उत्'-'अयमाणाः' (ऊर्ध्वं गच्छन्त्यः) 'कृण्वाः' 'सतीः' (गमनागमनयोग्याः सत्यः), 'कवषः' (कवाटैः) 'शुम्भमानाः' (शोभमानाः); द्वाराभिमानिन्यो हि देव्यः कपाटसमीपे वर्तमानाः शोभन्ते॥

---

* 'द्वाराख्यो देव्यः' इति आदर्शपुस्तक ४ पुस्तकयोः पाठः न सम्यगिव प्रतिभाति।

† सुष्ठु अस्य अश्वस्य इति ४ पुस्तकपाठः।

‡ आता इति ४ पुस्तकपाठः।

§ एवमेव सर्वत्र पाठः। अत्र 'तैः' इति पतितम्; किं वा 'सततगमनसाधनैः वाहनैः' इत्येव पाठः।

अथ षष्ठीमृचमाह,—"अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभि संविदाने। उषासा वाꣳ सुहिरण्ये सुशिल्पे ऋतस्य योनौ इह सादयामि(१)" इति। हे 'उषासा' (उषःशब्दोपलक्षिते अहोरात्रे देवते), 'वां' (युवां) 'ऋतस्य' 'योनौ' (यज्ञस्य कारणे) 'इह' (अग्नौ) 'सादयामि' (स्थापयामि)। कीदृश्यौ अहोरात्रे देवते?—मित्रावरुणरूपे। अत एव अन्यत्राम्नातम्,—'मैत्रं वा अहर्वारुणी रात्रिः' इति। 'अन्तरा' 'चरन्ती' (ब्रह्माण्डस्य मध्ये वर्त्तमाने), 'यज्ञानां' 'मुखं' 'अभि' 'संविदाने' (यज्ञप्रारम्भम् अभिलक्ष्य परस्परमैकमत्ययुक्ते), 'सुहिरण्ये' (शोभनहिरण्यवत् सूर्यचन्द्रप्रकाशयुक्ते*) 'सुशिल्पे' (सर्वव्यवहारहेतुत्वेन शोभनैः शिल्पैरुपेते)॥

अथ सप्तमीमृचमाह,—"प्रथमा वाꣳ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा। अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता(२)" इति। हे दम्पती यजमानपत्न्यौ, 'वां' (युवयोरर्थे) 'होतारा' (देवानां मध्ये यौ होतारौ तावुभौ) 'अपिप्रयं' (प्रीणयामि)। कीदृशौ?—'प्रथमा' (प्रथमौ, मुख्यौ), 'सरथिना' (समान एको रथः, सरथः, तद्वन्तौ), 'सुवर्णा' (शोभनवर्णोपेतौ), 'देवौ' (दीप्यमानौ), 'विश्वा' 'भुवनानि' (सर्वाँल्लोकान्), 'पश्यन्तौ', 'वां' 'चोदना' 'मिमाना' (युवयोर्विहितानि कर्माणि प्रमितवन्तौ) 'प्रदिशा' (प्रकृष्टासु दिक्षु) 'ज्योतिः' 'दिशन्ता' (स्वकीयप्रकाशं प्रसारयन्तौ)॥

---

* सूर्यचन्द्र इव प्रकाशयुक्ते इति आदर्शपुस्तक N पुस्तकयोः पाठः।

अथाष्टमीमृचमाह,—"आदित्यैर्नो भारती वष्टु यज्ञꣳ सरस्वती सह रुद्रैर्न आवीत्। इडा उपह्वता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त[८]" इति। 'भारती' (भारताख्या देवी) 'आदित्यैः' 'सह' 'नः' (अस्मदीयं) 'यज्ञं' 'वष्टु'(कामयतां)। 'सरस्वती' (सरस्त्याख्या देवी) 'रुद्रैः' 'सह' 'नः' (अस्मान्) 'आवीत्' (रक्षतु)। इडाख्या देवी 'वसुभिः' 'सह' 'सजोषा' (समानप्रीतिः) 'उपह्वता' (अनुज्ञाता) सती अस्मान् अवतु। 'देवीः' (हे देव्यः), सर्वं 'नः' (अस्मदीयं) 'यज्ञम्' 'अमृतेषु' (मरणरहितेषु देवेषु) 'धत्त' (स्थापयत)॥

अथ नवमीमृचमाह,—"त्वष्टा वीरं देवकामं जजान त्वष्टुर्वा जायत आशुरश्वः। त्वष्टेदं विश्वं भुवनं जजान बहोः कर्त्तारमिह यक्षि होतः[९]" इति। 'त्वष्टा' (त्वष्टृनामको देवः) 'देवकामं' (देवान् कामयमानं) 'वीरं' (कर्मसु शूरं) पुत्रं 'जजान' (उत्पादयामास)। स 'त्वष्टुः' सकाशात् 'अर्वा' (गमनकुशलः), 'आशुः' (शीघ्रगामी) 'अश्वः' 'जायते'। किं बहुना, 'त्वष्टा' 'इदं' 'विश्वं' 'भुवनं' (सर्वमपि लोकं) 'जजान' (जनयामास)। हे 'होतः', 'बहोः' (बहुलस्य जगतः) 'कर्त्तारं' (स्रष्टारं 'इह' (अस्मिन् कर्मणि) 'यक्षि' (यज)॥

अथ दशमीमृचमाह,—"अश्वो घृतेन त्मन्या समक्त उप देवाꣳ ऋतुशः पाथ एतु। वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्याः स्वदितानि वक्षत्[१०]" इति। अयम् 'अश्वः' 'त्मन्या' (आत्मना, स्वयमेव) 'घृतेन' 'समक्तः' (घृताक्त इव रुचिकरः) सन् 'पाथः' (देवानामन्नं) भूत्वा 'ऋतुशः' (तत्तदृतुकाले) 'देवान्' 'उप'-'एतु' (प्राप्नोतु)। 'वनस्पतिः' (एतन्नामको देवः) 'देवलोकं' 'प्रजानन्' (प्रकर्षेणावगच्छन्)

'अग्निना' सह 'खदितानि' 'हव्याः' (खादुभूतानि हवींषि) 'वहन्' (वहतु, देवान् प्रापयतु) ॥

अथैकादशमन्त्रमाह,—"प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने। स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः[११]" इति। हे 'अग्ने', त्वं 'प्रजापतेः' (जगदीश्वरस्य) 'तपसा' (पर्यालोचनेन) 'वावृधानः' (वर्द्धमानः), त्वं 'जातः' (उत्पन्नमात्रः) 'सद्यः' (तदानीमेव) 'यज्ञं' 'दधिषे'(धारयसि)। 'स्वाहाकृतेन' (स्वाहाकारसमर्पितेन) 'हविषा' सह 'पुरोगाः' (अग्रतो गच्छन्) 'याहि' (देवान् प्राप्नुहि)। 'साध्याः' अस्माभिः (साधनीयाः पूजनीयाः) 'देवाः' इदम् अस्माभिः समर्पितं हविः 'अदन्तु' (भक्षयन्तु) ॥

अत्र विनियोगसंग्रहः,—

'समिद्धः'—इत्याप्रियः स्तुरश्चैकादशोदिताः ॥
वेदार्थस्य प्रकाशेन तमो हार्दं विनाशयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे प्रथमप्रपाठके एकादशोऽनुवाकः ॥०॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायनाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामकतैत्तिरीययजुःसंहिताभाष्ये पञ्चमकाण्डे प्रथमः प्रपाठकः सम्पूर्णः ॥०॥

॥०॥ ॐ तत्सत् ॥०॥

॥•॥ श्रीगणेशाय नमः ॥•॥

अथ तैत्तिरीयसंहिताभाष्ये

पञ्चमकाण्डे द्वितीयप्रपाठके

प्रथमोऽनुवाकः ।

विष्णुमुखा वै देवाश्छन्दोभिरिमाँल्लोकानानपजय्य-मभ्यजयन् यद्विष्णुक्रमान् क्रमते विष्णुरेव भूत्वा यजमानश्छन्दोभिरिमाँल्लोकानानपजय्यमभि जयति विष्णोः क्रमोऽस्यभिमाति हेत्याह गायत्री वै पृथिवी त्रैष्टुभमन्तरिक्षं जागती द्यौरानुष्टुभीर्दिशश्छन्दोभिरेव इमाँल्लोकान् यथापूर्वमभि जयति प्रजापतिरग्निमसृजत सोऽस्मात् सृष्टः ॥ १ ॥

पराङ् ऐत्तमेतयाऽग्निदक्रन्ददिति तया वै सोऽग्नेः प्रियं धामावारुन्ध यदेतामन्वाह अग्नेरेवैतया प्रियं धामाव रुन्धे ईश्वरो वै एष पराङ् प्रदघो यो विष्णुक्रमान् क्रमते चतसृभिरा वर्त्तते चत्वारि छन्दाꣳसि छन्दाꣳसि खलु वै अग्नेः प्रिया तनूः प्रियामेवास्य तनुवमभि ॥ २ ॥

पर्यावर्त्तते दक्षिणा पर्यावर्त्तते स्वमेव वीर्यमनु पर्यावर्त्तते तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवावृतमनु पर्यावर्त्तते पुनःश्येपमाजीगर्त्तिं वरुणोऽगृह्णात् स एतां वारुणीमपश्यत् तया वै स आत्मानं वरुणपाशादमुञ्चद् वरुणो वै एतं गृह्णाति य उखां प्रतिमुञ्चते उदुत्तमं वरुणपाशमस्मदित्याह आत्मानमेवैतया ॥ ३ ॥

वरुणपाशात् मुञ्चते आ त्वाऽहार्षमित्याह आ ह्येनꣳ हरति ध्रुवस्तिष्ठ अविचाचलिरित्याह प्रतिष्ठित्यै विशस्त्वा सर्वा वाञ्छन्त्वित्याह विशैवैनꣳ समर्द्धयति अस्मिन् राष्ट्रमधि श्रयेत्याह राष्ट्रमेवास्मिन् ध्रुवमकः यं कामयेत राष्ट्रꣳ स्यादिति तं मनसा ध्यायेद् राष्ट्रमेव भवति ॥ ४ ॥

अग्ने बृहन्नुषसामूर्ध्वो अस्थादित्याहाग्रमेवैनꣳ समानानां* करोति निर्जग्मिवां तमस इत्याह तम एव अस्मादप हन्ति ज्योतिषा आ-अगादित्याह ज्योतिरेवास्मिन् दधाति चतसृभिः सादयति चत्वारि छन्दाꣳसि छन्दोभिरेव अतिछन्दसोत्तमया वर्ष्म वै एषा छन्दसां यदतिछन्दा वर्ष्मैवैनꣳ समानानां करोति सद्वती ॥ ५ ॥

* 'समानां' इति आदर्शपुस्तकपाठः। एवं परत्रापि।

भवति सुखमेवैनं गमयति वात्सप्रेणोप तिष्ठते एतेन वै वत्सप्रीर्भालन्दनोऽग्नेः प्रियं धाम अव अरुन्ध अग्नेरेवैतेन प्रियं धाम अव रुन्धे एकादृशं भवति एकधैव यजमाने वीर्यं दधाति स्तोमेन वै देवा अस्मिन् लोके आर्भ्नुवन् छन्दोभिरमुष्मिन्त्स्तोमस्येव खलु वै एतद्रूपं यद्वात्सप्रं यद्वात्सप्रेणोपतिष्ठते ॥ ६ ॥

इममेव तेन लोकमभि जयति यद्विष्णुक्रमान् क्रमतेऽमुमेव तैर्लोकमभि जयति पूर्वेद्युः प्र क्रामति उत्तरेद्युरुप तिष्ठते तस्माद्योगेऽन्यासां प्रजानां मनः क्षेमेऽन्यासां तस्माद्यायावरः क्षेम्यस्य ईशे तस्माद्यायावरः क्षेम्यमध्यवस्यति मुष्टीकरोति वाचं यच्छति यज्ञस्य धृत्यै* ॥ ७ ॥

सृष्टः। अभि। एतया। भवति। सद्वती। उपतिष्ठते। द्विचत्वारिꣳशच्च ॥ १ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे द्वितीयप्रपाठके प्रथमोऽनुवाकः ॥ ० ॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयद्वितीयप्रपाठकस्य प्रथमद्वितीयानुवाकभाष्ये द्रष्टव्यम्।

श्रीगणेशाय नमः ॥

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
उख्याग्निः प्रथमे प्रोक्तो द्वितीये चित्युपक्रमः ।
द्वादशानुवाका सुरासन्द्यां वक्ष्यवस्थितिः ॥
वात्मप्रेणाप्युपस्थानं प्रथमे समुदीरितं ।
द्वितीये तूखनयनं गार्हपत्यं चिनोति हि ॥
तृतीये तु चतुर्थे तु उख्याग्निं तच्च संवपेत् ।
पञ्चमे क्षपति चेचं षष्ठेऽच सिकतादिकं ॥
वपेद्रुक्माद्युपादध्यात् सप्तमे चाष्टमे पुनः ।
स्थापयेत् स्वयमातृण्णामुखादीन्नवमे तथा ॥
अपस्याश्च प्राणभृतः तथोपानभृतश्चितौ ।
प्रथमायामुपादध्याद् दशमे तत्समीरितम् ॥
एकादशद्वादशौ तु विज्ञेयावाश्वमेधिकौ ।
अश्वस्याभिपथाः कल्प्या गायत्रीत्यादिमन्त्रकैः ॥
कस्त्वेत्यभिपथेर्हित्वा त्वचमालभ्यतो द्वयम् ।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे द्वितीयप्रपाठके प्रथमोऽनुवाकः ॥०॥

अन्नपतेऽन्नस्य नो देहीत्याह अग्निर्वै अन्नपतिः स एवास्मै अन्नं प्र यच्छति अनमीवस्य शुष्मिण इत्याह अयक्ष्मस्येति वावैतदाह प्र प्रदातारं तारिषऽ ऊर्जं नो धेहि द्विपदे चतुष्पदे इत्याह आशिषमेवैतामा शास्ते उद् उ त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः ॥ १ ॥

प्राणैरेवैनमुद्यच्छतेऽग्ने भरन्तु चित्तिभिरित्याह यस्मै एवैनं चित्ताय उद्यच्छते तेनैवैनꣳ समर्द्धयति चतसृभिरा सादयति चत्वारि छन्दाꣳसि छन्दोभिरेवातिछन्दसा उत्तमया वर्ष्म वै एषा छन्दसां यदतिछन्दा, वर्ष्मैवैनꣳ समानानां करोति सद्वती भवति सत्त्वमेवैनं गमयति प्रेदग्ने ज्योतिष्मान् ॥ २ ॥

याहीत्याह ज्योतिरेवास्मिन् दधाति तनुवा वै एष हिनस्ति यꣳ हिनस्ति मा हिꣳसीस्तनुवा प्रजा इत्याह प्रजाभ्य एवैनꣳ शमयति रक्षाꣳसि वै एतद्यज्ञꣳ सचन्ते यदनः उत्सर्जति अक्रन्ददित्याह रक्षसामपहत्यै अनसा वहन्ति अपचितिमेवास्मिन् दधाति तस्माद् अनस्वी च रथी च अतिथीनामपचिततमौ ॥ ३ ॥

अपचितिमान् भवति य एवं वेद समिधाऽग्निं दुवस्यतेति घृतानुषिक्तामवसिते समिधम् आ दधाति यथाऽतिथये आगताय सर्पिष्वदातिथ्यं क्रियते तादृगेव

तन्नायचिया ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य चैष्टुभो हि राजन्योऽप्सु भस्म प्र वेशयति अप्सुयोनिर्वा अग्निः स्वामेवैनं योनिं गमयति तिस्रभिः प्र वेशयति चित्पदै ॥ ४ ॥

अग्निर्यावानेवाग्निस्तं प्रतिष्ठां गमयति परा वै एषोऽग्निं वपति योऽप्सु भस्म प्रवेशयति ज्योतिष्मतीभ्या-मव दधाति ज्योतिरेवास्मिन् दधाति द्वाभ्यां प्रतिष्ठित्यै परा वा एष प्रजां पशून् वपति योऽप्सु भस्म प्रवेशयति पुनरूर्जा सह रय्येति पुनरुदैति प्रजामेव पशूनात्मन् धत्ते पुनस्त्वादित्याः ॥ ५ ॥

रुद्रा वसवः समिंधतामित्याह एता वै एतं देवता अग्ने समैंधत ताभिरेवैनꣳ समिंधे बोधा सः बोधी-त्युप तिष्ठते बोधयत्येवैनं तस्मात् सुप्ताः प्रजाः प्र-बुध्यन्ते यथास्थानमुप तिष्ठते तस्माद्यथास्थानं पशवः पुनरेत्योपतिष्ठन्ते* ॥ ६ ॥

वै विश्वे देवाः। ज्योतिष्मान्। अपचिततमौ। चित्पदै। आदित्याः। द्विचत्वारिꣳशच्च ॥ २ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे द्वितीयप्रपाठके द्वितीयोऽनुवाकः ॥०॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयद्वितीयप्रपाठकस्य तृतीयानुवाक-भाष्ये द्रष्टव्यम्।

यावती वै पृथिवी तस्यै यम आधिपत्यं परीयाय यो वै यमं देवयजनमस्याः अनिर्याच्याग्निं चिनुते यमायैनꣳ स चिनुते अप इत इत्यध्वसाययति यममेव देवयजनमस्मै निर्याच्यात्मन्नेऽग्निं चिनुते इषमूर्जꣳ वै अस्याः अन्नाम्रतमिच्छन्तो नाविन्दन्ते देवा एतद्यजुरपश्यन् अप इत इति यदेतेनाध्वसाययति ॥ १ ॥

अन्नामृत एवाग्निं चिनुते उद्वन्ति यदेवास्याः अमेध्यं तदप हन्ति अपोऽवोक्षति शान्त्यैः सिकता नि वपत्येतद्वै अग्नेर्वैश्वानरस्य रूपꣳ रूपेणैव वैश्वानरमव रुन्धे जघान् नि वपति पुष्टिर्वै एषा प्रजननं यदूषाः पुष्ट्यामेव प्रजननेऽग्निं चिनुते ऽथो सꣳज्ञाने एव सꣳज्ञानꣳ ह्येतत् ॥ २ ॥

पशूनां यदूषाः द्यावापृथिवी सहास्तां ते वियती अब्रूतामस्त्वेव नौ सह यन्नियमिति यदमुष्या यन्नियमासीत्तदस्यामदधात् ते जघाः अभवन् यदस्या यन्नियमासीत्तदमुष्यामदधात्तददश्चन्द्रमसि कृष्णमूषान्निवपन्नदो ध्यायेद् द्यावापृथिव्योरेव यन्नियेऽग्निं चिनुते ऽयꣳ सो अग्निरिति विश्वामित्रस्य ॥ ३ ॥

रूक्षं भवत्येतेन वै विश्वामित्रोऽग्नेः प्रियं धाम अव अरुन्ध अग्नेरेवैतेन प्रियं धामाव रुन्धे छन्दोभिर्वै

देवाः सुवर्गं लोकमायन् चतस्रः प्राचीरुपं दधाति चत्वारि छन्दाꣳसि छन्दोभिरेव तद्यजमानः सुवर्गं लोकमेति तेषाꣳ सुवर्गं लोकं यतां दिशः समबलीयन्त ते द्वे पुरस्तात् समीची उपादधत द्वे ॥ ४ ॥

पश्चात् समीची ताभिर्वै ते दिशोऽहꣳहन् यत् द्वे पुरस्तात् समीची उपदधाति द्वे पश्चात् समीची दिशां विधृत्यै अथो पशवो वै छन्दाꣳसि पशूनेवास्मै समीची दधाति अष्टावुप दधाति अष्टाक्षरा गायत्री गायत्रो-ऽग्निर्यावानेवाग्निस्तं चिनुतेऽष्टावुप दधाति अष्टाक्षरा गायत्री गायत्री सुवर्गं लोकमश्नुते वेद सुवर्गस्य लोकस्य ॥ ५ ॥

प्रज्ञात्यै चयोदश लोकंपृणा उप दधाति एकविꣳश-तिः सम्पद्यन्ते प्रतिष्ठा वै एकविꣳशः प्रतिष्ठा गार्हपत्यः एकविꣳशस्यैव प्रतिष्ठां गार्हपत्यमनु प्रति तिष्ठति प्रत्यग्निं चिक्यानस्तिष्ठति य एवं वेद पञ्च चितीकं चिन्वीत प्रथमं चिन्वानः पांक्तो यज्ञः। पांक्ताः पशवो यज्ञमेव पशूनव रुन्धे चिचितीकं चिन्वीत द्वितीयं चिन्वानस्त्रय इमे लोका एषवे लोकेषु ॥ ६ ॥

प्रति तिष्ठति एकचितीकं चिन्वीत तृतीयं चिन्वानः एकधा वै सुवर्गो लोक एकतस्तेव सुवर्गं लोकमेति

पुरीषेणाभ्यूहति तस्मान्नाꣳसेनास्थि छुन्नं न दुश्चर्मा भवति य एवं वेद पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति दश सम्पद्यन्ते दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रति तिष्ठति* ॥ ७ ॥

अध्यवसाययति। ह्येतत्। विश्वामित्रस्य। आदधत द्वे। लोकस्य। लोकेषु। सप्तचत्वारिꣳशच्च ॥ ३ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे द्वितीयप्रपाठके तृतीयोऽनुवाकः ॥०॥

वि वै एतौ द्विषाते यश्च पुराग्निर्यश्चोखायाꣳ सꣳमितमिति चतसृभिः सन्नि वपति चत्वारि छन्दाꣳसि छन्दाꣳसि खलु वै अग्नेः प्रिया तनूः प्रिययैवैनौ तनुवा सꣳ शास्ति समितिमित्याह तस्मात् ब्रह्मणा क्षुचꣳ समेति यत् सन्मुष्यं विहरति तस्मात् ब्रह्मणा क्षुचं व्येति ऋतुभिः ॥ १ ॥

वै एतं दीक्षयन्ति स ऋतुभिरेव विमुचो मातेव पुत्रं पृथिवी पुरीष्यमित्याह ऋतुभिरेवैनं दीक्षयित्वा ऋतुभिर्वि मुञ्चति वैश्वानर्यां शिक्मा दत्ते स्वदयत्येवैनत् नैर्ऋतीः कृष्णास्तिस्रस्तुषपक्वा भवन्ति निर्ऋत्यै

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयद्वितीयप्रपाठकस्य चतुर्थानुवाकभाष्ये द्रष्टव्यम्।

वै एतद्भागधेयं यत्तुषाः निर्ऋत्यै रूपं कृष्णꣳ रूपेणैव निर्ऋतिं निरवदयते दृमां दिशं यन्त्येषा ॥ २ ॥

वै निर्ऋत्यै दिक् स्वायामेव दिशि निर्ऋतिं निरवदयते स्वकृते इरिणे उप दधाति प्रदरे वैतद्वै निर्ऋत्याः आयतनꣳ स्वे एवायतने निर्ऋतिं निरवदयते शिक्यमभ्युप दधाति नैर्ऋतो वै पाशः साक्षादेवैनं निर्ऋतिपाशात् मुञ्चति तिस्र उप दधाति चेधाविहितो वै पुरुषो यावानेव पुरुषस्तस्मात् निर्ऋतिमव यजते पराचीरुप ॥ ३ ॥

दधाति पराचीमेवास्मात् निर्ऋतिं प्र णुदते ऽप्रतीक्षम् आ यन्ति निर्ऋत्याः अन्तर्हित्यै मार्जयित्वोप तिष्ठन्ते मेध्यत्वाय गार्हपत्यमुप तिष्ठन्ते निर्ऋतिलोके एव चरित्वा पूता देवलोकमुपावर्त्तन्ते एकयोप तिष्ठन्ते एकधैव यजमाने वीर्यं दधति निवेशनः सङ्गमनो वसूनामित्याह प्रजा वै पशवो वसु प्रजयैवैनं पशुभिः समर्धयन्ति* ॥ ४ ॥

कृतुभिः। एषा। पराचीरुप। अष्टाचत्वारिꣳशच्च॥ ४॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे द्वितीयप्रपाठके चतुर्थोऽनुवाकः ॥०॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयद्वितीयप्रपाठकस्य पञ्चमानुवाकभाष्ये द्रष्टव्यम्।

पुरुषमात्रेण वि मिमीते यज्ञेन वै पुरुषः सम्मितो यज्ञपुरुषेवैनं वि मिमीते यावान् पुरुष ऊर्द्ध्वबाहुस्तावान् भवति एतावद्वै पुरुषे वीर्य्यं वीर्य्येणैवैनं वि मिमीते पक्षी भवति न हि अपक्षः पतितुमर्हति अरत्निना पक्षौ द्राघीयांसौ भवतस्तस्मात्-पक्षप्रवयांसि वयांसि व्याममात्रौ पक्षौ च पुच्छञ्च भवति एतावद्वै पुरुषे वीर्य्यं ॥ १ ॥

वीर्य्यसम्मितो वेणुना वि मिमीते आग्नेयो वै वेणुः सयोनित्वाय यजुषा युनक्ति यजुषा क्षपति व्यावृत्त्यै षड्गवेन क्षपति षड्वा ऋतवः ऋतुभिरेवैनं क्षपति यद् द्वादशगवेन संवत्सरेणैव दृयं वै अग्नेरतिदाहादबिभेत् सा एतद्द्विगुणमपश्यत् क्रुष्ट्वाक्रुष्टञ्च ततो वै द्रुमां न अत्यदहत् यत्क्रुष्ट्वाक्रुष्टञ्च ॥ २ ॥

भवत्यस्या अनतिदाहाय द्विगुणं त्वा* अग्निमुद्यन्तुमर्हतीत्याहुर्यत् क्रुष्ट्वाक्रुष्टञ्च भवति अग्नेरुद्यत्यै एतावन्तो वै पशवो द्विपादश्च चतुष्पादश्च तान् यत् प्राच उत्सृजेत् रुद्रायापि दध्याद् यद्दक्षिणा पितृभ्यो निधुवेत् यत् प्रतीचो रक्षाꣳसि हन्युरुदीच उत्सृजति एष वै देवमनुष्याणाꣳ शान्ता दिक् ॥ ३ ॥

---

*- 'तु वै' इति पदपाठपाठः।

तामेवैनान् अनु उत्सृजति अथो खल्विमां दिशम् उत्सृजति असौ वै आदित्यः प्राणः प्राणमेवैनान् अनु उत्सृजति दक्षिणा पर्यावर्त्तन्ते स्वमेव वीर्यमनु पर्यावर्त्तन्ते तस्मादक्षिणोऽर्द्ध आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवावृतमनु पर्यावर्त्तन्ते तस्मात् पराच्यः पशवो वि तिष्ठन्ते प्रत्यञ्च आ वर्त्तन्ते तिस्रस्तिस्रः सीताः ॥ ४ ॥

कृषति चिदृतमेव यज्ञमुखे वि यातयत्योषधीर्वपति ब्रह्मणा अन्नमव रुन्धेऽकैर्कश्चीयते चतुर्दशभिर्वपति सप्त ग्राम्या ओषधयः सप्तारण्या उभयीषामवरुध्यै अन्नस्यान्नस्य वपति अन्नस्यान्नस्यावरुध्यै कृष्टे वपति कृष्टे हि ओषधयः प्रतितिष्ठन्ति अनुसीतं वपति प्रजात्यै द्वादशसु सीतासु वपति द्वादश मासाः संवत्सरः संवत्सरेणैवास्मै अन्नं पचति यदग्निचित् ॥ ५ ॥

अनवरुद्धस्य अश्नीयादवरुद्धेन व्यृध्येत ये वनस्पतीनां फलग्रहयस्तानिध्मोऽपि प्रोक्षेदनवरुद्धस्य अवरुध्यै दिग्भ्यो लोष्टान्त्समस्यति दिशामेव वीर्यमवरुध्य दिशां वीर्येऽग्निं चिनुते यं द्विष्याद् यच्च स स्यात् तस्यै दिशो लोष्टमाहरेत् इषमूर्जमहमित आ ददे इति इषमेवोर्जं तस्यै दिशोऽव, रुन्धे क्षोधुको भवति यस्तस्यां दिशि

भवति उत्तरवेदिमुप वपति उत्तरवेद्याꣳ हि अग्नि-श्चीयते अथो पशवो वै उत्तरवेदिः पशूनेवाव रुन्धे अथो यज्ञपुरुषोऽनन्तरित्यै* ॥ ६ ॥

च भवति एतावद्वै पुरुषे वीर्यं। यत् कृष्टश्चाकृष्टश्च। दिक्। सीताः। अग्निचित्। अव। पञ्चविꣳशतिश्चे ॥५॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे द्वितीयप्रपाठके पञ्चमोऽनुवाकः ॥०॥

अग्ने तव श्रवो वय इति सिकता नि वपति एतद्वै अग्नेर्वैश्वानरस्य सूक्तꣳ सूक्तेनैव वैश्वानरमव रुन्धे षड्भिर्नि वपति षड्वा ऋतवः संवत्सरः संवत्सरोऽग्निर्वैश्वानरः साक्षादेव वैश्वानरमव रुन्धे समुद्रं वै नाम एतच्छन्दः समुद्रमनु प्रजाः प्र जायन्ते यदेतेन सिकता निवपति प्रजानां प्रजननायेन्द्रः ॥ १ ॥

वृचाय वज्रं प्राहरत् स चेधा व्यभवत् स्फ्यस्तृतीयꣳ रथस्तृतीयं यूपस्तृतीयं येऽन्तःशरा अशीर्यन्त ताः शर्करा अभवन् तच्छर्कराणाꣳ शर्करत्वं वज्रो वै शर्कराः पशुरग्नियच्छर्कराभिरग्निं परिमिनोति वज्रेणैव

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयद्वितीयप्रपाठकस्य पञ्चमषष्ठ-सप्तमानुवाक-भाष्ये द्रष्टव्यम्।

अस्मै पशून् परि गृह्णाति तस्माद् वज्रेण पशवः परिगृहीतास्तस्मात् स्थेयानस्थेयसो नोप हरते चिसम्नाभिः पशुकामस्य ॥ २ ॥

परि मिनुयात् सप्त वै शीर्षण्याः प्राणाः प्राणाः पशवः प्राणैरेवास्मै पशूनव रुन्धे चिणवाभिर्भ्रातृव्यवतस्त्वृतमेव वज्रꣳ सम्भृत्य भ्रातृव्याय प्र हरति स्तृत्यै अपरिमिताभिः परि मिनुयादपरिमितस्यावरुध्यै यं कामयेतापशुः स्यादित्यपरिमित्य तस्य शकराः सिकता व्यूहेत् अपरिगृहीत एवास्य विषूचीनꣳ रेतः परा सिञ्चति अपशुरेव भवति ॥ ३ ॥

यं कामयेत पशुमान्त्स्यादिति परिमित्य तस्य शकराः सिकता व्यूहेत् परिगृहीत एवास्मै समीचीनꣳ रेतः सिञ्चति पशुमानेव भवति सौम्या व्यूहति सोमो वै रेतोधा रेत एव तद्दधाति गायत्रिया ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्यः शुंयुं वार्हस्पत्यं मेधो नोपानमत् सोऽग्निं प्राविशत् ॥४॥

सोऽग्नेः कृष्णो रूपं कृत्वोदायत सोऽश्वं प्राविशत् सोऽश्वस्यावान्तरशफोऽभवत् यदश्वमाक्रमयति य एव मेधोऽश्वं प्राविशत् तमेवाव रुन्धे प्रजापतिनाग्निश्चेतव्य इत्याहुः प्राजापत्योऽश्वो यदश्वमाक्रमयति प्रजापतिनैव

अग्निं चिनुते पुष्करपर्णमुप दधाति योनिर्वै अग्नेः पुष्करपर्णꣳ सयोनिम् एवाग्निं चिनुतेऽपां पृष्ठमसीत्युप दधाति अपां वै एतत् पृष्ठं यत् पुष्करपर्णꣳ रूपेणैव एनदुप दधाति* ॥ ५ ॥

इन्द्रः। पशुकामस्य। भवति। अविशत्। सयोनिं। विꣳशतिश्च ॥ ६ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे द्वितीयप्रपाठके षष्ठोऽनुवाकः ॥ ० ॥

ब्रह्म जज्ञानमिति रुक्ममुप दधाति ब्रह्ममुखा वै प्रजापतिः प्रजा असृजत ब्रह्ममुखा एव तत् प्रजा यजमानः सृजते ब्रह्म जज्ञानमित्याह तस्माद् ब्राह्मणो मुख्यो मुख्यो भवति य एवं वेद ब्रह्मवादिनो वदन्ति न पृथिव्यां नान्तरिक्षे न दिव्यग्निश्चेतव्य इति यत पृथिव्यां चिन्वीत पृथिवीꣳ शुचार्पयेत् नौषधयो न वनस्पतयः ॥ १ ॥

प्र जायेरन् यदन्तरिक्षे चिन्वीत अन्तरिक्षꣳ शुच अर्पयेत् न वपाꣳसि प्र जायेरन् यद्दिवि चिन्वीत दिवः

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयद्वितीयप्रपाठकस्य सप्तमाष्टमानुवाकभाष्ये द्रष्टव्यम्।

शुचा अर्पयेत् न पर्जन्यो वर्षेद् रुक्ममुप दधाति अमृतं वै हिरण्यममृते एवाग्निं चिनुते प्रजात्यै हिरण्मयं पुरुषमुप दधाति यजमानलोकस्य विधृत्यै यदिष्टकाया आतृण्णमनूपदध्यात् पशूनाच्छ यजमानस्य च प्राणमपि दध्याद्दक्षिणतः ॥ २ ॥

प्राच्छमुप दधाति दाधार यजमानलोकं न पशूनाच्छ यजमानस्य च प्राणमपि दधाति अथो खल्विष्टकाया आतृण्णमनूप दधाति प्राणानामुत्सृष्ट्यै द्रप्सः चस्कन्देत्यभि मृशति हो चासु एवैनं प्रति ष्ठापयति स्रुचावुप दधात्याज्यस्य पूर्णां कार्ष्मर्यमयीं द्रप्सः पूर्णामौदुम्बरीम् इयं वै कार्ष्मर्यमयी असावौदुम्बरी इमे एवोप धत्ते ॥ ३ ॥

तूष्णीमुप दधाति न हीमे यजुषानुमन्त्रयन्ति दक्षिणां कार्ष्मर्यमयीमुत्तरामौदुम्बरीं तस्मादस्या असावुत्तरा आज्यस्य पूर्णां कार्ष्मर्यमयीं वज्रो वै आज्यं वज्रः कार्ष्मर्यो वज्रेणैव यज्ञस्य दक्षिणतो रक्षाꣳस्यप हन्ति द्रप्सः पूर्णामौदुम्बरीं पशवो वै दधि ऊर्क् उदुम्बरः पशुष्वेवोर्जं दधाति पूर्णे उप दधाति पूर्णे एवैनꣳ ॥ ४ ॥

अमुष्मिँल्लोक उप तिष्ठते विराजि अग्निश्चेतव्य इत्याहुः स्रुग्वै विराट् यत् स्रुचावुपदधाति विराजि

एवाग्निं चिनुते यज्ञमुखे यज्ञमुखे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति यज्ञमुखꣳ रुक्मो यद् रुक्मं व्याघारयति यज्ञमुखादेव रक्षाꣳस्यप हन्ति पञ्चभि-र्व्याघारयति पांक्तो यज्ञो यावानेव यज्ञस्तस्माद् रक्षाꣳस्यप हन्ति अक्ष्णया व्याघारयति तस्मादक्ष्णया, पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै* ॥ ५ ॥

वनस्पतयः। दक्षिणतः। धत्ते। एवैनं। तस्माद-क्ष्णया। पञ्च च ॥ ७ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे द्वितीयप्रपाठके सप्तमोऽनुवाकः ॥ ० ॥

स्वयमातृण्णामुप दधाति इयं वै स्वयमातृण्णेमामेव उप धत्तेऽग्निमुप घ्रापयति प्राणमेवास्यां दधाति अथो प्राजापत्यो वै अश्वः प्रजापतिनैवाग्निं चिनुते प्रथमे-ष्टकोपधीयमाना पशूनाञ्च यजमानस्य च प्राणमपि दधाति स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्यै अथो सुवर्गस्य लोकस्यानुख्यात्यै अग्नावग्निश्चेतव्य इत्याहु-रेष वै ॥ १ ॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयद्वितीयप्रपाठकस्य अष्टम-नवमानुवाकभाष्ये द्रष्टव्यम्।

अग्निर्वैश्वानरो यद् ब्राह्मणस्तस्मै प्रथमामिष्टकां यजुष्कृतां प्रयच्छेत् तां ब्राह्मणश्चोपदध्याताम्नावेव तद्ग्निं चिनुत ईश्वरो वा एष आर्तिमार्च्छोयोऽविद्वानिष्टकाम् उप दधाति चीन् वरान् दद्यात् चयो वै प्राणाः प्राणानाꣳ स्मृत्यै द्वावेव देयौ द्वौ हि प्राणावेक एव देय एको हि प्राणः पशुः ॥ २ ॥

वा एष यद्ग्निं न खलु वै पशव आयवसे रमन्ते दूर्वेष्टकामुप दधाति पशूनां धृत्यै द्वाभ्यां प्रतिष्ठित्यै काण्डात् काण्डात् प्ररोहन्तीत्याह काण्डेन काण्डेन ह्येषा प्रतितिष्ठति एवा नो दूर्वे प्र तनु सहस्रेण शतेन चेत्याह साहस्रः प्रजापतिः प्रजापतेराप्त्यै देवलक्ष्मं वै व्यालिखिता तामुत्तरलक्ष्माणं देवा उप आ दधत अधरलक्ष्माणमसुरा यं ॥ ३ ॥

कामयेत वसीयान्त्स्यादित्युत्तरलक्ष्माणं तस्योप दध्याद्वसीयानेव भवति यं कामयेत पापीयान्त्स्यादित्यधरलक्ष्माणं तस्योप दध्यादसुरयोनिमेवैनमनु परा भावयति पापीयान् भवति व्यालिखिता भवति द्वे वै लोकास्त्र्यालिखितैभ्य एव लोकेभ्यो भ्रातृव्यमन्तरेति प्रजिरसः सुवर्गं लोकं यतः पुरोडाशः कूर्मो भूत्वाऽनु प्रासर्पत् ॥ ४ ॥

यत् कूर्ममुप दधाति यथा क्षेचविदञ्जसा नयत्येव-मेवैनं कूर्मः सुवर्गं लोकमञ्जसा नयति मेधो वा एष पशूनां यत् कूर्मो यंत् कूर्ममुपदधाति स्वमेव मेधं पश्यन्तः पशव उप तिष्ठन्ते श्मशानं वा एतत् क्रियते यन्मृतानां पशूनाꣳ शीर्षाण्युपधीयन्ते यज्जीवन्तं कूर्म-मुपदधाति तेनाश्मशानचिद्वास्तव्यो वा एष यत् ॥ ५ ॥

कूर्मो मधु वाता ऋतायत इति दध्ना मधुमिश्रेणाभ्य-नक्ति स्वदयत्येवैनं ग्राम्यं वा एतदन्नं यद्ध्यारण्यं मधु यद्ध्ना मधुमिश्रेणाभ्यनक्ति उभयस्यावरुध्यै मही द्यौः पृथिवी च न इत्याह आभ्यामेवैनमुभयतः परि गृह्णाति प्राञ्चमुप दधाति सुवर्गस्य लोकस्य समष्ट्यै पुरस्तात् प्रत्यञ्चमुप दधाति तस्मात् ॥ ६ ॥

पुरस्तात् प्रत्यञ्चः पशवो मेधमुप तिष्ठन्ते यो वा अप-नाभिमग्निं चिनुते यजमानस्य नाभिमनु प्र विशति स एनमीश्वरो हिꣳसितोरुलूखलमुप दधात्येषा वा अग्ने-र्नाभिः सनाभिमेवाग्निं चिनुतेऽहिꣳसायै औदुम्बरं भवत्युर्वा उदुंबर ऊर्जमेवाव रुन्धे मध्यत उप दधाति मध्यत एवास्मै ऊर्जं दधाति तस्मात् मध्यत ऊर्जा भुञ्जते द्वयङ्गवति प्रजापतिना यज्ञमुखेन सम्मितमव हन्त्यन्नमेवाकर्वैष्णव्या ऋचा उप दधाति विष्णुर्वै यज्ञो

वैष्णवा वनस्पतयो यज्ञ एव यज्ञं प्रति ष्ठापयति* ॥ ७॥

एष वै। पशुः। अयं। सर्पत्। एष यत्। तस्मात्। सप्तविꣳतिश्च ॥ ८ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे द्वितीयप्रपाठके अष्टमोऽनुवाकः ॥०॥

एषां वा एतल्लोकानां ज्योतिः सम्भृतं यदुखा यदुखामुपदधात्येभ्य एव लोकेभ्यो ज्योतिरव रुन्धे मध्यत उप दधाति मध्यत एवास्मै ज्योतिर्दधाति तस्मात् मध्यतो ज्योतिरुपास्महे सिकताभिः पूरयत्येतद्वा अग्नेर्वैश्वानरस्य रूपꣳ रूपेणैव वैश्वानरमव रुन्धे यं कामयेत क्षोधुकः स्यादित्यूनां तस्योप ॥ १ ॥

दध्यात् क्षोधुक एव भवति यं कामयेतानुपदस्यत् अन्नमद्यादिति पूर्णां तस्योप दध्यादनुपदस्यदेवान्नमत्ति सहस्रं वै प्रति पुरुषः पशूनां यच्छति सहस्रमन्ये पशवो मध्ये पुरुषशीर्षमुप दधाति सवीर्यत्वायोखायामपि दधाति प्रतिष्ठामेवैनन्नमयति व्यृद्धं वा एतत्प्राणैरमेध्यं यत् पुरुषशीर्षममृतं खलु वै प्राणाः ॥ २ ॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयद्वितीयप्रपाठकस्य नवमानुवाकभाष्ये द्रष्टव्यम्।

प्राचीरुप दधाति पश्चादै प्राचीनꣳ रेतो धीयते पश्चादेवास्मै प्राचीनꣳ रेतो दधाति पञ्च पुरस्तात् प्रतीचीरुप दधाति पञ्च पश्चात् प्राचीस्तस्मात् प्राचीनꣳ रेतो धीयते प्रतीचीः प्रजा जायन्ते पञ्चोत्तरतश्छन्दस्याः पशवो वै छन्दस्याः पशूनेव प्रजातान्त्स्वमायतनमभि पर्यूहते दृयं वा अग्नेरतिदाहादबिभेत् सैताः ॥ २ ॥

अपस्या अपश्यत् ता उपाधत्त तनो वा इमान्नात्यदहद् यदपस्या उपदधात्यस्या अनतिदाहायोवाच हेयमदृ इत् स ब्रह्मणाऽन्नं यस्यैता उपधीयान्तै य उ चैना एवं वेदादितिं प्राणभृत उप दधाति रेतस्येव प्राणान् दधाति तस्माद्दन् प्राणन् पश्यन् शृण्वन् पशुर्जायतेऽयं पुरः ॥ ३ ॥

भुव इति पुरस्तादुप दधाति प्राणमेवैताभिर्दाधारायं दक्षिणा विश्वकर्मेति दक्षिणतो मन एवैताभिर्दाधारायं पश्चाद्विश्वव्यचा इति पश्चाच्चक्षुरेवैताभिर्दाधारेदमुत्तरात् सुवरित्युत्तरतः श्रोत्रमेवैताभिर्दाधारेयमुपरि मतिरित्युपरिष्टाद्वाचमेवैताभिर्दाधार दश दशोप दधाति स वीर्यत्वायाक्षण्या ॥ ४ ॥

उप दधाति तस्मादक्षण्या पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै याः प्राचीस्ताभिर्वसिष्ठ आर्धोत् या दक्षिणा

ताभिर्भरद्वाजो याः प्रतीचिस्ताभिर्विश्वामित्रो या उदीचीस्ताभिर्जमदग्निर्या ऊर्ध्वास्ताभिर्विश्वकर्मा य एवमेतासामृद्धिं वेदर्ध्नोत्येव य आसामेवं बन्धुतां वेद बन्धुमान् भवति य आसामेवं कृप्तिं वेद कल्पते॥५॥

अस्मै य आसामेवमायतनं वेदायतनवान् भवति य आसामेवं प्रतिष्ठां वेद प्रत्येव तिष्ठति प्राणभृत उपधाय संयत उप दधाति प्राणानेवास्मिन्धित्वा संयद्भिः सं यच्छति तत् संयताꣳ संयत्त्वमथो प्राण एवापानं दधाति तस्मात् प्राणापानौ सं चरतो विषूचीरूपं दधाति तस्मादिषंचौ प्राणापानौ यदै अग्नेः संयतम्॥ ६॥

असुवर्ग्यमस्य तत् सुवर्ग्योऽग्नियत् संयत उप दधाति समेवैनं यच्छति सुवर्ग्यमेवाकस्त्यविर्वयः कृतमयानामित्याह वयोभिरवायानव रुन्धे अयैर्वयाꣳसि सर्वतो वायुमतीर्भवन्ति तस्मादयꣳ सर्वतः पवते* ॥ ७॥

पश्चात्। एताः। पुरः। अक्षण्या। कल्पते। संयतम्। पञ्चचिंशच्च ॥१०॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे द्वितीयप्रपाठके दशमोऽनुवाकः॥ ०॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयद्वतीयप्रपाठकस्य प्रथमद्वितीयद्वतीयानुवाकभाष्ये द्रष्टव्यम्।

गायत्री चिष्टुप् जगत्यनुष्टुप् पंक्त्या सह। बृहत्युष्णिहा ककुत् सूचीभिः शिम्यन्तु त्वा(१)। द्विपदा या चतुष्पदा त्रिपदा या च षट्पदा। सच्छन्दा या च विच्छन्दाः सूचीभिः शिम्यन्तु त्वा(२)। मह्नामग्नेरेवतयो विश्वा आशाः प्रसूवरीः। मेध्या विद्युतो वाचः सूचीभिः शिम्यन्तु त्वा(१)। रजता हरिणीः सीसा युजो युज्यन्ते कर्मभिः। अश्वस्य वाजिनस्त्वचि सूचीभिः शिम्यन्तु त्वा(२)। नारीः॥ १॥

ते पत्नयो लोम वि चिन्वन्तु मनीषया। देवानां पत्नीर्दिशः सूचिभिः शिम्यन्तु त्वा(१)। कुविदङ्ग यवमन्तो यवंचिद्यथा दान्त्यनुपूर्वं वियूय। इहेहैषां कृणुत भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः(२)॥ २॥

नारीः। त्रिंशच्च॥ ११॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे द्वितीयप्रपाठके एकादशोऽनुवाकः॥०॥

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥
उख्याग्निः प्रथमे प्रोक्तो द्वितीये चित्युपक्रमः।
द्वादशाचानुवाका स्युरासन्द्यां वह्नयवस्थितिः॥
वात्मप्रेणाप्युपस्थानं प्रथमे समुदीरितम्।
द्वितीये त्वख्यनयनं गार्हपत्यं चिनोति हि॥

तृतीये तु चतुर्थे तु उल्खाग्निं तच्च संचयेत्।
पञ्चमे क्षपति क्षेत्रं षष्ठेऽच्च सिकतादिकम्॥
चयेद्, दक्षाद्युपादध्यात् सप्तमे, चाष्टमे पुनः।
स्थापयेत् स्वयमाहृत्यासुखादीन्नवमे तथा॥
अपस्याश्च प्राणभृतः तथोपानभृतश्चितौ।
प्रथमायामुपादध्यात् दशमे तत्समीरितम्॥
एकादशद्वादशौ तु विज्ञेयावाश्वमेधिकौ।
अश्वस्याभिपथाः कल्प्या गायत्रीत्यादिमन्त्रकैः॥
कल्प्येत्यभिपथे क्षिप्त्वा त्वरमाक्रम्यतो द्वयम्*।

कल्पः,—'गायत्री त्रिष्टुबिति द्वाभ्यां सौवर्णीभिः सूचीभिः† महिषी अश्वस्याभिपथान् कल्पयति प्राक् क्रोडात्' इति। राज्ञः पत्न्यः त्रिविधाः,—उत्तमा मध्यमा अधमा चेति, ताश्च, महिषी वावाता परिवृक्तीत्येतन्नामधेयाः, ताश्च मृतस्याश्वस्याभिना क्रोदनाय तत्तत्-स्थानेषु रेखाः सूचीभिः कुर्युः।

तत्र महिष्याः प्रथमामृचमाह,—"गायत्री त्रिष्टुप् जगती अनुष्टुप् पङ्क्त्या सह। बृहती उष्णिहा ककुत् सूचीभिः शिम्यन्तु त्वा(१)" इति। गायत्र्यादिककुदन्तैः शब्दैः अभिधेयाः छन्दोदेवताः, हे अश्व, त्वां सौवर्णसूचीभिः 'शिम्यन्तु' लिखन्तु।

अथ द्वितीयामृचमाह,—"द्विपदा या चतुष्पदा त्रिपदा या च

---

* "कल्पेत्यभिपथेऽश्वस्याक्षेत्रं क्षप्यतो द्वयम्" (!) इति आदर्शपुस्तक-पाठः।

† "सूचितसूचीभिः" इति आदर्शपुस्तके पाठः।

षट्पदा। सच्छन्दा या च विछदाः सूचीभिः शिम्यन्तु त्वा[१]" इति। द्विपदादिरूपाणां मन्त्राणामभिमानिन्यः तन्नामिका देवताः त्वां सूचीभिः 'शिम्यन्तु' लिखन्तु।

कल्पः,—'एवमुत्तराभ्यां राजतीभिर्वावाता प्रत्यक् क्रोडात् प्राङ् नाभेः' इति। यथा महिषी क्रोडात् प्राचीने सुखभागे लिखति, एवं वावाता क्रोडनाभ्योर्मध्ये अनन्तरभाविना मन्त्रद्वयेन लिखेत्।

तत्र प्रथमामृचमाह,-"महानाम्नी रेवतयो विश्वा आशाः प्रसूवरीः। मेध्या विद्युतो वाचः सूचीभिः शिम्यन्तु त्वा[१]" इति। महत् प्रोढं,-देवेषु अत्यन्तं प्रसिद्धं, नाम यासां देवतानां ता महानाम्न्यः, एतन्नामधेयाः काश्चिद्देवताः, तथा, 'रेवतयः' धनवत्यः एतन्नामिका देवताः, तथा, 'प्रसूवरीः' सर्वप्रसवहेतुभूताः, 'विश्वा आशाः' सर्वा दिशः दिग्देवताः, तथा, मेघेषु भवा 'मेध्याः' विद्युदभिमानिन्यो देवताः, तथा, 'वाचः' गर्जनाभिमानिन्यो देवताः, हे अश्व, त्वां राजतीभिः 'सूचीभिः शिम्यन्तु'।

अथ द्वितीयामृचमाह,—"रजता हरिणीः सीसा युजो युज्यन्ते कर्मभिः। अश्वस्य वाजिनस्त्वचि सूचीभिः शिम्यन्तु त्वा[१]" इति। 'रजताः' रौप्याः, 'हरिणीः' हिरण्मय्याः, 'सीसाः' लोहमय्याः, 'युजः' लेखनकर्मयोग्याः सूच्यः, अत एव 'वाजिनः' अन्नहेतोः 'अश्वस्य' 'त्वचि', कर्मभिः लेखनादिव्यापारैः 'युज्यन्ते', तादृशीभिः सूचीभिः, हे अश्व, त्वां लेखनकुशला देवताः 'शिम्यन्तु'।

कल्पः,—'एवमुत्तराभ्यां लौहीभिः सीसाभिर्वा परिलिखतीति शेषम्' इति।

तत्र प्रथमामृचमाह,—"नारीस्ते पत्नयो लोम वि चिक्रन्तु मनीषया। देवानां पत्नीर्दिशः सूचीभिः शिम्यन्तु त्वा(१)" इति। हे अश्व, 'नारीः' महिष्यादयो नार्यः, 'पत्नयः' राजपत्न्यः ताः, 'मनीषया' स्वबुद्ध्या, लोमानि 'वि'-'चिक्रन्तु' अविपथमिद्धये त्वदीयं लोमजातम् अपनयन्तु पृथक् कुर्वन्तु। तथा 'देवानां पत्नीः' "सेनेन्द्रस्य (आ० १ प्र० ९ अ०)" इत्यास्यनुवाकोक्ता देवपत्न्यः, तथा, 'दिशः' दिग्देवताः, 'सूचीभिः' सौहीभिः एताभिः त्वां 'शिम्यन्तु'।

अथ द्वितीयामृचमाह,—"कुविदङ्ग यवमन्तो यवञ्चिद्यथा दान्त्यनुपूर्वं वि-यूय। इहेहैषां कृणुत भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः(२)" इति। अङ्गशब्दः प्रियसम्बोधनवाची,* हे प्रियाः, अश्वमेधहविर्भाजो देवाः, ये यज्वानः, 'बर्हिषः' यागस्य 'नमोवृक्तिं' नमस्कारविनाशनं 'न जग्मुः' न प्रापुः, किन्तु अत्यन्तश्रद्धालवोऽनुतिष्ठन्ति, तेषाम् 'एषां' यज्वनां हविर्विषयाणि 'भोजनानि' 'इहेह' 'कृणुत', यज्ञानामेकैकत्वे† वीप्सा। तत्रोपमानमुच्यते,—कुविच्छब्दो बहुर्थवाची, चिच्छब्दः समुच्चये, यथा लोके 'यवमन्तः' यवादिधान्योपेताः कृषिकाः 'कुवित्' 'चित्' 'यवं' बहुलं यवं अन्यानि च गोधूमप्रियङ्ग्वादिधान्यानि, 'अनुपूर्वं' तत्तत्परिपाकानुक्रमेण 'वि-यूय' इदं पक्वमिदमपक्वमिति विशेषेण पृथक्कृत्य, 'दान्ति' लुनन्ति, तथा यूयमपि, नमस्कारादिरहितः नास्तिकोऽयं यज्वा, श्रद्धालुरयं यज्वेति विविच्य श्रद्धालोर्हवींषि भुङ्ध्वम्॥

---

* 'प्रियासम्बोधनवाची' इति आदर्शपुस्तकपाठः।

† 'एकैकत्वं वीप्सा' इति आदर्शपुस्तकपाठः।

अथ विनियोगसंग्रहः,—

गाय,—द्वाभ्यान्तु मह्विषी, वावाता तु मह्वा,-द्वयात्।
परिह्वृणी तु ना,-द्वाभ्यां कल्पयेयुरसेः पथः ॥

इति श्रीसायनाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे द्वितीयप्रपाठके एकादशोऽनुवाकः ॥०॥

कल्त्वा ह्यति कल्त्वा वि शास्ति कस्ते गाचाणि शिम्यति। क उं ते शमिता कविः(१)। कृतवस्ते कृतुधा पर्वः शमितारो वि शासतु। संवत्सरस्य धायसा शिमीभिः शिम्यन्तु त्वा(२)। दैव्या अध्वर्यवस्त्वा ह्यन्तु वि च शासतु। गाचाणि पर्वशस्ते शिमाः कल्पन्तु शिम्यन्तः(३)। अर्धमासाः परू॑ꣳसि ते मासाःकल्पन्तु शिम्यन्तः। अहोरात्राणि मरुतो विलिष्टं ॥ १ ॥

ह्रदयन्तु ते(४)। पृथिवी तेऽन्तरिक्षेण वायुस्छिद्रं भिषज्यतु। द्यौस्ते नक्षत्रैः सह रूपं कृणोतु साधुया(५)। शं ते परेभ्यो गात्रेभ्यः शमस्त्ववरेभ्यः। शमस्थभ्यो मज्जभ्यः शमु ते तनुवे भुवत्(६) ॥ २ ॥

विलिष्टं। छिꣳशच्च ॥ १२ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे द्वितीयप्रपाठके द्वादशोऽनुवाकः ॥०॥

विष्णुमुखा। अन्नपते। यावती। वि वै। पुरुषमाधेण। अग्ने तव श्रवो वायो। ब्रह्म जज्ञानः। स्वयमातृण्णाम्। एषां वै। पशुः। गायत्री। कस्त्वा। द्वादश ॥ ॥ १२ ॥

विष्णुमुखा(१।१)। अपचितिमान् (२।४)। वि वा एतौ (४।१)। अग्ने तव (६।१)। स्वयमातृण्णां (८।१)। विषूचीनानि (९।४)। गायत्री (११।१)। चतुःषष्टिः ॥ ॥ ६४ ॥ २॥

इति तैत्तिरीयसंहितायां पञ्चमाष्टके द्वितीयः प्रश्नः ॥

॥ ० ॥ हरिः ओम् ॥ ० ॥

एकादशानुवाके सूचीभिरसिपथा कृन्तिरभिहिता*। अथ द्वादशे विशसनमुच्यते।

कस्यः,—'कस्त्वा छ्यति कस्त्वा विश्रास्तीत्यस्य त्वचमाच्छ्यति' इति। तस्मिन्ननुवाके प्रथमामृचमाह,—"कस्त्वा छ्यति कस्त्वा वि श्रास्ति कस्ते गात्राणि श्रिम्यति। क उ ते श्रमिता कविः(१)" इति। हे अश्व, त्वां 'कः' प्रजापतिः "छ्यति' छिनत्ति, छित्वा च अनन्तरं 'कः' प्रजापतिरेव त्वां 'वि श्रास्ति' त्वदवयवान् विभज्य स्थापयतिः, ततः 'कः' प्रजापतिरेव 'ते गात्राणि' अवयवान् 'श्रिम्यति' श्रमयति, सुरक्षितानि करोतीत्यर्थः। 'कविः' विद्वान् अनर्थज्ञः छेदनाभिज्ञः

---

* 'असिएथक्कृन्तिरभिहिता' इतिः का० औ० पाठः।

'क' 'उ' प्रजापतिरेव 'ते' तव 'ग्रमिता' न तु इतरपशुवदन्यः कश्चिन्मनुष्यः।

द्वितीयामृचमाह,—"ऋतवस्ते ऋतुधा पर्वः ग्रमितारो वि ग्रासतु। संवत्सरस्य धायसा ग्रिमीभिः ग्रिम्यन्तु त्वा(२)" इति। 'ऋतवो' वसन्तादयो देवाः, 'ग्रमितारो' भूत्वा, 'ऋतुधा' तत्तदृतुकाले 'ते' 'पर्वः' त्वदीयं पर्व 'वि ग्रासतु' विविधं स्थापयन्तु। 'संवत्सरस्य धायसा' धारणेन 'ग्रिमीभिः' ग्रमनहेतुभिः क्रियाभिः 'त्वा' त्वां 'ग्रिम्यन्तु' ग्रमयन्तु, ऋतुदेवा एव संवत्सरधारकाः सन्तः तत्तत्कालोचितव्यापारैः त्वां देवयोग्यं कुर्वन्त्वित्यर्थः॥

तृतीयामृचमाह,—"दैव्या अध्वर्यवस्त्वा छन्तु वि ग्रासतु। गात्राणि पर्वशस्ते ग्रिमाः छण्वन्तु ग्रिम्यन्तः(३)" इति। देवेषु भवाः 'दैव्याः' 'अध्वर्यवो' ग्रुप्रभृतयः, 'द्यौरध्वर्युः अग्निावध्वर्यू सत्यहविरध्वर्युः' इति श्रुतेः। तादृग्राः सर्वे त्वां 'छन्तु' ग्रस्त्रेण छिदन्तु, किञ्च, 'वि ग्रासतु' विविधं स्थापयन्तु। 'ग्रिमाः' ग्रमनहेतवः सन्तः 'ते' 'गात्राणि' त्वदीयान् अवयवान् 'पर्वशः' तत्तत्पर्वानुसारेण 'ग्रिम्यन्तः' ग्रमयन्तः रचन्तः 'छण्वन्तु' तत्र-तत्रोचितं व्यापारं कुर्वन्तु।

चतुर्थीमृचमाह,—"अर्धमासाः परूंषि ते मासाम्छ्यन्तु ग्रिम्यन्तः। अहोरात्राणि मरुतो विलिष्टꣳ सदयन्तु ते(४)" इति। 'अर्धमासाः' 'मासाः' च देवाः 'ते' 'परूंषि' 'ग्रिम्यन्तः' ग्रमयन्तो रचन्तः 'छन्तु' छिन्दन्तु। तथा, 'अहोरात्राणि' तदभिमानिनी देवता 'मरुतः' च 'ते' सर्वेऽपि 'विलिष्टं' विनाग्रितमङ्गं 'सदयन्तु' खादु कुर्वन्तु॥

पञ्चमीमृचमाह,—"पृथिवी अग्नरिक्षेण वायुम्छिद्रं भिषज्यतु।

द्यौस्ते नक्षत्रैः सह रूपं कृणोतु साधुया"(५) इति । हे अश्व, 'ते' 'छिद्रं' त्वदीयं विनष्टम् अङ्गम्, 'अन्तरिक्षेण' सहिता 'पृथिवी' 'भिषज्यतु' समादधातु, 'वायुः' च 'भिषज्यतु' । इयं 'द्यौः' 'नक्षत्रैः' सहिता 'ते' 'रूपं' त्वदीयं स्वरूपभूतमिदं हविः 'साधुया' साधु समीचीनं यथा भवति, तथा 'कृणोतु' करोतु ।

षष्ठीमृचमाह,—"अश्वे परेभ्यो गात्रेभ्यः अमस्त्ववरेभ्यः । अमस्त्यभ्यो मज्जभ्यः अमु ते तनुवे भुवत्(६)" इति । हे अश्व, ते 'तव' 'परेभ्यः' 'गात्रेभ्यः' उत्कृष्टेभ्योऽवयवेभ्यः, 'अं' सुखं अस्तु ; तथा 'अवरेभ्यः' निकृष्टेभ्यः अवयवेभ्यः 'अमस्तु' । तथा 'अस्थभ्यः' त्वदीयेभ्योऽस्थिभ्यः, 'मज्जभ्यः' च 'अम्' अस्तु । तथा 'ते' 'तनुवे' शरीराय 'अमु' 'भुवत्' सुखमेव भवतु ॥

अत्र विनियोगसंग्रहः—

कस्त्वेति मन्त्रषट्केन ह्यश्वस्य त्वचमाच्छति ॥
वेदार्थस्य प्रकाशेन तमो हार्दं विनाशयन् ।
पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे द्वितीयप्रपाठके द्वादशोऽनुवाकः ॥०॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्क-भूपालसाम्राज्यधुरन्धरेण सायनाचार्येण विरचिते माधवीये वेदार्थ-प्रकाशनामकतैत्तिरीययजुःसंहिताभाष्ये पञ्चमकाण्डे द्वितीयः प्रपाठकः सम्पूर्णः ॥०॥

॥ ॐ तत्सत् ॥०॥

॥ • ॥ श्रीगणेशाय: नमः ॥ • ॥

अथ तैत्तिरीयसंहिताभाष्ये

पञ्चमकाण्डे तृतीयप्रपाठके

प्रथमोऽनुवाकः ।

उत्सन्नयज्ञो वा एष यदग्निः किं वा अस्यैतस्य क्रियते किं वा न यदै यज्ञस्य क्रियमाणस्यान्तर्यन्ति पूर्यति वै अस्य तदाश्विनीरुप दधात्यश्विनौ वै देवानां भिषजौ ताभ्यामेवास्मै भेषजं करोति पञ्चोप दधाति पाङ्क्तो यज्ञो यावानेव यज्ञस्तस्मै भेषजं करोत्यृतव्या उप दधात्यृतूनां कॢप्त्यै ॥ १ ॥

पञ्चोप दधाति पञ्च वै ऋतवो यावन्त एव ऋतवस्तान् कल्पयति समानप्रभृतयो भवन्ति समानोदर्कास्तस्मात् समाना ऋतव एकेन पदेन व्यावर्तन्ते तस्माद्ऋतवो व्यावर्तन्ते प्राणभृत उपदधात्यृतुष्वेव प्राणान् दधाति तस्मात् समानाः सन्त ऋतवो न जीर्यन्त्यथो प्र जनयत्येवैनानेष वै वायुर्यत् प्राणो यद्दृतव्या उपधाय प्राणभृतः ॥ २ ॥

उपदधाति तस्मात् सर्वान्ऋतूननु वायुरा वरीवर्त्ति वृष्टिसनीरुप दधाति वृष्टिमेवाव रुन्धे यदेकधोपदध्या-देकमृतुं वर्षेदनुपरिहारꣳ सादयति तस्मात् सर्वान्ऋतून् वर्षति यत् प्राणभृत उपधाय वृष्टिसनीरुपदधाति तस्माद् वायुप्रच्युता दिवो वृष्टिरीर्त्ते पशवो वै वयस्या नानामनसः खलु वै पशवो नानाव्रतास्तेऽप एवाभि समनसः ॥ ३ ॥

यङ्कामयेतापशुः स्यादिति वयस्यास्तस्योपधाय ऋपश्या उप दध्यादसँज्ञानमेवास्मै पशुभिः करोत्यपशु-रेव भवति यङ्कामयेत पशुमान्त्स्यादित्यपस्यास्तस्योप-धाय वयस्या उप दध्यात् संज्ञानमेवास्मै पशुभिः करोति पशुमानेव भवति चतसः पुरस्तादुप दधाति तस्माच्चत्वारि चक्षुषो रूपाणि द्वे शुक्ले द्वे कृष्णे ॥ ४ ॥

मूर्द्धन्वतीर्भवन्ति तस्मात् पुरस्तान् मूर्द्धा पञ्च दक्षिणा-याः श्रोण्यामुप दधाति पञ्चोत्तरस्यां तस्मात् पश्चाद् वर्यीषान् पुरस्तात् प्रवणः पशुर्वस्तो वय इति दक्षिणे-ऽꣳसे उप दधाति वृष्णिर्वय इत्युत्तरेऽꣳसावेव प्रति दधाति व्याघ्रो वय इति दक्षिणे पक्ष उप दधाति सिꣳहो वय

दृत्युत्तरे पक्षयोरेव वीर्यं दधाति पुरुषो वय दृति, मध्ये तस्मात् पुरुषः पशूनामधिपतिः ॥ ५ ॥*

कृत्यै। उपधाय प्राणभृतः। समनसः। कृष्णे। पुरुषो वय दृति। पञ्च च ॥ १ ॥

दृति तैत्तिरीयसंहितायां पञ्चमकाण्डे तृतीयप्रपाठके प्रथमोऽनुवाकः ॥ ० ॥

इन्द्राग्नी अव्यथमानामिति स्वयमातृण्णामुप दधातीन्द्राग्निभ्यां वा इमौ लोकौ विधृतावनयोर्लोकयोर्विधृत्यै अधृतेव वा एषा यन्मध्यमा चितिरन्तरिक्षमिव वा एषेन्द्राग्नी इत्याहेन्द्राग्नी वै देवानामोजोभृतावोजसैव एनामन्तरिक्षे चिनुते धृत्यै स्वयमातृण्णामुप दधात्यन्तरिक्षं वै स्वयमातृण्णाऽन्तरिक्षमेवोप धत्तेऽश्वमुप ॥ १ ॥

आपयति प्राणमेवास्यां दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाग्निं चिनुते स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्यै अथो सुवर्गस्य लोकस्यानुख्यात्यै देवानां सुवर्गं लोकं यतां दिशः समकीयन्त त एता

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयतृतीयप्रपाठकस्य चतुर्थपञ्चमानुवाकभाष्ये द्रष्टव्यम्।

दिशो अपश्यन् ता उपादधत ताभिर्वै ते दिशोऽहꣳहन् यद्दिश्या उपदधाति दिशां विधृत्यै दश प्राणभृतः पुरस्तादुप ॥ २॥

दधाति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेव पुरस्ताद् धत्ते तस्मात् पुरस्तात् प्राणा ज्योतिष्मतीमुत्तमामुप दधाति तस्मात् प्राणानां वाग्ज्योतिरुत्तमा दशोप दधाति दशाक्षरा विराड्विराट् छन्दसां ज्योतिर्ज्योतिरेव पुरस्ताद् धत्ते तस्मात् पुरस्ताद्ज्योतिरुपास्महे छन्दाꣳसि पशुषाजिमयुस्तान् बृहत्युदजयत् तस्माद् बार्हताः ॥ ३ ॥

पशवो उच्यन्ते मा छन्द इति दक्षिणत उप दधाति तस्माद्दक्षिणार्धतो मासाः पृथिवी छन्द इति पश्चात् प्रतिष्ठित्यै अग्निर्देवतेत्युत्तरत ओजो वा अग्निरोज एवोत्तरतो धत्ते तस्मादुत्तरतोऽभिप्रयायी जयति षट्त्रिꣳशत् सम्पद्यन्ते षट्त्रिꣳशदक्षरा बृहती बार्हताः पशवो बृहत्यैवास्मै पशूनव रुन्धे बृहती छन्दसाꣳ स्वाराज्यं परीयाय यस्यैताः ॥ ४ ॥

उपधीयन्ते गच्छन्ति स्वाराज्यं सप्त वाखिल्याः पुरस्तादुप दधाति सप्त पश्चात् सप्त वै शीर्षण्याः प्राणा द्वावधस्ताद्यौ प्राणानाꣳ सवीर्यत्वाय मूर्द्धासि राडिति

पुरस्तादुपं दधाति यन्नी राडिति पश्चात् प्राणानेव अस्मै समीचो दधाति ॥ ५ ॥*

अश्वमुपं । पुरस्तादुप । बाहंताः । एता । चतुस्त्रिंशच्च ॥ २ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे तृतीयप्रपाठके द्वितीयोऽनुवाकः ॥ ० ॥

देवा वै यज्ञे अकुर्वत तदसुरा अकुर्वत ते देवा एता अक्षण्यास्तोमीया अपश्यन् ता अन्यथाऽनूच्यान्यथोपादधत तदसुरा नाभ्यवायन् ततो देवा अभवन् पराऽसुरा यदक्षण्यास्तोमीया अन्यथाऽनूच्यान्यथोपदधाति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्याशुस्त्रिवृदिति पुरस्तादुप दधाति यज्ञमुखं वै त्रिवृत् ॥ १ ॥

यज्ञमुखमेव पुरस्ताद्धि यातयति व्योम सप्तदश इति दक्षिणतोऽन्नं वै व्योम अन्नꣳ सप्तदशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते धरुण एकविꣳश इति पश्चात् प्रतिष्ठा वा एकविꣳशः प्रतिष्ठित्यै भान्तः पञ्चदश इत्युत्तरत ओजो वै भान्तः ओजः पञ्चदश ओज

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयतृतीयप्रपाठकस्य षष्ठसप्तमानुवाकभाष्ये द्रष्टव्यम्।

दुत्तरतो धत्ते तस्मादुत्तरतोऽभिप्रयायी जयति प्रतूर्तिरष्टादश इति पुरस्तात् ॥ २ ॥

उप दधाति द्वौ चिष्टावभिपूर्वं यज्ञमुखे वि यातयति अभिवर्तः सविंश इति दक्षिणतोऽन्नं वा अभिवर्तोऽन्नं सविंशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते वर्चो द्वाविंश इति पश्चाद्द्विंशतिर्वै तेन विराजौ यद्वै प्रतिष्ठा तेन विराजोरेवाभिपूर्वमन्नाद्ये प्रति तिष्ठति तपो नवदश इत्युत्तरतस्तस्मात् सव्यः ॥ ३ ॥

इस्तयोस्तपस्वितरो योनिश्चतुर्विंश इति पुरस्तादुप दधाति चतुर्विंशत्यक्षरा गायत्री गायत्री यज्ञमुखं यज्ञमुखमेव पुरस्ताद् वि यातयति गर्भाः पञ्चविंश इति दक्षिणतोऽन्नं वै गर्भा अन्नं पञ्चविंशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते त्रैजस्त्रिणव इति पश्चादिमे वै लोकास्त्रिणव एषेव लोकेषु प्रति तिष्ठति सम्भरणस्त्रयोविंश इति ॥ ४ ॥

उत्तरतस्तस्मात् सव्यो इस्तयोः सम्भार्यतरः क्रतुरेकविंश इति पुरस्तादुप दधाति वाग्वै क्रतुर्यज्ञमुखं वाग्यज्ञमुखमेव पुरस्ताद्वि यातयति ब्रह्मस्य विष्टपं चतुस्त्रिंश इति दक्षिणतोऽसौ वा आदित्यो ब्रह्मस्य विष्टपं ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद्दक्षिणोऽर्धो ब्रह्म-

वसुसित्तरः प्रतिष्ठा चयस्त्रिꣳश इति पश्चात् प्रतिष्ठित्यै नाकः षट्त्रिꣳश इत्युत्तरतः सुवर्गो वै, लोको नाकः सुवर्गस्य लोकस्य समष्ट्यै ॥ ५ ॥*

वै चित्रत्। इति पुरस्तात्। सप्तः। चयोविꣳश इति। सुवर्गो वै। पञ्च च ॥ ३ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे तृतीयप्रपाठके तृतीयोऽनुवाकः ॥०॥

अग्नेर्भागोऽसीति पुरस्तादुप दधाति यज्ञमुखं वा अग्नियज्ञमुखं दीक्षा यज्ञमुखं ब्रह्म यज्ञमुखं चित्रद्यज्ञमुखमेव पुरस्ताद्धि यातयति नृचक्षसां भागोऽसीति दक्षिणतः श्रोत्रावꣳसो वै नृचक्षसोऽन्नं धाता ज्ञातायैव अस्मै अन्नमपि दधाति तस्माज्ज्ञातोऽन्नमत्ति जनिचꣳस्तृतꣳ सप्तदशस्तोम इत्याहान्नं वै जनिचꣳ ॥ १ ॥

अन्नꣳ सप्तदशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेन अन्नमद्यते मित्रस्य भागोऽसीति पश्चात् प्राणो वै मित्रोऽपानो वरुणः प्राणापानावेवास्मिन् दधाति दिवो वृष्टिर्वाताः स्तृता एकविꣳशस्तोम इत्याह प्रतिष्ठा वा

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयतृतीयप्रपाठकस्य अष्टमानुवाकभाष्ये द्रष्टव्यम्।

एकविꣳशः प्रतिष्ठित्यै इन्द्रस्य भागोऽसीत्युत्तरत ओजो वा इन्द्र ओजो विष्णुरोजः क्षत्रमोजः पञ्चदशः ॥ ॥ २ ॥

ओज एवोत्तरतो धत्ते तस्मादुत्तरतोऽभिप्रयायी जयति बह्वीनां भागोऽसीति पुरस्तादुप दधाति यज्ञमुखं वै वसवो यज्ञमुखं रुद्रा यज्ञमुखं चतुर्विꣳशो यज्ञमुखमेव पुरस्तादि यातयति आदित्यानां भागोऽसीति दक्षिणतोऽन्नं वा आदित्या अन्नं मरुतोऽन्नं गर्भा अन्नं पञ्चविꣳशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनाऽन्नमद्यते अदित्यै भागः ॥ ३ ॥

असीति पश्चात् प्रतिष्ठा वा अदितिः प्रतिष्ठा पूषा प्रतिष्ठा विष्णवः प्रतिष्ठित्यै देवस्य सवितुर्भागोऽसीत्युत्तरतो ब्रह्म वै देवः सविता ब्रह्म बृहस्पतिर्ब्रह्म चतुष्टोमो ब्रह्मवर्चसमेवोत्तरतो धत्ते तस्मादुत्तरोऽर्द्धो ब्रह्मवर्चसितरः साविचवतो भवति प्रसूत्यै तस्माद्ब्राह्मणानामुदीची सनिः प्रसूता धर्चश्चतुष्टोम इति पुरस्तादुप दधाति यज्ञमुखं वै धर्चः ॥ ४ ॥

यज्ञमुखं चतुष्टोमो यज्ञमुखमेव पुरस्तादि यातयति यावानां भागोऽसीति दक्षिणतो मासा वै यावा अर्द्धमासा यावास्तस्माद्दक्षिणार्द्धतो मासा अन्नं वै यावा

अन्नं प्रजा अन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्न-मद्यते क्रूराणां भागोऽसीति पश्चात् प्रतिष्ठित्यै विवर्त्तो-ऽष्टाचत्वारिꣳश इत्युत्तरतोऽन्नयोर्लोकयोः सवीर्यत्वाय तस्मादिमौ लोकौ समावद्वीर्यौ ॥ ५ ॥

यस्य मुखवतीः पुरस्तादुपदधीयन्ते मुख एव भवति आ अस्य मुखो जायते यस्याऽन्नवतीर्दक्षिणतोऽन्यन्नम् आ अस्यान्नादो जायते यस्य प्रतिष्ठावतीः पश्चात् प्रेत्येव तिष्ठति यस्यौजस्वतीरुत्तरत ओजस्येव भवति आ अस्यौजस्वी जायतेऽर्को वा एष यद्ग्निस्तस्यैतदेव स्तोममेतत् शस्त्रं यदेषा विधा ॥ ६ ॥

विधीयतेऽर्क एव तद्वयमनु वि धीयतेऽन्यन्नम् आ अस्यान्नादो जायते यस्यैषा विधा विधीयते य उ चैनामेवं वेद सृष्टीरुप दधाति यथासृष्टमेव अव रुन्धे न वा इदं दिवा न नक्तमासीदव्यावृत्तं ते देवा एता व्युष्टीरपश्यन् ता उपादधत ततो वा इदं व्यौच्छत् यस्यैता उपधीयन्ते वि एवास्मै उच्छत्यथो तम एवापहते ॥ ७* ॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयषष्ठतीयप्रपाठकस्य नवमदशमैका-दशानुवाकभाष्ये द्रष्टव्यम्।

वै जनित्रꣳ। पञ्चदशः। अदित्यै भागः। वै धर्त्रः। समावद्वीर्यौ। विधा। ततो वा इदं। चतुर्दश च॥ ४॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे तृतीयप्रपाठके चतुर्थोऽनुवाकः॥०॥

अग्ने जातान् प्र णुदा नः सपत्नानिति पुरस्तादुप दधाति जातानेव भ्रातृव्यान् प्र णुदते सहसा जातानिति पश्चात् जनिष्यमाणानेव प्रति नुदते चतुश्चत्वारिꣳशस्तोम इति दक्षिणतो ब्रह्मवर्चसं वै चतुश्चत्वारिꣳशो ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद्दक्षिणोऽर्धो ब्रह्मवर्चसितरः षोडशस्तोम इत्युत्तरत ओजो वै षोडश ओज एवोत्तरतो धत्ते तस्मात्॥ १॥

उत्तरतोऽभिप्रयायी जयति वज्रो वै चतुश्चत्वारिꣳशो वज्रः षोडशो यदेते इष्टके उपदधाति जाताꣳश्चैव जनिष्यमाणाꣳश्च भ्रातृव्यान् प्र णुद्य वज्रमनु प्र हरति स्तृत्यै पुरीषवतीं मध्य उप दधाति पुरीषं वै मध्यमात्मनः सात्मानमेवाग्निं चिनुते सात्मामुष्मिन् लोके भवति य एवं वेदैता वा असपत्ना नामेष्टका यस्यैता उपधीयन्ते॥ २॥

नास्य सपत्नो भवति पशुर्वा एष यदग्निर्विराज उत्तमायां

चित्यामुपं दधाति विराजमेवोत्तमां पशुषु दधाति तस्मात् पशुमानुत्तमां वाचं वदति दश-दशोपं दधाति सवीर्यत्वायाक्षण्योपं दधाति तस्मादक्षण्या पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै यानि वै छन्दाꣳसि सुवर्ग्याणि आसन् तैर्देवाः सुवर्गं लोकमायन् तेनर्षयः ॥ ३ ॥

अस्राम्यन् ते तपोऽतप्यन्त तानि तपसा अपश्यन् तेभ्य एता इष्टका निरमिमते एवम्छन्दो वरिवम्छन्द इति ता उपा दधत ताभिर्वै ते सुवर्गं लोकमायन् यदेता इष्टका उपदधाति यान्येव छन्दाꣳसि सुवर्ग्याणि तैरेव यजमानः सुवर्गं लोकमेति यज्ञेन वै प्रजापतिः प्रजा असृजत ताः स्तोमभागैरेवासृजत यत् ॥ ४ ॥

स्तोमभागा उपदधाति प्रजा एव तद् यजमानः सृजते बृहस्पतिर्वा एतद् यज्ञस्य तेजः समभरद् यत् स्तोमभागा यत् स्तोमभागा उपदधाति सतेजसमेवाग्निं चिनुते बृहस्पतिर्वा एतां यज्ञस्य प्रतिष्ठामपश्यत् यत् स्तोमभागाः यत् स्तोमभागा उपदधाति यज्ञस्य प्रतिष्ठित्यै सप्त-सप्तोपं दधाति सवीर्यत्वाय तिस्रो मध्ये प्रतिष्ठित्यै ॥ ५ *

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डस्य तृतीयप्रपाठकदशमानुवाक-भाष्ये चतुर्थप्रपाठकप्रथमानुवाकभाष्ये च द्रष्टव्यम्।

उत्तरतो धर्त्ते तस्मात्। उपधीयन्ते। ऋषयः। सृजन्त्वयत्। चित्वारिꣳशच्च ॥ ५ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे तृतीयप्रपाठके पञ्चमोऽनुवाकः ॥ ० ॥

रश्मिरित्येवादित्यमसृजत प्रेतिरिति धर्ममन्विति-रिति दिवꣳ सन्धिरित्यन्तरिक्षं प्रतिधिरिति पृथिवीं विष्टम्भ इति दृष्टिं प्रवेत्यहरनुवेति रात्रिमुशिगिति वसून् प्रकेत इति रुद्रान् सुदीतिरित्यादित्यानोज इति पितॄꣳस्तन्तुरिति प्रजाः पृतनाषाडिति पशून् रेवदित्योषधीरभिजिदसि युक्तग्रावा ॥ १ ॥

इन्द्राय त्वा इन्द्रं जिन्वेत्येव दक्षिणतो वज्रं पर्यौहद् अभिजित्यै ताः प्रजा अपप्राणा असृजत तास्वधिपतिरसीत्येव प्राणमदधात यन्तेत्यपानꣳ सꣳसर्प इति चक्षुर्वयोधा इति श्रोत्रं ताः प्रजाः प्राणतीरपानतीः पश्यन्तीः शृण्वतीर्न मीथुनी अभवन् तासु चित्पदसीत्येव मिथुनमदधात् ताः प्रजा मिथुनी ॥ २ ॥

भवतीर्न प्राजायन्त ताः संरोहोऽसि नीरोहोऽसीत्येव प्राजनयत् ताः प्रजाः प्रजाता न प्रत्यतिष्ठन् ता

वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीत्येवैषु लोकेषु प्रत्यस्थापयद् यदाह वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीति प्रजा एव प्रजाता एषु लोकेषु प्रतिष्ठाययति सात्माऽन्तरिक्षꣳ, रोहति सप्राणोऽमुष्मिन् लोके प्रति तिष्ठति अव्यर्धुकः प्राणापानाभ्यां भवति य एवं वेद ॥३॥*

युक्तग्रावा। प्रजा मिथुनी। अन्तरिक्षं। द्वादश च ॥६॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे तृतीयप्रपाठके षष्ठोऽनुवाकः ॥०॥

नाकसद्भिर्वै देवाः सुवर्गं लोकमायन् तत् नाकसदाम् नाकसत्त्वं यन्नाकसद उपदधाति नाकसद्भिरेव तत् यजमानः सुवर्गं लोकमेति सुवर्गो वै लोको नाको यस्यैता उपधीयन्ते नास्मा अकं भवति यजमानायतनं वै नाकसदो यन्नाकसद उपदधात्यायतनमेव तद् यजमानः कुरुते पृष्ठानां वा एतत् तेजः संभृतं यन्नाकसदो यन्नाकसदः ॥१॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयचतुर्थप्रपाठकस्य प्रथमानुवाकभाष्ये द्रष्टव्यम्।

उपदधाति पृष्ठानामेव तेजोऽव रुन्धे पञ्चचोडा उप दधात्यसुरस एवैनमेता भूता अमुस्मिन् लोक उप शेरेऽथो तनूपानीरेवैता यजमानस्य यं द्विष्यात् तमुप दधत् ध्यायेदेताभ्य एवैनं देवताभ्य आ दृश्वति ताजगार्तिमार्च्छत्युत्तरा नाकसद्म उप दधाति यथा जायामानीय गृहेषु निषादयति ताहगेव तत् ॥ २ ॥

पश्चात् प्राचीमुत्तमामुप दधाति तस्मात् पश्चात् प्राची पत्नी अन्वास्ते स्वयमातृण्णाच्च विकर्णीच्च उत्तमे उप दधाति प्राणो वै स्वयमातृण्णायुर्विकर्णी प्राणञ्चैव आयुश्च प्राणानामुत्तमौ धत्ते तस्मात् प्राणश्चायुश्च प्राणानामुत्तमौ नान्यामुत्तरामिष्टकामुप दध्याद् यदन्यामुत्तरामिष्टकामुपदध्यात् पशूनाम् ॥ ३ ॥

च यजमानस्य च प्राणं चायुश्चापि दध्यात् तस्मात् नान्योत्तरेष्टकोपधेया स्वयमातृण्णामुप दधात्यसौ वै स्वयमातृण्णाममूमेवोप धत्ते ऽस्मुपधापयति प्राणमेवास्यां दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाग्निं चिनुते स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्यै अथो सुवर्गस्य लोकस्यानुख्यात्यै एषा वै, देवानां विक्रान्तिर्यद्विकर्णी यद्विकर्णीमुपदधाति देवानामेव विक्रान्ति

मनु॒ वि क्रमते उत्तर॒त उप॑ दधाति॒ तस्मा॑दुत्तर॒त-उप॑-चारोऽग्निर्वायु॒मती॑ भवति॒ समि॑ध्यै ॥ ४ ॥*

संभृ॑तं॒ यन्नाक॒सदो॒ यन्नाक॒सदः॑। तत्। प॑शू॒नाम्। ए॒षा वै। द्वावि॑ꣳशतिश्च ॥ ७ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ० ॥

छन्दा॑ꣳस्युप॑ दधाति प॒शवो॒ वै छन्दा॑ꣳसि प॒शूने॒वाव॑ रुन्धे॒ छन्दा॑ꣳसि॒ वै दे॒वाना॑ वा॒मं प॒शवो॑ वा॒ममे॒व प॒शूनव॑ रुन्धे ए॒ताꣳ ह॒ वै य॒ज्ञसे॑नश्चैचियायण॒श्चिति॑ं वि॒दाꣳ च॑कार॒ तया॒ वै स प॒शूनवारुन्ध॒ यदे॒तामु॑प॒दधा॑ति प॒शू-ने॒वाव॑ रुन्धे गाय॒त्रीः पु॒रस्ता॒दुप॑ दधाति॒ तेजो॒ वै गा॑य॒त्री तेज॑ ए॒व ॥ १ ॥

मु॒खतो॑ धत्ते मू॒र्ध॒न्वतीर्भवन्ति मू॒र्धान॑मे॒वैन॑ꣳ समा॒ना-नां॑ करोति॒ त्रि॒ष्टुभ॒ उप॑ दधाति॒ इ॒न्द्रि॒यं वै त्रि॒ष्टुगि॑न्द्रि॒य-मे॒व म॑ध्य॒तो ध॑त्ते॒ जग॑तीरुप॑ दधाति॒ जाग॑ता॒ वै प॒शवः॑ प॒शूने॒वाव॑ रुन्धेऽनु॒ष्टुभ॒ उप॑ दधाति॒ प्रा॒णा वा अनु॒ष्टुप् प्रा॒णाना॒मुत्सृ॑ष्ट्यै॒ बृह॑तीरु॒ष्णिहाः॑ प॒ङ्क्तीर॒क्षरप॑ङ्क्ती-

* अस्यानुवाकस्य व्याख्यानं पञ्चमकाण्डीय चतुर्थप्रपाठकस्य द्वितीयतृतीयानुवाक-भाष्ये द्रष्टव्यम्।

रति विषुरूपाणि छन्दाꣳस्युप दधाति विषुरूपा वै पशवः पशवः ॥ २ ॥

छन्दाꣳसि विषुरूपानेव पशूनव रुन्धे विषुरूपमस्य गृहे दृश्यते यस्यैता उपधीयन्ते य उ च एनाम् एवं वेदातिछन्दसमुप* दधात्यतिछन्दा वै सर्वाणि छन्दाꣳसि सर्वैभिरेवैनं छन्दोभिश्चिनुते वर्ष्मवा एषा छन्दसां यदतिछन्दा यदतिछन्दसमुपदधाति वर्ष्मैवैनꣳ समानानां करोति, द्विपदा उप दधाति द्विपाद् यजमानः, प्रतिष्ठित्यै ॥ ३ ॥†

तेज एव । पशवः पशवः । यजमानः । एकञ्च ॥ ८ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे तृतीयप्रपाठके अष्टमोऽनुवाकः ॥ ० ॥

सर्वाभ्यो वै देवताभ्योऽग्निश्चीयते यत् सयुजो नोपदधाद् देवता अस्याग्निं दृञ्हीरन् यत् सयुज उपदधात्यात्मनैवैनꣳ सयुजं चिनुते नाग्निना व्यृध्यतेऽथो यथा पुरुषः स्नावभिः सन्तत एवमेवैताभिरग्निः सन्ततो-

* 'अतिच्छन्दसम्' इति B. एवं क्वीतपुस्तके पाठः। परन्तु वेदे छकारस्य कुत्वाभावे दित्वादर्शनात् एष पाठः उपेक्षितः।

† अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयचतुर्थप्रपाठकस्य चतुर्थानुवाकभाष्ये द्रष्टव्यम्।

ऽग्निना वै देवाः सुवर्गं लोकमायन् ता अमूः इष्टिका अभवन् यस्यैता उपधीयन्ते सुवर्गमेव ॥ १ ॥

लोकमेति गच्छति प्रकाशं चिचमेव भवति मण्डलेष्टका उप दधाति इमे वै लोका मण्डलेष्टका इमे खलु वै लोका देवपुरा देवपुरा एव प्र विशति नार्तिमार्च्छत्यग्निं चिकानो विश्वज्योतिष उप दधाति इमानेव एताभिर्लोकान् ज्योतिष्मतः कुरुतेऽथो प्राणानेवैता यजमानस्य दाधत्येता वै देवताः सुवर्ग्यास्ता एव, अन्वारभ्य सुवर्गं लोकमेति ॥ २ ॥*

सुवर्गमेव । ता एव । चत्वारि च ॥ ९ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे तृतीयप्रपाठके नवमोऽनुवाकः ॥०॥

वृष्टिसनीरुप दधाति वृष्टिमेवाव रुन्धे यदेकधोपदध्याद् एकमृतुं वर्षेदनुपरिहारꣳ सादयति तस्मात् सर्वानृतून् वर्षति पुरोवातसनिर्सीत्याहैतद्वै वृष्ट्यै रूपंꣳ रूपेणैव वृष्टिमव रुन्धे संयानीभिर्वै देवा इमान् लोकान् समयुस्तत् संयानीनाꣳ संयानित्वं यत् संयानीरुपदधाति यथाप्सु नावा संयात्येवं ॥ १ ॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयचतुर्थप्रपाठकस्य पञ्चमषष्ठानुवाकभाष्ये द्रष्टव्यम्।

एवैताभिर्यजमान इमान् लोकान्त्सं याति ध्रुवो वै एषोऽग्नेर्यत् संयानीर्यत् संयानीरुपदधाति ध्रुवमेवैतमग्नये उप दधात्युत यस्यैतास्वपहितास्वापोऽग्निꣳ हरत्यङ्गत एवास्याग्निरादित्येष्टका उप दधात्यादित्या वै एतं भूत्यै प्रति नुदन्ते योऽलमभूत्यै सन् भूतिं न प्राप्नोत्यादित्याः ॥ २ ॥

एवैनं भूतिं गमयन्त्यसौ वै एतस्यादित्यो रुचमा दत्ते योऽग्निं चित्वा न रोचते यदादित्येष्टका उप दधात्यसावेवास्मिन्नादित्यो रुचं दधाति यथासौ देवानाꣳ रोचते एवमेवैष मनुष्याणाꣳ रोचते घृतेष्टका उप दधात्येतद्वै अग्नेः प्रियं धाम यद् घृतं प्रियेणैवैनं धाम्ना समर्द्धयतिः ॥ ३ ॥

अथो तेजसानुपरिहारꣳ सादयत्यपरिवर्गमेवास्मिन् तेजो दधाति प्रजापतिरग्निमचिनुत स यशसा व्यार्ध्यत स एता यशोदा अपश्यत् ता उपाधत्त ताभिर्वै स यशआत्मन्नधत्त यत् यशोदा उपदधाति यश एव ताभिर्यजमान आत्मन् धत्ते पञ्चोप दधाति पाङ्क्तः पुरुषो यावानेव पुरुषस्तस्मिन् यशो दधाति ॥ ४ ॥*

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डस्य चतुर्थप्रपाठकषष्ठानुवाकभाष्ये द्रष्टव्यम्।

एवं। प्राप्नोत्यादित्याः। अर्द्धयति। एकान्नपञ्चाशच्च ॥ १० ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे तृतीयप्रपाठके दशमोऽनुवाकः ॥ ० ॥

देवासुराः संयत्ता आसन् कनीयाꣳसो देवा आसन् भूयाꣳसोऽसुरास्ते देवा एता इष्टका अपश्यन् ता उपादधत भूयस्कृदसीत्येव भूयाꣳसोऽभवन् वनस्पतिभिरोषधीभिः परिवस्कृदसीतीमामजयन् प्राच्यसीति प्राचीन्दिशमजयन्नूर्ध्वासीत्यमूमजयन्नन्तरिक्षसदस्यन्तरिक्षे सीदेत्यन्तरिक्षमजयन्ततो देवा अभवन् ॥ १ ॥

पराऽसुरा यस्यैता उपधीयन्ते भूयानेव भवत्यभीमान् लोकान् जयति भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्यश्वपदसि श्येनसदसीत्याहैतद्वै अग्नेरूपꣳ रूपेणैवाग्निमव रुन्धे पृथिव्यास्त्वा द्रविणे सादयामीत्याहेमानेवैताभिर्लोकान् द्रविणावतः कुरुते आयुष्या उप दधात्यायुरेव ॥ २ ॥

अस्मिन् दधात्यग्ने यत् ते परꣳ हृन्नामेत्याहैतद्वै अग्नेः प्रियं धाम प्रियमेवास्य धामोपाप्नोति तावेहि सꣳरभावहै इत्याह विरेवैनेन परि धत्ते पाञ्चजन्येधर्ये अग्ने

इत्याहैष वै अग्निः पाङ्क्तजन्यो यः पञ्चचितीकस्तस्मादेवमाह कृतव्याः उप, दधात्येतद्वै क्रतूनां प्रियं धाम यद्धतव्या क्रतूनामेव प्रियं धामाव रुन्धे सुमेक इत्याह संवत्सरो वै सुमेकः संवत्सरस्यैव प्रियं धामोपाप्नोति॥३॥*

अभवन्। आयुरेव। कृतव्या उप। षड्विंशतिश्च ॥ ११ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे तृतीयप्रपाठके एकादशोऽनुवाकः ॥०॥

प्रजापतेरक्षि अश्वयत् तत्परापतत्तदश्वोऽभवद् यदश्वयत् तदश्वस्याश्वत्वं तद्देवा अश्वमेधेनैव प्रत्यदधुरेष वै प्रजापतिः सर्वं करोति योऽश्वमेधेन यजते सर्व एव भवति(१) सर्वस्य वै एषा प्रायश्चित्तिः सर्वस्य भेषजं सर्वं वै एतेन पाप्मानं देवा अतरन्नपि वै एतेन ब्रह्महत्यामतरन् सर्वं पाप्मानम् ॥ १ ॥

तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद(२) उत्तरं वै तत् प्रजापतेरक्षि अश्वयत तस्मादश्वस्योत्तरतोऽव द्यन्ति दक्षिणतोऽन्येषां पशूनां(३) वैतसः कटो भवत्यप्सुयोनिर्वै अश्वोऽप्सुजो वैतसः स्वे एवैनं

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयचतुर्थप्रपाठकस्य सप्तमानुवाकभाष्ये द्रष्टव्यम्।

योनौ प्रति स्थापयति[४] चतुष्टोमः स्तोमो भवति सुरट् छन्दो वै अश्वस्य सक्थि आ अदृहत्, तद्देवाश्चतुष्टोमेनैव प्रत्यदधुर्यत् चतुष्टोमः स्तोमो भवत्यश्वस्य सर्वत्वाय[५]॥२॥

सर्वं पाप्मानम्। आ अदृहत्। द्वादश च ॥ १२ ॥

उत्सन्नयज्ञः। इन्द्राग्नी। देवा वै अक्षण्वास्तोमीयाः। अग्नेर्भागोऽसि। अग्नें जातान्। रश्मिरिति। नाकसद्भिः। छन्दांसि सर्वाभ्यो। दृष्टिसनीः। देवासुराः, कनीयांसः। प्रजापतेरष्टि। द्वादश च ॥ १२ ॥

उत्सन्नयज्ञः (१।१)। देवा वै (३।१)। यस्य मुख्यवतीः (४।६)। नाकसद्भिः (७।१)। एवैताभिः (१०।२)। अष्टाचत्वारिꣳशत् ॥ ४८ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे तृतीयप्रपाठके द्वादशोऽनुवाकः ॥०॥

इति संहितापञ्चमाष्टके तृतीयः प्रश्नः ॥*

॥०॥ हरिः ओम् ॥०॥

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥
चितिराद्या द्वितीये स्यात् तृतीये तु चतुष्टयम्।

---

* इति तैत्तिरीयसंहितायां पञ्चमकाण्डे तृतीयः प्रपाठकः इत्यधिकः पाठः।

द्वादशानुवाका स्युः प्रथमे लिष्टका इमाः ॥
आग्नेय्यश्च तथर्क्ष्याः प्राणभृत्संज्ञकास्तथा ।
अपस्याश्च वयस्याश्च द्वितीयस्यां चितौ श्रुताः ॥
द्वितीये स्वयमातृण्णा दिश्याः प्राणभृतस्तथा ।
वृहत्यो वालखिल्याश्च तृतीयस्यां चिताविमाः ॥
तृतीयतुर्ययोरक्षण्वास्तोमीयाश्च स्पृशः ।
व्युष्टयश्चेष्टकाः प्रोक्ताश्चतुर्थ्याश्च चितावमाः ॥
पञ्चमे त्वपचित्याख्या विराड्राख्याश्च वर्णिताः ।
षष्ठे तु क्षीमभागाख्या नाकसत्संज्ञकास्तु याः ॥
षोडाख्या स्वयमातृण्णा विकर्णीताश्च सप्तमे ।
छन्दोभिधौ अष्टमे स्युः पञ्चम्यां तु चितावमाः ॥
अथाग्निष्टाः कथ्यन्ते ता विज्ञेया यथोचिति ।
सयुजो मण्डलाख्याश्च विश्वज्योतिष इत्यमूः ॥
नवमे दशमे वृष्टिसनि-संयानिकाभिधाः ।
आदित्याख्या घृताख्याश्च यशोदास्रेति वर्णिताः ॥
एकादशे तु भूयस्कदग्निरूपाभिधा अपि ।
द्रविणोदास्त्वायुष्या स्यादग्निहृदयाभिधा ॥
स्तव्यास्रेत्येवमेताः क्रमादिह समीरिताः ।
द्वादशे तस्ममेधस्य विधिरित्येव निर्णयः ॥

तमिममश्वमेधं विधत्ते,—"प्रजापतेरक्षि अश्वयत्पात्यरापतत्तद् सोऽभवद्यदश्वयत्तदश्वस्याश्वत्वं तदेवा अश्वमेधेनैव प्रत्यदधुरेष वै प्रजा-

* "विधिरित्यत्र" इति का० की० पु० पाठः ।

पतिꣳ सर्वं करोति योऽश्वमेधेन यजते सर्व एवं भवति"(१) इति।

'प्रजापतेः' चतुर्मुखस्य अक्षिगोलकं केनापि व्याधिना उच्छून-मभूत्, तच्च भूमौ पतितं सत् अश्वरूपेण आविर्बभौ, यस्मात् कारणात् अश्वयत्, तस्मात् कारणात्, तत उत्पन्नस्य प्राणिनोऽश्वनाम सम्पन्नं। ततो देवाः प्रतीकारं विचार्य अश्वमेधमनुष्ठाय तेन अश्वमेधसामर्थ्येन 'तत्' प्रजापतेरक्षि समादधुः, तस्मादेवं* प्रग्रस्तत्वात् अश्वमेधेन यजेत, स च यष्टा प्रजापतिं संपूर्णं करोति, स्वयञ्च प्रजापतिप्राप्त्या सर्वात्मको भवति।

तदेवं सर्वभावप्राप्त्यर्थं अश्वमेधं विधाय पुनः पापक्षयार्थ-मश्वमेधकृतं तदभ्यासनं च विधत्ते,—"सर्वस्य वा एषा प्रायश्चित्तिः सर्वस्य भेषजꣳ सर्वं वा एतेन पाप्मानं देवा अतरन्नपि वा एतेन ब्रह्म-हत्यामतरन् सर्वस्य पाप्मानमन्तरेति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद(२)" इति। येयमश्वमेधानुष्ठितिः, सैषा 'सर्वस्य' पाप्मनः उपपातकरूपस्य महापातकरूपस्य च 'प्रायश्चित्तिः' भवति। किञ्च, 'सर्वस्य' व्याधिजातस्य तद्धेतुपापक्षयद्वारेण अश्वमेधानुष्ठानं 'भेषजम्', अतएव इदानींतना 'देवाः' पूर्वस्मिन् मनुष्ये जन्मनि 'एतेन' अश्वमेधेन गोवधादिरूपमुपपातकं ब्रह्महत्यादिरूपं महापातकं च परिहृतवन्तः; तस्मादिदानीमपि 'यः' अश्वमेधक्रतुना 'यजते' सोऽयमुपपातकमहा-पातके 'तरति'। योऽपि च पुरुषः एतमश्वमेधं शास्त्रोक्तप्रकारेण जानाति। ज्ञानञ्च द्विविधम्,—अर्थनिर्णयः, उपासनञ्च; तत्र अर्थनिर्णयः, पदवाक्यप्रमाणपर्यालोचनया सम्पद्यते; उपासनाप्रकारस्तु समस्का-

* तस्मादेव इति आदर्शपुस्तकपाठः।

एतस्मिन्नभिधास्यते। घोटकप्राप्तं दक्षिणावदानं बाधितुं विधत्ते,—"उत्तरं वै तत् प्रजापतेरक्षि अश्वयत् तस्मादश्वोत्तरतोऽवद्यन्ति दक्षिणतोऽन्येषां पशूनाम्[२]" इति। यस्मात् प्रजापतेः उत्तरभागवर्ति वामाक्षि उच्छूनमभवत्, तस्मादश्वसम्बन्धिनो हविषः अवदानमपि उत्तरस्यां दिशि कर्तव्यम्। 'अन्येषाम्' अश्वव्यतिरिक्तानां पशूनां दक्षिणां दिशि अवदानम्।

अतएव सूत्रकार आह,—'पशुकाम उत्तरत उपरिष्टाद्ग्रैवतस्य कटे अश्वं प्राञ्चं यथाङ्गं चिनोति एवं पुरस्तात् प्रत्यञ्चं तूपरं पश्चात् प्राचीनं गोमृगं दक्षिणतः सक्थ्याख्यितरान् पशूनासादयति' इति। हविःसादनाधारं विधत्ते,—'वैतसः कटो भवत्यप्सुयोनिर्वा अश्वोऽप्सुजो वैतसः स्व एवैनं योनौ प्रति ष्ठापयति[३]" इति। अप्सु जलेषु योनिः निवासस्थानं यस्यासौ 'अप्सुयोनिः', वड़वा हि समुद्रजलेषु अवतिष्ठते, वैतसस्योदकजन्यत्वं प्रसिद्धम्।

यदुक्तं सूत्रकारेण, 'श्वोभूते प्रजापते गोतमचतुष्टोमयोः पूर्व्वो रथन्तरसामा' इति। गोतमेन दृष्टौ यौ चतुष्टोमाख्यौ एकाहक्रतू, तयोर्मध्ये यः पूर्व्वश्चतुष्टोमः सोऽत्र कर्तव्य इति सूत्रार्थः। तमिमं विधत्ते,—"चतुष्टोमस्तोमो भवति सरट् ह वा अश्वस्य सक्थि आ अहृहत् तद्देवाश्चतुष्टोमेनैव प्रत्यदधुर्यच्चतुष्टोमः स्तोमो भवत्यश्वस्य सर्व्वत्वाय[४]" इति। चत्वारस्तोमाः,-चिद्वृत्, पञ्चदश, सप्तदश, एकविंशः, एषुमध्ये यस्मिन्नग्निष्टोमे विधत्ते सोऽयं 'चतुष्टोमः', द्वितीयेन स्तोमशब्देन विशेष्यभूतोऽग्निष्टोमो लक्ष्यते, भीमसेनो भीमः, सत्यभामा

भामेतिवत्, 'चित्पदग्निष्टोमः' इत्यत्र विधानात्। एकस्तोमकोऽपि कश्चिदग्निष्टोमो विद्यते, तच्चादृत्तये 'चतुष्टोमः' इति विशिनष्टि, चित्पदात्मकस्याश्वमेधस्य प्रथममहश्चतुष्टोमात्मकाग्निष्टोमरूपं कुर्यात्। षरट्शब्देन शकलाशोऽभिधीयते। स कदाचित् अश्वस्य सक्थिप्रदेशमादाय तत्सक्थिमांसमुद्यम्य भक्षितवान्, तच्च सक्थिरूपं विकलमङ्गं देवाश्चतुष्टोमेनैव समादधुः, तस्मादयं चतुष्टोमः अश्वस्य संपूर्त्तये भवति॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे तृतीयप्रपाठके द्वादशोऽनुवाकः॥०॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण सायनाचार्येण विरचिते माधवीये वेदार्थप्रकाशनामकतैत्तिरीययजुःसंहिताभाष्ये पञ्चमकाण्डे तृतीयः प्रपाठकः संपूर्णः॥०॥

॥०॥ ॐ तत्सत्॥०॥

॥०॥ श्रीगणेशाय नमः ॥०॥

तैत्तिरीयसंहिताभाष्ये

पञ्चमकाण्डे चतुर्थप्रपाठके

प्रथमोऽनुवाकः ।

हरिः ओम् ।

देवासुराः संयत्ता आसन् ते न व्यजयन्त स एता इन्द्रस्तनूरपश्यत् ता उपाधत्त ताभिर्वै स तनुवमिन्द्रियं वीर्यमात्मन्नधत्त ततो देवा अभवन् परासुरा यदिन्द्र-तनूरुपदधाति तनुवमेव ताभिरिन्द्रियं वीर्यं यजमान आत्मन्धत्तेऽथो सेन्द्रमेवाग्निꣳ सतनुं चिनुते भवत्यात्मना परास्य भ्रातृव्यः ॥ १ ॥

भवति यज्ञो देवेभ्योऽपाक्रामत् तमवरुन्धन्नाशक्नुवन् त एता यज्ञतनूरपश्यन् ता उपादधत ताभिर्वै ते यज्ञ-मवारुन्धत यद्यज्ञतनूरुपदधाति यज्ञमेव ताभिर्यजमानोऽव रुन्धे चयस्त्रिꣳशत्मुप दधाति चयस्त्रिꣳशद्वै देवता देवता एवाव रुन्धेऽथो सात्मानमेवाग्निꣳ सतनुं चिनुते सात्माऽमुष्मिन् लोके ॥ २ ॥

भवति य एवं वेद ज्योतिष्मतीरुप दधाति ज्योतिरेवास्मिन् दधात्येताभिर्वै अग्निश्चितो ज्वलति ताभिरेवैनꣳ समिन्धे उभयोरस्मै लोकयोर्ज्योतिर्भवति नक्षत्रेष्टका उप दधात्येतानि वै दिवो ज्योतीꣳषि तान्येवाव रुन्धे सुकृतां वै एतानि ज्योतीꣳषि यन्नक्षत्राणि तान्येवाप्नोत्यथो अनूकाशमेवैतानि ॥ ३ ॥

ज्योतीꣳषि कुरुते सुवर्गस्य लोकस्यानुख्यात्यै यत्सꣳस्पृष्टा उपदधाद् वृष्ट्यै लोकमपि दध्याद्वर्षुकः पर्जन्यः स्यादसꣳस्पृष्टा उप दधाति वृष्ट्यै एव लोकं करोति वर्षुकः पर्जन्यो भवति पुरस्तादन्याः प्रतीचीरुप दधाति पश्चादन्याः प्राचीस्तस्मात् प्राचीनानि च प्रतीचीनानि च नक्षत्राण्या वर्त्तन्ते ॥ ४ ॥*

भ्रातृव्यः। लोके। एवैतानि। एकचत्वारिꣳशच्च ॥ १ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥ ० ॥

ऋतव्या उप दधाति ऋतूनां क्लृप्त्यै द्वन्द्वमुप दधाति तस्माद्द्वन्द्वमृतवोऽर्धतेव वै एषा यन्मध्यमा चितिरन्त-

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डस्य चतुर्थप्रपाठकस्याष्टमनवम-दशमानुवाकभाष्ये द्रष्टव्यम्।

रिक्षमिव वै एषा छन्दमन्यासु चितीषूप दधाति चतस्रो मध्ये धृत्या अन्तःश्लेषण वा एतास्चितीनां यद्दतव्या यद्दतव्या उपदधाति चितीनां विधृत्यै अवकामनूप दधात्येषा वै अग्नेर्योनिः सयोनिम्॥ १॥

एवाग्निं चिनुत उवाच ह विश्वामित्रोऽददित्स ब्रह्मणाऽन्नं यस्यैता उपधीयान्ते य उ चैना एवं वेदद् इति संवत्सरो वै एतं प्रतिष्ठायै नुदते योऽग्निं चित्वा न प्रतितिष्ठति पञ्च पूर्वाश्चितयो भवन्त्य षष्ठीं चितिं चिनुते षड्वै ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रतितिष्ठत्येता वै॥ २॥

अधिपत्नीर्नामेष्टका यस्यैता उपधीयन्तेऽधिपतिरेव समानानां भवति यं द्विष्यात्तमुपदधाद् ध्यायेदेताभ्य एवैनं देवताभ्य आ वृश्चति नाजगार्तिमार्च्छत्यङ्गिरसः सुवर्गं लोकं यन्तो या यज्ञस्य निष्कृतिरासीत्तामृषिभ्यः प्रत्यौहन् तद्धिरण्यमभवत् यद्धिरण्यशुल्कैः प्रोक्षति यज्ञस्य निष्कृत्यै अथो भेषजमेवास्मै करोति॥ ३॥

अथो रूपेणैवैनꣳ समर्धयति अथो हिरण्यज्योतिषैव सुवर्गं लोकमेति साहस्रवता प्रोक्षति साहस्रः प्रजापतिः प्रजापतेराप्त्यै इमा मे अग्ने इष्टका धेनवः

सन्वित्याह धेनूरेवैनाः कुरुते ता एनं कामदुघा अमुष्मिंल्लोके उप तिष्ठन्ते ॥ ४ ॥

सयोनिम्। एता वै। करोति। एकान्नचत्वारिꣳशच्च ॥ २ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे चतुर्थप्रपाठके द्वितीयोऽनुवाकः ॥०॥

रुद्रो वै एष यदग्निः स एतर्हि जातो यर्हि सर्वश्चितः स यथा वत्सो जातः स्तनं प्रेप्सत्येवं वै एष एतर्हि भागधेयं प्रेप्सति तस्मै यदाहुतिं न जुहुयादध्वर्युं च यजमानं च ध्यायेत् शतरुद्रीयं जुहोति भागधेयेनैवैनꣳ शमयति नार्तिमार्च्छत्यध्वर्युर्न यजमानो यद्ग्राम्याणां पशूनां ॥ १ ॥

पयसा जुहुयाद् ग्राम्यान् पशून् लुचापयेत् यदारण्यानामारण्यान् जर्तिलयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा न ग्राम्यान् पशून् हिनस्ति नारण्यानथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेत्यजक्षीरेण जुहोत्याग्नेयो वा एषा यदजाहुत्यैव जुहोति न ग्राम्यान् पशून् हिनस्ति नारण्यानङ्गिरसः सुवर्गं लोकं यन्तः॥२॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयचतुर्थप्रपाठकस्य द्वादशानुवाकभाष्ये द्रष्टव्यम्।

अजायां धर्मं प्रासिञ्चन्त्सा श्रोचन्ती पूर्णं परा-जिहीत सोऽकौ भवत्तदर्कस्यार्कत्वमर्कपर्णेन जुहोति सयोनित्वायोदङ्तिष्ठन् जुहोति एषा वै रुद्रस्य दिक् स्वायामेव दिशि रुद्रं निरवदयते चरमायामिष्टकायां जुहोत्यन्तत एव रुद्रं निरवदयते त्रेधाविभक्तं जुहोति त्रयं इमे लोका इमानेव लोकान्त्समावद्वीर्यान् करोतीयत्यग्रे जुहोति ॥ ३ ॥

अथेयत्यथेयति त्रयं इमे लोका एभ्य एवैनं लोकेभ्यः शमयति तिस्र उत्तरा आहुतीर्जुहोति षट् सम्पद्यन्ते षड्वा ऋतव ऋतुभिरेवैनꣳ शमयति यदनुपरिक्रामं जुहुयादन्तरचारिणꣳ रुद्रं कुर्यादथो खल्वाहुः कस्यां वाह दिशि रुद्रः कस्यां वेत्यनुपरिक्राममेव हौतव्यमपरिवर्गमेवैनꣳ शमयति ॥ ४ ॥

एता वै देवताः सुवर्ग्या या उत्तमास्ता यजमानं वाचयति ताभिरेवैनꣳ सुवर्गं लोकं गमयति यं द्विष्यात् तस्य सञ्चरे पशूनां न्यस्येद्यः प्रथमः पशूरभितिष्ठति स आर्तिमार्च्छति ॥ ५ ॥*

पशूनां । यन्तः । अग्रे जुहोति । अपरिवर्गमेवैनꣳ शमयति । त्रिꣳशच्च ॥ ३ ॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयपञ्चमप्रपाठकस्य एकादशानुवाकभाष्ये द्रष्टव्यम्।

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे चतुर्थप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

अग्ममन्नूर्जमिति परिषिञ्चति मार्जयत्येवैनमुथो तर्पयत्येव स एनं तृप्तोऽक्षुध्वन्नशोचन्नमुष्मिन् लोके उप तिष्ठते तृप्यति प्रजया पशुभिर्य एवं वेद तां नः इषमूर्जं धत्त मरुतः संरराणा इत्याह अन्नं वै ऊर्क् अन्नं मरुतोऽन्नमेवाव रुन्धेऽग्मंस्ते क्षुदमुन्ते शुक् ॥ १ ॥

कृच्छ्रतु यं द्विष्म इत्याह यमेव द्वेष्टि तमस्य क्षुधा च शुचा चार्पयति चिः परिषिञ्चन् पर्येति चितद्वै अग्नियावानेवाग्निस्तस्य शुचंशमयति चिः पुनः पर्येति षट् सम्पद्यन्ते षड्वै ऋतव ऋतुभिरेवास्य शुचंशमयत्यपां वै एतत्पुष्पं यदेतसोऽपां ॥ २ ॥

शरोऽवका वेतसशाखया चावकाभिश्च विकर्षत्यापो वै शान्ताः शान्ताभिरेवास्य शुचंशमयति यो वै अग्निं चितं प्रथमः पशुरधिक्रामतीश्वरो वै तꣳशुचा प्रदहो मण्डूकेन वि कर्षत्येष वै पशूनामनुपजीवनीयो न वै एष ग्राम्येषु पशुषु हितो नारण्येषु तमेव शुचार्पयति अष्टाभिर्वि कर्षति ॥ ३ ॥

अष्टाक्षरा गायत्री गायत्योऽग्नियावानेवाग्निस्तस्य

शुचꣳशमयति पावकवतीभिरन्नं वै पावकोऽन्नेनैवास्य शुचꣳशमयति मृत्युर्वै एष यदग्निर्ब्रह्मण एतद्रूपं यत् कृष्णाजिनं काष्णीं उपानहावुप मुञ्चते ब्रह्मणैव मृत्योरन्तर्धत्तेऽन्तर्मृत्योर्धत्तेऽन्तरन्नाद्यादित्याहुरन्यामुपमुञ्चतेऽन्यां नान्तः ॥ ४ ॥

एव मृत्योर्धत्तेऽवान्नाद्यꣳ रुन्धे नमस्ते हरसे शोचिषे इत्याह नमस्कृत्य हि वसीयाꣳसमुपचरन्त्यन्यं ते अस्मत्तपन्तु हेतय इत्याह यमेव द्वेष्टि तमस्य शुचार्पयति पावको अस्मभ्यꣳ शिवो भवेत्याहान्नं वै पावकोऽन्नमेवावरुन्धे द्वाभ्यामधि क्रामति प्रतिष्ठित्यै अपस्यवतीभ्यां शान्त्यै ॥ ५ ॥*

शुक्। वेतसोऽपाम्। अष्टाभिर्वि कर्षति। नान्तः। एकान्नपञ्चाशच्च ॥ ४ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे चतुर्थप्रपाठके चतुर्थोऽनुवाकः ॥०॥

नृषदे वडिति व्याघारयति पङ्क्त्याहुत्या यज्ञमुखमारभतेऽक्ष्णया व्याघारयति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै यद्वषट् कुर्याद्यातयामास्य वषट्-

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयषष्ठप्रपाठकस्य प्रथमानुवाकभाष्ये द्रष्टव्यम्।

कारः स्याद् यन्न वषट्कुर्याद्रक्षांसि यज्ञꣳ हन्युर्वडित्याह परोक्षमेव वषट् करोति नास्य यातयामा वषट्कारो भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति हुतादो वै अन्ये देवाः ॥ १ ॥

अहुतादोऽन्ये तानग्निचिदेवाभयान्प्रीणाति ये देवा देवानामिति दुग्धा मधुमिश्रेणावोक्षति हुतादश्चैव देवान् अहुतादश्च यजमानः प्रीणाति ते यजमानं प्रीणन्ति दुग्धेव हुतादः प्रीणाति मधुषाऽहुतादो ग्राम्यं वै एतदन्नं यद्दधि आरण्यं मधु यद्दुग्धा मधुमिश्रेणावोक्षत्युभयस्यावरुध्यै ग्रमुष्टिनाऽवोक्षति प्राजापत्यः ॥ २ ॥

वै ग्रमुष्टिः संयोनित्वाय द्वाभ्यां प्रतिष्ठित्यै अनुपरिचारमवोक्षत्यपरिवर्गमेवैनान् प्रीणाति वि वै एष प्राणैः प्रजया पशुभिर्ऋध्यते योऽग्निं चिन्वन्नधिक्रामति प्राणदा अपानदा इत्याह प्राणानेवात्मन्धत्ते वर्चोदा वरिवोदा इत्याह प्रजा वै वर्चः पशवो परिवः प्रजामेव पशूनात्मन्धत्ते इन्दो वृचमंहन् तं वृचः ॥ ३ ॥

हतः षोडशभिर्भोगैरसिनात् स एतामग्नयेऽनीकवते आहुतिमपश्यत् तामजुहोत् तस्याग्निरनीकवान् स्वेन भागधेयेन प्रीतः षोडशधा वृचस्य भोगानपादहद्वैश्वकर्मणेन पाप्मनो निरमुच्यत यदग्नयेऽनीकवते आहुतिं

जुहोत्यग्निरेवास्यानीकवान्त्स्वेन भागधेयेन प्रीतः पाप्मानमपि दहति वैश्वकर्मणेन, पाप्मनो निर्मुच्यते यं कामयेत चिरं पाप्मनः ॥ ४ ॥

निर्मुच्येतेत्येकैकं तस्य जुहुयाच्चिरमेव पाप्मनो निर्मुच्यते यं कामयेत नाजक् पाप्मनो निर्मुच्येतेति सर्वाणि तस्यानुद्रुत्य जुहुयात्ताजगेव पाप्मनो निर्मुच्यतेऽथो खलु नानैव सूक्ताभ्यां जुहोति नानैव सूक्तयोर्वीर्यं दधात्यथो प्रतिष्ठित्यै * ॥ ५ ॥

देवाः। प्राजापत्यः। वृचः। चिरं पाप्मनः। चत्वारिंशच्च ॥ ५ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे चतुर्थप्रपाठके पञ्चमोऽनुवाकः ॥०॥

उदेनमुत्तरां नयेति समिध आ दधाति यथा जनं यतोऽवसङ्करोति तादृगेव तत् तिस्र आ दधाति चिद्वै अग्निर्यावानेवाग्निस्तस्मै भागधेयं करोत्यौदुम्बरीर्भवन्त्यूर्क् वै उदुम्बर ऊर्जमेवास्मै अपि दधाति उदु त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः प्राणैः ॥ १ ॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयषष्ठप्रपाठकस्य प्रथमद्वितीयानुवाकभाष्ये द्रष्टव्यम्।

एवैनमुद्यच्छतेऽग्ने भरन्तु चित्तिभिरित्याह यस्मै एवैनं चित्तायोद्यच्छते तेनैवैनꣳ समर्धयति पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरित्याह दिशो ह्येषोऽनु प्रच्यवते अप अमतिं दुर्मतिं बाधमाना इत्याह रक्षसामपहत्यै रायस्पोषे यक्षपतिमाभजन्तीरित्याह पशवो वै रायस्पोषः ॥ २ ॥

पशूनेवाव रुन्धे षड्भिर्हरति षड्वै ऋतव ऋतुभिरेवैनꣳ हरति द्वे परिगृह्णवती भवतो रक्षसामपहत्यै सूर्यरश्मिर्हरिकेशः पुरस्तादित्याह प्रहत्यै ततः पावका आशिषो नो जुषन्तामित्याहान्नं वै पावकोऽन्नमेवाव रुन्धे देवासुराः संयत्ता आसन् ते देवा एतदप्रतिरथमपश्यन्तेन वै तेऽप्रति ॥ ३ ॥

असुरान् अजयन् तदप्रतिरथस्याप्रतिरथत्वं यदप्रतिरथं द्वितीयो होताऽन्वाह अप्रत्येव तेन यजमानो भ्रातृव्यान् जयत्यथो अनभिजितमेवाभि जयति दशर्चं भवति दशाक्षरा विराड् विराजा द्वौ लोकौ विधृतावनयोर्लोकयोर्विधृत्या अथो दशाक्षरा विराडन्नं विराड्विराजि एवान्नाद्ये प्रति तिष्ठति असदिव वै अन्तरिक्षमन्तरिक्षमिवाग्नीध्रमाग्नीध्रे ॥ ४ ॥

अस्मान् नि 'दधाति सत्त्वाय द्वाभ्यां प्रतिष्ठित्यै वि-

मान एष दिवो मध्य आस्त इत्याह वि एवैतया मिमीते मध्ये दिवो निहितः पृश्निरस्मै-इत्याह अन्नं वै पृश्नि अन्नमेव अव रुन्धे चतसृभिरा पुच्छादेति चत्वारि छन्दाꣳसि छन्दोभिरेवेन्द्रं विश्वा अवीवृधन्नित्याह वृद्धिमेवोपावर्त्तते वाजानाꣳ सत्पतिं पतिं ॥ ५ ॥

इत्याहान्नं वै वाजोऽन्नमेवाव रुन्धे सुम्नहूर्यज्ञो देवाꣳ आ च वक्षदित्याह प्रजा वै पुश्नयः सुम्नं प्रजामेव पुश्नून् आत्मन्धत्ते यक्षद्अग्निर्देवो देवाꣳ आ च वक्षदित्याह स्वगाकृत्यै वाजस्य मा प्रसवेनोद्ग्राभेण, उदग्रभीदित्याह असौ वै आदित्य उद्यन्नुद्ग्राभ एष, निम्रोचन् निग्राभो ब्रह्मणैवात्मानमुद्गृह्णाति ब्रह्मणा भ्रातृव्यं निगृह्णाति* ॥ ६ ॥

प्राणैः । पोषः । अप्रति । आग्नीध्रे । पतिम् । एष । दश च ॥ ६ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे चतुर्थप्रपाठके षष्ठोऽनुवाकः ॥ ० ॥

प्राचीमनु प्रदिशं प्रेहि विद्वानित्याह देवलोकमेवैतयोपावर्त्तते क्रमध्वमग्निना नाकमित्याहेमानेव

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयषष्ठमप्रपाठकस्य तृतीयचतुर्थानुवाकभाष्ये द्रष्टव्यम् ।

एतया लोकान् क्रमते पृथिव्या अहमुदन्तरिक्षमा अरुहमित्याह इमानेवैतया लोकान् समारोहति सुवर्यन्तो नापेक्षन्त इत्याह सुवर्गमेवैतया लोकमेत्यग्ने प्रेहि ॥ १ ॥

प्रथमो देवयतामित्याह उभयेष्वेवैतया देवमनुष्येषु चक्षुर्दधाति पञ्चभिरधि क्रामति पांक्तो यज्ञो यावानेव यज्ञस्तेन सह सुवर्गं लोकमेति नक्तोषासेति पुरोनुवाक्यामन्वाह प्रत्यै अग्ने सहस्राक्षेत्याह साहस्रः प्रजापतिः प्रजापतेराप्त्यै तस्मै ते विधेम वाजायेत्याह अन्नं वै वाजोऽन्नमेवाव ॥ २ ॥

रुन्धे दध्नः पूर्णामौदुम्बरीꣳ स्वयमातृण्णायां जुहोति ऊर्क् वै दधि ऊर्गुदुम्बरोऽसौ स्वयमातृण्णाऽमुष्यामेवोर्जं दधाति तस्मादमुतोऽर्वाचोमूर्जमुपजीवामस्तिस्रभिः सादयति चिद्वद् वै अग्निर्यावानेवाग्निस्तं प्रतिष्ठां गमयति प्रेद्धो अग्ने दीदिहि पुरो न इत्यौदुम्बरीमा दधात्येषा वै सर्मी कर्णिकावती एतया ह स्म ॥ ३ ॥

वै देवा 'असुराणाꣳ शततर्हाꣳस्तृꣳहन्ति यदेतया समिधमादधाति वज्रमेवैतच्छततर्घीं यजमानो भ्रातृव्याय प्रहरति स्तृत्यै अच्छं वट्कारं विधेम ते परमे जन्मन्नग्ने इति वैकङ्कतीमा दधाति भा एवाव रुन्धे ताꣳ सवितुर्वरेण्यस्य चित्रामिति शमीमयीꣳ शान्त्यै

अग्निर्वा ह वै अग्निचितं दुहेऽग्निचिद्ह्याग्निं दुहे तां ॥ ४ ॥

सवितुर्वरेण्यस्य चित्रामित्याहैष वा अग्नेर्दोहस्तमस्य कल्प एव श्रायसोऽवेत्तेन ह स्मैनꣳ स दुहे यदेतया समिधमादधात्यग्निचिदेव तदग्निं दुहे सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह सप्तैवास्य सामानि प्रीणाति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः प्रजापतेः ॥ ५ ॥

आज्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजानाꣳ सृष्ट्यै अग्निर्देवेभ्यो निलायत स दिशोऽनु प्राविशज्जुह्वत् मनसा दिशो ध्यायेद्दिग्भ्य एवैनमव रुन्धे दध्ना पुरस्ताज्जुहोति आज्येनोपरिष्टात् तेजश्चैवास्मै इन्द्रियञ्च समीची दधाति द्वादशकपालो वैश्वानरो भवति द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्वैश्वानरः साक्षात् ॥ ६ ॥

एव वैश्वानरमव रुन्धे यत् प्रयाजानूयाजान् कुर्यात् विकस्तिः सा यज्ञस्य दर्विर्होमं करोति यज्ञस्य प्रतिष्ठित्यै राष्ट्रं वै वैश्वानरो विट् मरुतो वैश्वानरꣳ हुत्वा मारुतान् जुहोति राष्ट्र एव विशमनु बध्नात्युचैर्वैश्वानरस्य आ श्रावयति उपाꣳशु मारुतान् जुहोति तस्माद्राष्ट्रं विशमनि वदति मारुता भवन्ति मरुतो वै देवानां विशो देव-

विशेनैवास्मै मनुष्यविशम्, अव रुन्धे सप्त भवन्ति सप्तगणा वै मरुतो गणश एव विशमव रुन्धे गणेन गणमनुद्रुत्य जुहोति विशमेवास्मै अनुवर्त्मानक्करोति ॥ ७ ॥*

अग्ने प्रेहि। अव। स्म। दुहे तां। प्रजापतेः। साक्षात्। मनुष्यविशम्। एकविꣳशतिश्च ॥ ७ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे चतुर्थप्रपाठके सप्तमोऽनुवाकः ॥०॥

वसोर्धारां जुहोति वसोर्मे धारा असदिति वै एषा क्षीयते घृतस्य वै एनमेषा धारा अमुष्मिन् लोके पिन्वमाना उपतिष्ठत आज्येन जुहोति तेजो वै आज्यं तेजो वसोर्धारा तेजसैवास्मै तेजोऽव रुन्धेऽथो कामा वै वसोर्धारा कामानेवाव रुन्धे यं कामयेत प्राणानस्य अन्नाद्यं वि ॥ १ ॥

छिन्द्यामिति विग्राहन्तस्य जुहुयात् प्राणानेवास्य अन्नाद्यं विच्छिनत्ति यं कामयेत प्राणानस्यान्नाद्यꣳ संतनुयामिति सन्तनां तस्य जुहुयात् प्राणानेवास्यान्नाद्यꣳ सन्तनोति द्वादश द्वादशानि जुहोति द्वादश मासाः

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयषष्ठप्रपाठकस्य पञ्चमानुवाकभाष्ये द्रष्टव्यम्।

संवत्सरः संवत्सरेणैवास्मै अन्नमव रुन्धेऽन्नञ्च मे क्षुच्च मे इत्याहैतदै ॥ २ ॥

अन्नस्य रूपꣳ रूपेणैवान्नमव रुन्धेऽग्निश्च मे आपश्च मे इत्याहैषा वै अन्नस्य योनिः सयोन्येवान्नमव रुन्धेऽर्ङ्-न्द्राग्निꣳ जुहोति देवता एवाव रुन्धे यत्सर्वेषामर्धमिन्द्रः प्रति तस्मादिन्द्रो देवतानां भूयिष्ठभाक्तम इन्द्रमुत्तर-माहेन्द्रियमेवास्मिन्नुपरिष्टाद्धाति यन्नायुधानि जुहोति यज्ञः ॥ ३ ॥

वै यन्नायुधानि यज्ञमेवाव रुन्धे अथो एतदै यज्ञस्य रूपꣳ रूपेणैव यज्ञमव रुन्धेऽवभृथश्च मे स्वगाकारश्च मे इत्याह स्वगाकृत्या अग्निश्च मे घर्मश्च मे इत्याह एतदै ब्रह्मवर्चसस्य रूपꣳ रूपेणैव ब्रह्मवर्चसमव रुन्धे ऋक् च मे साम च मे इत्याह ॥ ४ ॥

एतदै छन्दसाꣳ रूपꣳ रूपेणैव छदाꣳस्यव रुन्धे गर्भाश्च मे वत्साश्च मे इत्याहैतदै पशूनाꣳ रूपं रूपेणैव पशूनव रुन्धे कल्पान् जुहोति अकृप्तस्य कृप्त्यै युग्मदयुजे जुहोति मिथुनत्वाय उत्तरावती भवतोऽभिक्रान्त्यै एका च मे तिस्रश्च मे इत्याह दैवच्छन्दसं वै एका च तिस्रश्च ॥ ५ ॥

मनुष्यछन्दसं चतस्रश्चाष्टौ च दैवच्छन्दसश्चैव मनुष्य-

छन्दसच्चाव रुन्धे आ चयस्त्रिꣳशतो जुहोति चयस्त्रिꣳशद्वै देवता देवता खुवाव रुन्धे आ अष्टाचत्वारिꣳशतो जुहोत्यष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनवरुन्धे वाजश्च प्रसवश्चेति द्वादशं जुहोति द्वादश मासाः संवत्सरः संवत्सर एव प्रति तिष्ठति ॥ ६ ॥ *

वि। वै। यज्ञः। साम च मे इत्याह। च तिस्रश्च। एकान्नपञ्चाशच्च ॥ ८ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे चतुर्थप्रपाठके अष्टमोऽनुवाकः ॥ ० ॥

अग्निर्देवेभ्योऽपाक्रामद्भागधेयमिच्छमानस्तं देवा अब्रुवन्नुप न आ वर्तस्व हव्यन्नो वहेति सोऽब्रवीद्वरं वृणै मह्यमेव वाजप्रसवीयं जुहवन्निति तस्मादग्नये वाजप्रसवीयं जुह्वति यद्वाजप्रसवीयं जुहोत्यग्निमेव तद्भागधेयेन समर्धयत्यथो अभिषेक एवास्य स चतुर्दशभिर्जुहोति सप्त ग्राम्या ओषधयः सप्त ॥ १ ॥

आरण्या उभयीषामवरुन्ध्यै अन्नस्यान्नस्य जुहोति

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयसप्तमप्रपाठकस्य एकादशानुवाकभाष्ये द्रष्टव्यम्।

अन्नस्य अन्नस्यावं रुन्ध्यै औदुम्बरेण स्रुवेण जुहोत्यूर्ग्वै उदुम्बर ऊर्गन्नम् ऊर्जैवास्मै ऊर्जमन्नमवं रुन्धेऽग्निर्वै देवानामभिषिक्तोऽग्निचिन्मनुष्याणां तस्मादग्निचिद्वर्षति न धावेद्वरुद्धꣳ ह्यस्यान्नमन्नमिव खलु वै वर्षं यद्धावेदन्नाद्यादधावेदुपावर्त्तेतान्नाद्यमेवाभि॥ २॥

उपावर्त्तन्ते नक्तोषासेति कृष्णायै श्वेतवत्सायै पयसा जुहोत्यहरेवास्मै रात्रिं प्र दापयति रात्रिया अहः अहोरात्रे एवास्मै प्रते काममन्नाद्यं दुहाते राष्ट्रभृतो जुहोति राष्ट्रमेवावं रुन्धे षड्भिर्जुहोति षड्वै ऋतवः ऋतुष्वेव प्रति तिष्ठति भुवनस्य पते इति रथमुखे पञ्चाहुतीर्जुहोति वज्रो वै रथो वज्रेणैव दिशः॥ ३॥

अभि जयत्यग्निचितꣳ ह वै अमुष्मिन् लोके वातोऽभिपवते वातनामानि जुहोत्यभि एवैनममुष्मिन् लोके वातः पवते चीणि जुहोति चय इमे लोका एभ्य एव लोकेभ्यो वातमवं रुन्धे समुद्रोऽसि नभस्वानित्याहैतद्वै वातस्य रूपꣳ रूपेणैव वातमवं रुन्धेऽञ्जलिना जुहोति न ह्येतेषामन्यथा, आहुतिरवकल्पते* ॥ ४॥

ओषधयः सप्त। अभि। दिश। अन्यथा। द्वे च॥ ६॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयसप्तमोपपाठकस्य द्वादशानुवाकभाष्ये द्रष्टव्यम्।

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे चतुर्थप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

सुवर्गाय वै लोकाय देवरथो युज्यते यचाकूताय मनुष्यरथ एष खलु वै देवरथो यदग्निः अग्निं युनक्ति वसा घृतेनेत्याह युनक्त्येवैनꣳ स एनं युक्तः सुवर्गं लोकमभि . वहति यत्सर्वाभिः पञ्चभिर्युञ्जादयुक्तोऽस्याग्निः प्रच्युतः स्यादप्रतिष्ठिता आहुतयः स्युरप्रतिष्ठिता स्तोमा अप्रतिष्ठितान्युक्थानि तिसृभिः प्रातःसवनेऽभि मृशति चित्त्यै ॥ १ ॥

वै अग्निर्यावानेवाग्निस्तं युनक्ति यथानसि युक्ते आधीयते एवमेव तत् प्रत्याहुतयस्तिष्ठन्ति प्रतिस्तोमाः प्रत्युक्थानि यज्ञायज्ञियस्य स्तोत्रे द्वाभ्यामभि मृशति एतावान् वै यज्ञो यावानग्निष्टोमो भूमा तु वै* अस्य अत ऊर्ध्वः क्रियते यावानेव यज्ञस्तमन्ततोऽन्वारोहति द्वाभ्यां प्रतिष्ठित्यै एकया अप्रस्तुतं भवत्यथ ॥ २ ॥

अभिमृशति उपैनमुत्तरो यज्ञो नमति अधो स्तन्त्यै प्र वै एषोऽस्मात् लोकात् च्यवते योऽग्निं चिनुते न वै एतस्यानिष्टके आहुतिरव कल्पते यां वै एषोऽनिष्टके

---

* तु वै इत्यत्र त्वा इति आदर्शपुस्तकद्वयपाठः।

आहुतिं जुहोति स्रवति वै सा ताꣳ स्रवन्तीं यज्ञोऽनु परा भवति यज्ञं यजमानो यत्पुनश्चितिं चिनुते आहुतीनां प्रतिष्ठित्यै प्रत्याहुतय स्तिष्ठन्ति ॥ ३ ॥

न यज्ञः परा भवति न यजमानोऽष्टावुप दधाति अष्टाक्षरा गायत्री गायत्रेणैवैनं छन्दसा चिनुते यदेकादश त्रैष्टुभेन यद्द्वादश जागतेन छन्दोभिरेवैनं चिनुते नपात्को वै नामैषोऽग्निर्यत्पुनश्चितिर्य एवं विद्वान् पुनश्चितिं चिनुते आ तृतीयात् पुरुषादन्नमत्ति यथा वै पुनराधेयः एवं पुनश्चितिर्योऽग्न्याधेयेन न ॥ ४ ॥

क्रूम्रोति स पुनराधेयमाधत्ते योऽग्निं चित्वा न क्रूम्रोति स पुनश्चितिं चिनुते यत्पुनश्चितिं चिनुते क्रूध्यै अथो खल्वाहुः न चेतव्येति रुद्रो वै एष यदग्निः यथा व्याघ्रꣳ सुप्तं बोधयति तादृगेव तत् अथो खल्वाहुश्चेतव्येति यथा वसीयाꣳसमभागधेयेन बोधयति तादृगेव तन्मनुरग्निमचिनुत, तेन न आर्ध्नोत्स एतां पुनश्चितिमपश्यत् तामचिनुत तया वै स आर्ध्नोद्यत् पुनश्चितिं चिनुते क्रूध्यै* ॥ ५ ॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयसप्तमप्रपाठकस्य चयोदशानुवाकभाष्ये द्रष्टव्यम्।

चिदृत्। अथ। तिष्ठन्ति। अग्न्याधेयेन न। अचिनुत। सप्तदश च ॥ १० ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे चतुर्थप्रपाठके दशमोऽनुवाकः ॥०॥

छन्दश्चितं चिन्वीत पशुकामः पशवो वै छन्दांसि पशुमानेव भवति श्येनचितं चिन्वीत सुवर्गकामः श्येनो वै वयसाम्पतिष्ठः श्येन एव भूत्वा सुवर्गं लोकं पतति कङ्कचितं चिन्वीत यः कामयेत शीर्षण्वान् अमुष्मिन् लोके स्यामिति शीर्षण्वानेवामुष्मिन् लोके भवति अलजचितं चिन्वीत चतुःसीतं प्रतिष्ठाकामश्चतसृणां दिशां दिक्ष्वेव प्रति तिष्ठति प्रउगचितं चिन्वीत भ्रातृव्यवान् प्र ॥ १ ॥

एव भ्रातृव्यान्नुदते उभयतः प्रउगं चिन्वीत यः कामयेत प्र जातान् भ्रातृव्यान्नुदेय प्रति जनिष्यमाणानिति प्रैव जातान् भ्रातृव्यान्नुदते प्रति जनिष्यमाणान् रथचक्रचितं चिन्वीत भ्रातृव्यवान् वज्रो वै रथो वज्रमेव भ्रातृव्येभ्यः प्र हरति द्रोणचितं चिन्वीतान्नकामो द्रोणे वै अन्नं भियते सयोन्येवान्नमव रुन्धे समूह्यं चिन्वीत पशुकामः पशुमानेव भवति ॥ २ ॥

परिचाय्यं चिन्वीत ग्रामकामो ग्राम्येव भवति श्मशानचितं चिन्वीत यः कामयेत पितृलोके कृधुयामिति पितृलोके एव कृधोति विश्वामित्रजमदग्नी वसिष्ठेन अस्पर्धेतां स एता जमदग्निर्विहव्या अपश्यत् ता उपाधत्त ताभिर्वै स वसिष्ठस्येन्द्रियं वीर्यमवृङ्क्त यद्विहव्या उपदधाति इन्द्रियमेव ताभिर्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते होतुर्धिष्ण्ये उप दधाति यजमानायतनं वै ॥ ३ ॥

होता स्वे एवास्मै आयतने इन्द्रियं वीर्यमव रुन्धे द्वादशोप दधाति द्वादशाक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनव रुन्धेऽष्टौ अष्टौ अन्येषु धिष्ण्येषु उप दधाति अष्टाश्फाः पशवः पशूनेवाव रुन्धे षट् मार्जालीये षट् वै कृतव कृतवः खलु वै देवाः पितर कृतूनेव देवान् पितॄन् प्रीणाति* ॥ ४ ॥

प्र। भवति। यजमानायतनं वै। अष्टाचत्वारिꣳशच्च ॥ ११ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे चतुर्थप्रपाठके एकादशोऽनुवाकः ॥ ० ॥

---

* अस्यानुवाकस्य व्याख्यानं चतुर्थकाण्डीयसप्तमप्रपाठकस्य चतुर्दशानुवाकभाष्ये द्रष्टव्यम्।

पवस्व वाजसातय इत्यनुष्टुक् प्रतिपद्भवति त्रिष्टोऽनुष्टुभश्चतस्रो गायत्रीयो यत् त्रिष्टोऽनुष्टुभस्तस्मादश्वस्त्रिभिस्तिष्ठꣳस्तिष्ठति यच्चतस्रो गायत्रियः तस्मात् सर्वाꣳश्चतुरः पदः प्रतिदधत् पशायते[१] परमा वै एषा छन्दसां यदनुष्टुक् परमश्चतुष्टोमः स्तोमानां परमस्त्रिरात्रो यज्ञानां परमोऽश्वः पशूनां परमेणैवैनं परमतां गमयति[२] एकविꣳशमहर्भवति ॥ १ ॥

यस्मिन्नश्व आलभ्यते द्वादश मासाः पञ्च ऋतवस्त्रय इमे लोका असावादित्य एकविꣳश एष प्रजापतिः प्राजापत्योऽश्वस्तमेव साक्षाद् ऋध्नोति[३] शक्वरयः पृष्ठं भवन्ति अन्यत् अन्यच्छन्दोऽन्येऽन्ये वै एते पशव आ लभ्यन्ते उत इव ग्राम्या उत इव आरण्या यच्छक्वरयः पृष्ठं भवन्ति अश्वस्य सर्वत्वाय[४] पार्थुरश्मं ब्रह्मसामं भवति रश्मिना वै अश्वः ॥ २ ॥

यत ईश्वरो वै अश्वोऽयतोऽप्रतिष्ठितः परां परावतं गन्तोर्यत् पार्थुरश्मं ब्रह्मसामं भवति अश्वस्य यत्यै धृत्यै[५] संक्रत्यै अच्छावाकसामं भवति उत्सन्नयज्ञो वै एष यदश्वमेधः कस्तद्वेदेत्याहुर्यदि सर्वो वै क्रियते न वा सर्वः इति यत् संक्रति अच्छावाकसामं भवत्यश्वस्य सर्वत्वाय पर्य्याप्त्यै अनन्तरायाय[६] सर्वस्तोमोऽतिरात्र

उत्तममहर्भवति, सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति(७) ॥ ३ ॥

अहर्भवति। वै अश्वः। अहर्भवति। दश च ॥ १२ ॥

देवासुराः,-ते न। कृतव्याः। रुद्रः। अश्मन्। नृषदे वट्। उदेनं। प्राचीम्,—इति। वसोर्धाराम्। अग्निर्देवेभ्यः। सुवर्गाय,-यचाकूताय। छन्दश्चितं। पवस्व। द्वादश ॥ १२ ॥

देवासुराः (१।१)। अजायां (३।३)। वै गुमुष्टिः (५।३)। प्रथमो देवयताम् (७।२)। एतद्वै छन्दसाम् (८।५)। ऋध्नोति (१०।५)। अष्टौ पञ्चाशत्* ॥ ५८ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे चतुर्थप्रपाठके द्वादशोऽनुवाकः ॥ ० ॥

इति संहितापञ्चमाष्टके चतुर्थः प्रश्नः ॥

॥ ० ॥ हरिः ओम् ॥ ० ॥

यस्य विश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
प्रपाठके तु तार्तीये वर्णिताश्चितयोऽखिलाः।

---

* प्रथमे ४, द्वितीये ५, तृतीये ५, चतुर्थे ५, पञ्चमे ५, षष्ठे ५, सप्तमे ७, अष्टमे ६, नवमे ४, दशमे ५, एकादशे ४, एवं द्वादशे २। इति समष्टिः ५८।

चतुर्थे चितिसंस्कारः, द्वादशाचानुवाकाः ॥
इष्टका इन्द्रतन्वाख्या यज्ञतन्वाभिधास्तथा ।
नचचाख्यास्च विहिताः प्रथमेऽप्यनुवाकके ॥
ऋतव्या वैश्वदेव्यस्च द्वितीये प्राचणं तथा ।
शतरुद्रीयहोमस्तु तृतीये समुदीरितः ॥
परिषेचनमप्युक्तं तुर्ये तदद्विकर्षणम् ।
व्याघारणं वैश्वकर्मणाऽऽहुतिस्त्वाच पञ्चमे ॥
षष्ठे तु समिदाधानमग्निप्रणयनं तथा ।
होतान्वाहाप्रतिरथं दशर्चं सविकल्पकम्॥
सप्तमे चितिमारुह्य वह्निं तत्र विनिक्षिपेत् ।
वसोर्धाराष्टमे वाजप्रसवीयोऽप्यनन्तरे ॥
दशमे वह्नियोगास्च पुनश्चितिरितीरितः ।
एकादशे तु काम्यानि विहव्यास्च समीरिताः ॥
द्वादशे त्वग्नमेधीयस्तोत्रे* चयमुदारितम् ।
ऋक् स्तोमः साम चेत्येवं प्रपाठक उदीरितः ॥

तत्रादौ बहिष्पवमानस्तोत्रे चोदकप्राप्तां गायत्रीमपवदितुमन्यान्मन्त्रं विधत्ते,—"पवस्व वाजसातये इत्यनुष्टुक् प्रतिपद्भवति तिस्रोऽनुष्टुभस्तस्रो गायत्रियो यत् तिस्रोऽनुष्टुभस्तस्मादस्त्रिभिस्त्रिष्टुब्स्त्रिष्टति, यत्तस्रो गायत्रियस्तस्मात् सर्वाभ्यस्तुरः पदः प्रतिदधत् पलायते" इति । बहिष्पवमानस्तोत्रे प्राप्ते चयस्तृचा गायत्राः, तेऽत्र चोदकेन प्राप्ताः । तत्परित्यागेन 'पवस्व' इत्यादिका येयमनुष्टुक्,

* स्तोत्रचयमिति का० ज्यो० पुस्तके पाठः ।

'चतस्रो गायत्रियो' भवन्ति। तच्च यस्मात् स्वरूपेण तिस्रोऽनुष्टुभः, 'तस्माद्' अश्वो गमनं परित्यज्य एकत्र यदा तिष्ठति, तदा एकस्मिन् पादे भारमुपेक्ष्य त्रिष्वेषु पादेषु भारमवलम्ब्य तिष्ठति। यस्मादेता विभज्यमानाः 'चतस्रो गायत्रियः', तस्मात् पलायमानोऽश्वः 'चतुरः' पादात् सर्वानपि भूमौ प्रक्षिपन्नेव 'पलायते'।

प्रकारान्तरेणानुष्टुभं प्रशंसति,—"परमा वै एषा छन्दसां यदनुष्टुक् परमश्चतुष्टोमः स्तोमानां परमस्त्रिरात्रो यज्ञानां परमोऽश्वः पशूनां परमेणैवैनं परमतां गमयति[२]" इति। सर्ववागात्मकत्वात् छन्दसां मध्ये अनुष्टुभः परमत्वं, 'वाग्वै अनुष्टुप्'-इति ब्रह्मणः श्रुतं। 'स्तोमानां' त्रिवृदग्निष्टोमादीनां मध्ये प्रकृतत्वात् चतुष्टोमस्य परमत्वं। त्रिरात्रस्याश्वमेधस्य महापातकप्रायश्चित्तरूपत्वात् यज्ञानां मध्ये परमत्वं। तादृग्यज्ञसाधनत्वात् संग्रामजयहेतुत्वाच्च पशूनां मध्ये अश्वस्य परमत्वम्। एवं सति परमस्य त्रिरात्रस्य या परमे चतुष्टोमे परमस्याश्वस्य सम्बन्धित्वेनानुष्टुभि परमायां 'परमेणैवैनं' साधनसमूहेन 'परमतां' श्रैष्ठ्यतां* प्राप्नोति।

प्रकृतिप्राप्तान् त्रिवृदादिस्तोमान् बाधितुं स्तोमान्तरं विधत्ते,—एकविंशमहर्भवति यस्मिन्नश्व आलभ्यते द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंश एष प्रजापतिः प्राजापत्योऽश्वस्तमेव साक्षादाप्नोति[३]"—इति। एकविंशावृत्त्यात्मकेन स्तोमेन सर्वत्र युक्तं, न तु स्तोमान्तरेण तादृशमेकविंशमहः कर्त्तव्यम्। प्रथमतृतीययोरभ्यावृत्तये विधीयते,—'यस्मिन्' मध्यमे अहनि

* श्रेष्ठतामिति पाठो भवितुं युक्तः।

'अश्वः' 'आलभ्यते', तद् 'अष्टः' 'एकविंशं', अश्वो हि उक्थसंज्ञके द्वितीयेऽहनि आलभ्यते, मासर्तुलोकादित्यानां एकविंशतिसङ्ख्योपेतत्वात्, जगद्रूपेण प्रजापतिशरीरत्वात्, अश्वस्य प्रजापतिजन्यत्वाच्च तस्याश्वस्य सम्पद्यर्थमयमेकविंशतिस्तोमो युक्तः।

अथ पृष्ठस्तोत्रगतानामृचां छन्दोऽन्तरं वारयितुं शक्वर्याख्यं छन्दो विधत्ते,—"शक्वरयः पृष्ठं भवत्यन्यदन्यच्छन्दोऽन्येऽन्ये वा एते पशव आलभ्यन्ते उतेव ग्राम्या उतेवारण्या यच्छक्वरयः पृष्ठं भवन्यश्वस्य सर्वत्वाय(४)"—इति। शक्वरीछन्दोपेता ऋचः 'शक्वरयः', ताभिर्युक्तं पृष्ठस्तोत्रं कुर्यात्। सप्तपादात्मके शक्वर्यात्मके छन्दसि पादत्रयात्मकं गायत्र्याख्यं छन्दः, पादचतुष्टयात्मकं त्रिष्टुभाख्यं छन्दः, पादपञ्चकात्मकं पङ्क्त्यात्मकं छन्दः;—इत्येवं 'अन्यदन्यत्' नानाविधं छन्दः, अन्तर्भवति, अश्वमेधेऽपि अश्वप्रधानके 'अन्येऽन्ये' नानाजातीया एव पशव आलभ्यन्ते। तत्र केचन ग्राम्या एव, केचन आरण्या एव, तत्रापि अवान्तरभेदा बहुधा द्रष्टव्या। एवं सर्वपृष्ठस्तोत्रे अश्वमेधसम्बन्धिनि नानाछन्दोगर्भितशक्वरीस्वीकरे सति मुख्यस्याश्वस्य सर्वपश्वात्मकत्वं सम्पादितं भवति।

अथ षोडकप्राप्तं सामान्तरमपवदितुं सामविशेषं विधत्ते,—"पार्थुरश्मं ब्रह्मसामं भवति रश्मिना वै अश्वो यत ईश्वरो वै अश्वोऽयतोऽप्रतिष्ठितः पराञ्परावतं गन्तार्यत्पार्थुरश्मं ब्रह्मसामं भवत्यश्वस्य यत्यै धृत्यै(५)"—इति। पृथुरश्मिना महर्षिणा दृष्टं साम 'पार्थुरश्मं', ब्रह्मणस्त्विजमभिलक्ष्य गीयमानं साम 'ब्रह्मसामं', तच्च नात्र प्रकृतं कार्यं, किन्तु पार्थुरश्मं कार्यं। 'यस्मात्' कारणात् 'रश्मिना' रज्जुविशेषेण दृढभूतः 'अश्वः' पुरुषम् अपेक्षितदेशे नेतुं 'ईश्वरः' समर्थः, यस्माच्च

कारणात् 'अयतो' नियमनरहितोऽश्वः क्वापि 'अप्रतिष्ठितः' सन् अत्यन्तं दूरं गन्तुं समर्थः; तस्मात् अश्वस्य 'यत्यै' दूरगमननियमनाय, उपरितनपुरुषेण धारणाय च 'पार्ष्ण्यग्रं' कार्यं। तथैव अच्छावाकं प्रतिगातव्यं सामविशेषं विधत्ते,—"संकृत्यच्छावाकसामं भवति उत्सन्नयज्ञो वै एष यदश्वमेधः कस्तदेदेत्याऽऽर्त्यदि सर्वो वै क्रियते न वा सर्व इति, यत् संकृत्यच्छावाकसामं भवति अश्वस्य सर्वत्वाय पर्याप्त्यै अनन्तरायाय(१)"—इति। समीचीना आकृतिर्यस्य सामस्तत् 'संकृति', विकलमङ्गं सम्यक् कर्तुं समर्थमित्यर्थः। एतन्नामकं सामगानां यत् प्रसिद्धं तत् अच्छावाकमभिलक्ष्य गातव्यं। योऽयमश्वमेधः क्रतुः, सोऽयं विनष्टयज्ञावयवैर्बहुभिरवयवैरुपेतत्वात् छत्र्योऽयुमवयवसङ्घातः* क्रियते; क्वचित् किञ्चिदवयवोऽतिविस्मृतो वा इति को नाम लोके वेत्ति, तस्मात् संकृतिगानेन अश्वसम्बन्धिनः क्रतोः सर्वावयवसाकल्यं भवति, तच्च देवानां संपूर्त्यै यजमानस्य च स्वर्गप्राप्तिविघ्नपरिहाराय सम्पद्यते।

अपेक्षितविशेषगुणैर्युक्तं द्वितीयमहर्विधाय अथ तृतीयमहर्विधत्ते, —"सर्वस्तोमोऽतिरात्र उत्तममहर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति(२)"—इति। चिरदाद्याः रात्रयस्त्रिंशद् अत्र† आम्नाताः, सर्वेऽपि स्तोमा यस्मिन्नतिरात्रे सन्ति, सोऽयमतिरात्रः तृतीयदिवसे कर्त्तव्यः। तच्च स्तोमगतं सर्वत्वं स्वेन पूर्वमप्राप्तस्य सुखतोऽपि,‡ प्राप्त्यै भवति यस्तु वैरी पूर्वमजितः तस्य सर्वस्यापि

* सन्धानः इति का० क्री० पु० पाठः।
† चिरदाद्याररात्रयस्त्रिंशदन्ता इति आदर्शपुस्तकपाठः।
‡ सुखतोऽपि सर्व्वस्य इति का० क्री० पु० पाठः।

विजयाय भवति, तस्मादयं यजमानः तेन सर्वस्तोमेन प्राप्नुयं धनादिकं सर्वं प्राप्नोति, जेतव्यं वैरिवर्गं जयति ॥

वेदार्थस्य प्रकाशेन तमो हार्दं विनाशयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे चतुर्थप्रपाठके द्वादशोऽनुवाकः ॥०॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-श्रीवीरबुक्क-भूपालसाम्राज्यधुरन्धरेण सायनाचार्येण विरचिते माधवीये वेदार्थ-प्रकाशनामकतैत्तिरीययजुःसंहिताभाष्ये पञ्चमकाण्डे चतुर्थः प्रपाठकः संपूर्णः ॥०॥

॥०॥ ॐ तत्सत् ॥०॥

॥०॥ श्रीगणेशाय नमः ॥०॥

तैत्तिरीयसंहिताभाष्ये ।

पञ्चमकाण्डे पञ्चमप्रपाठके

प्रथमोऽनुवाकः ।

हरिः ओम् ।

यदेकेन संस्थापयति यज्ञस्य सन्तत्यै अविच्छेदाय[१] ऐन्द्राः पशवो ये मुष्कराः यदैन्द्राः सन्तोऽग्निभ्य आलभ्यन्ते देवताभ्यः समदं दधात्याग्नेयीस्त्रिष्टुभौ याज्यानुवाक्याः कुर्यात् यदाग्नेयीस्तेनाग्नेया यस्त्रिष्टुभः तेन ऐन्द्राः समृद्ध्यै न देवताभ्यः समदं दधाति[२] वायवे नियुत्वते तूपरमा लभते तेजोऽग्नेर्वायुस्तेजस एष आ लभ्यते तस्मात् यद्रियङ् वायुः ॥ १ ॥

वाति तद्रियं अग्निर्दहति स्वमेव तत्तेजोऽन्वेति[३] यन्न नियुत्वते स्यात् उन्माद्येत् यजमानो नियुत्वते भवति यजमानस्यानुन्मादाय[४] वायुमती श्वेतवती याज्यानुवाक्ये भवतः सतेजस्त्वाय[५] हिरण्यगर्भः समवर्त्तताग्रे

इत्याघारमा घारयति प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाय[१] सर्वाणि वै एष रूपाणि पशूनां प्रत्या लभ्यते यत् श्मश्रुणस्तत् ॥ २ ॥

पुरुषाणाꣳ रूपं यत्तूपरस्तदश्वानां यदुन्यतोऽदन् तन्नवां यदव्या इव शफास्तदवीनां यदजस्तदजानां[२] वायुर्वै पशूनां प्रियन्धाम यद्वाय्यो भवत्येतमेवैनमभि संज्ञानानाः पशव उप तिष्ठन्ते[३] वाय्यः कार्याः। प्राजापत्या इत्याहुर्यद्वाय्यं कुर्यात् प्रजापतेरीयाद् यत् प्राजापत्यं कुर्याद्वायोः ॥ ३ ॥

इयाद्यद्वाय्यः पशुर्भवति तेन वायोरनैति यत् प्राजापत्यः पुरोडाशो भवति तेन प्रजापतेरनैति यद् द्वादशकपालस्तेन वैश्वानरान्नैति[४] आग्नावैष्णवमेकादशकपालं निर्वपति दीक्षिष्यमाणोऽग्निः सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञञ्च आरभते[५] अग्निरवमो देवतानां विष्णुः परमो यदाग्नावैष्णवमेकादशकपालं निर्वपति देवताः ॥ ४ ॥

एवोभयतः परिगृह्य यजमानोऽव रुन्धे[६] पुरोडाशेन वै देवा अमुष्मिꣳल्लोके आर्धुवन् चरुणाऽस्मिन् यः कामयेतामुष्मिन् लोके ऋध्नुयामिति स पुरोडाशं कुर्वीत अमुष्मिन्नेव लोके ऋध्नोति[७] यदृष्टाकपालस्तेनाग्नेयो

यस्त्रिकपालस्तेन वैष्णवः समृद्ध्यै[१२] यः कामयेतास्मिन् लोके कनीयानिति स चरुं कुर्वीतानेर्धृतं विष्णोस्तण्डुलास्तस्मात् ॥ ५ ॥

चरुः कार्योऽस्मिन्नेव लोके कनीयो भवति[१४] आदित्यो भवति द्रुयं वै अदितिरस्यामेव प्रतितिष्ठत्यथो अस्यामेवाधि यज्ञं तनुते[१५] यो वै संवत्सरमुखमभृत्वाऽग्निं चिनुते यथा सामिगर्भोऽवपद्यते तादृगेव तद् आर्त्तिमा कनीयेद् वैश्वानरं द्वादशकपालं पुरस्तात् निर्वपेत् संवत्सरो वै अग्निर्वैश्वानरो यथा संवत्सरमाप्ता ॥ ६ ॥

काले आगते विजायते एवमेव संवत्सरमाप्ता काले आगतेऽग्निं चिनुते नार्त्तिमार्च्छति[१६] एषा वै अग्नेः प्रिया तनूर्यद् वैश्वानरः प्रियामेवास्य तनुवमव रुन्धे[१७] चीर्णेतानि हवींषि भवन्ति चय इमे लोका एषां लोकानाꣳ रोहाय[१८] ॥ ७ ॥

यद्रियङ् वायुः । प्रमश्रुणस्तत् । वायोः । निर्वपति देवताः । तस्मात् । आप्ता । अष्टाचिꣳशच्च ॥ १ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके प्रथमोऽनुवाकः ॥ ० ॥

श्रीगणेशाय नमः ।

यस्य विश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
मन्त्राणां ब्राह्मणं प्रोक्तं प्रपाठकचतुष्टये।
अथ प्रश्नत्रये तत्र श्रिष्टमङ्गं विविच्यते ॥

प्रथमप्रपाठके "एकविꣳशत्या माषैः" इत्यस्मिन्ननुवाके(८) "अग्निभ्यः पशूनालभते" इति विधाय अन्येषां पशूनां पर्यग्निकृतानामुत्सर्गमुक्त्वा "प्राजापत्येन सꣳस्थापयति" इति यदुक्तं तदनुस्मारयितुमनुवदति,—"यदेकेन सꣳस्थापयति यज्ञस्य सन्तत्यै अविच्छेदाय(१)" इति । इतरान् पशूनुत्सृज्य प्राजापत्येनैकेन समापनं यत् तत् प्रारब्धस्य पशुकर्मणः सान्तत्याय भवति, असमापने तु विच्छेदः स्यात् ।

अथ तस्मिन् कर्मणि मन्त्रविशेषं विधत्ते,—"ऐन्द्राः पशवो ये मुष्करा यदैन्द्राः सन्तोऽग्निभ्य आलभ्यन्ते देवताभ्यः समदं दधाति आग्नेयीस्त्रिष्टुभो याज्यानुवाक्याः कुर्याद्यदाग्नेयीस्तेनाग्नेया यत्त्रिष्टुभस्तेनैन्द्राः सम्पद्यै न देवताभ्यः समदं दधाति(२)" इति । 'ये' लोकेषु 'मुष्कराः' अण्डसहिताः पशवः सन्ति, ते सर्वे पुंस्त्वलक्षणयेन्द्रियवृद्ध्या युक्तत्वात् इन्द्रदेवताकाः, तादृशानां अन्यथालम्भने देवतानां कलहं सम्पादयेत्, अतः कलहपरिहाराय अग्निदेवताकाः त्रिष्टुप्छन्दस्काः ऋचः याज्यानुवाक्याः कुर्यात्, तथा सति ऋचामाग्नेयत्वेन पशवोऽप्याग्नेयाः सम्पद्यन्ते, त्रिष्टुभः इन्द्रेण सह उत्पन्नत्वात् तेन छन्दसा पशव ऐन्द्रा अपि सम्पद्यन्ते, तदुभयं मिलित्वा कलहं परिहृत्य 'सम्पद्यै' सम्पद्यते । यदुक्तं सूत्रकारेण,—'अपि वा सर्वेषामेतेषां

स्थाने वायवे नियुत्वते श्वेतमजन्तूपरमालभते वायुमती वपाया श्वेतवती याज्यानुवाक्ये' इति। तमिमं पक्षं विधत्ते,—"वायवे नियुत्वते तूपरमा लभते तेजोऽग्नेर्वायुस्तेजस एष आ लभ्यते तस्मात् यद्रियङ्वायुर्वाति तद्रियं अग्निर्दहति स्वमेव तत् तेजोऽभ्येति"(२) इति। नियुत्मन्तः अश्वविशेषा यस्य वायोः सन्ति सोऽयं नियुत्वान्। तूपरः मूत्रङ्गरहितः। अग्निज्वालायाः उद्बोधकत्वात् 'वायुः' एव 'अग्नेः' 'तेजः'; तस्मात् 'तेजसः' 'एषः' तूपर आलभ्यो भवति। यां दिशं प्रतिगच्छतीति 'यद्रियङ्' वायुः यद्दिगभिमुखो वाति, तद्दिगभिमुख एव "अग्निर्दहति'। तेन दहनेन स्वकीयमेव तेजः अनुगतवान् भवति। 'नियुत्वते' इत्येतद्वायुविशेषणम्।

अन्वयव्यतिरेकाभ्यां प्रशंसति,-"यन्न नियुत्वते स्यादुन्माद्येद् यजमानो नियुत्वते भवति यजमानस्यानुन्मादाय"(३) इति। वायोर्नियामकात्मनाभावे सति यजमानोऽपि नियामकबुद्धिरहितः सन् उन्मत्तः यत्र-क्वापि गच्छेत् यत्किञ्चिद्वा वदेत्, अतस्तत्परिहाराय नियुत्वद्विशेषणं।

वायोरपेक्षितं मन्त्रविशेषं विधत्ते,—"वायुमती श्वेतवती याज्यानुवाक्ये भवतः सतेजस्त्वाय"(४) इति। 'पीवोन्नाꣳ रयिवृध' इत्यृचौ वायुमत्यौ श्वेतवत्यौ च, 'ते वायवे समनसः' इति वायुशब्दसद्भावात्, 'श्वेतः सिषक्ति' इति श्वेतशब्दसद्भावाच्च। वायोरग्नितेजस्त्वात् पशूश्वेत्यस्य च तेजोरूपत्वात् तदुभयं सतेजस्त्वाय सम्पद्यते।

द्वितीयाघारे प्राकृतमन्त्रं बाधितुं विधत्ते,—'हिरण्यगर्भः समवर्तताग्रे इत्याघारमा घारयति प्रजापतिर्वै हिरण्यगर्भः प्रजा-

पतेरनुरूपत्वाय"(९) इति। हिरण्यं ब्रह्माण्डरूपं यस्येश्वरस्य प्रजापतेर्गर्भे वर्तते, सोऽयं हिरण्यगर्भः, यदा हिरण्यस्य ब्रह्माण्डस्य मध्ये सत्यलोके गर्भरूपत्वेनावस्थितः चतुर्मुखो हिरण्यगर्भः, अतोऽयं मन्त्रः प्रजापतेरनुरूपः।

पशूंश्च प्रशंसति,—"सर्वाणि वै एष रूपाणि पशूनां प्रत्यालभ्यते यत् श्मश्रुणस्तत्पुरुषाणाꣳ रूपं यत्नूपरस्तदश्वानां यदन्यतोदन् यद्गवां यदव्या इव श्मफास्तदवीनां यदजस्तदजानाम्"(७) इति। पशूनां द्विपदां* च यानि रूपाणि सन्ति, तानि सर्वाणि प्रति तद्रूपत्वेनैव पशुरालभ्यते, तत्र 'यत्'† श्मश्रुयुक्तत्वेन द्विपदा पुरुषेण साम्यं, गुह्यरहितत्वेनाश्वस्य साम्यं, अधस्तनपङ्क्तावेव दन्तसद्भावेन गोसाम्यम्, अविसदृशैः क्षुद्रकैः द्विखुरैरुपेतत्वात् अविसाम्यम्, अजजात्या सर्वेषामजानां साम्यम्।

अथ वायुदेवतां प्रशंसति,—"वायुर्वै पशूनां प्रियन्धाम यद्वायव्यो भवत्येतमेवैनमभि सञ्जानानाः पशव उप तिष्ठन्ते"(८) इति। पशूनां प्रावरणरहितत्वेन सञ्चरणाद्, 'वायुः' 'प्रियन्धाम' अतः पशोर्वायव्यत्वे सति 'एनं' वायुमभिलक्ष्य सम्यक् स्वकीयं धाम जानन्तः पशवः प्राप्यन्ते।

अत्र मीमांसया निर्णेतुं कञ्चिदर्थविशेषमनुष्टेयं विधत्ते,—"वायव्यः कार्यः प्राजापत्या इत्याऊर्यद्वायव्यं कुर्यात् प्रजापतेरियात् यत्प्राजापत्यं कुर्यादायोरियाद्यद्वायव्यः पशुर्भवति तेन वायोर्नैति

---

* "द्विपदां चतुष्पदानां" इति आदर्शपुस्तकेऽधिकः पाठः।

† अत्र यदिति पदं तत्पदं विना साकाङ्क्षमिति यत्पदं लिपिकरप्रमादादुद्धृतमिव प्रतिभाति।

यत्प्राजापत्यः पुरोडाशो भवति तेन प्रजापतेर्नैति यद् द्वादशकपालस्तेन वैश्वानरान्नैति"(९) इति। पशोर्वायव्यत्वे सति अयं पशुः प्रजापतेः अपेयात्, प्राजापत्ये सति वायोरपेयात्। एवमपि अन्यदप्यध्याहर्त्तव्यं, पक्षद्वयेऽपि वैश्वानरादप्यपेयात् वैश्वानरसम्बन्धित्वे ताभ्यामपेयादिति प्रथमपक्षोपन्यासेऽपि वैश्वानरादित्यपि तृतीयः पक्षोऽध्याहर्त्तव्यः, तत्रायं निर्णयः,—पशुर्वायव्यः, पशुपुरोडाशः प्राजापत्यः, तस्य द्वादशकपालत्वं वैश्वानरसम्बन्धि, तेन देवतात्रयाणि अपैति इति।

यदुक्तं सूत्रकारेण,—'यत्प्राक् दीक्षणीयायास्तत्कृत्वा त्रिहविषं दीक्षणीयां निर्वपति वैश्वानरं द्वादशकपालं तृतीयं पुरस्तादमावास्यस्य' इति। अत्राग्नावैष्णवमेकादशकपालम्, आदित्यं चारुं हित्वा वैश्वानरस्य तृतीयत्वम्। तत्र प्रथमं हविर्विधत्ते। "आग्नावैष्णवमेकादशकपालं निर्वपति दीक्षिष्यमाणोऽग्निः सर्वा देवता विष्णुर्यज्ञो देवतास्वेव यज्ञं प्रतिष्ठापयति"(१०) इति। अग्नेः सर्वदेवतारूपत्वं सोमप्रकरणे स्पष्टमाम्नातम्,—'ते देवा विभ्यतोऽग्निं प्राविशन् तस्मादाहुरग्निः सर्वा देवताः' इति। यज्ञस्य सर्वाङ्गव्यापित्वात् विष्णुत्वम्, अतः एतद्धविषा सर्वा देवता यज्ञं च उपक्रान्तवान् भवति।

प्रकारान्तरेण देवतात्रयं प्रशंसति,—"अग्निरवमो देवतानां विष्णुः परमो यदाग्नावैष्णवमेकादशकपालं निर्वपति देवता एवोभयतः परिगृह्य यजमानोऽवरुन्धे"(११) इति। मन्त्राणां मध्ये प्रथममन्त्रे 'भूरग्निर्ज्योतिः' इत्युक्तत्वात् अग्नेरवमत्वं चरममन्त्रे 'विष्णोर्नुकम्' इत्युक्तत्वाद्विष्णुः परमः; अतः आग्नावैष्णवनिर्वापेण मध्यवर्तिनीः सर्वा देवताः उभयतः परिगृह्य स्वाधीनाः करोति।

कामनाविशेषेण पुरोडाशं विधत्ते,—"पुरोडाशेन वै देवा असुस्मिन् लोके आर्ध्नुवन् चरुणाऽस्मिन् यः कामयेतामुस्मिन् लोके ऋध्नुयामिति स पुरोडाशं कुर्वीत अमुस्मिन्नेव लोके ऋध्नोति[११] इति।

अथ कपालगतामेकादशसङ्ख्यां विभज्य प्रशंसति,—"यदष्टाकपालस्तेनाग्नेयो यच्चिकपालस्तेन वैष्णवः सम्पद्यै,—"[१२] इति। अन्यच्च हि 'आग्नेयमष्टाकपालं निर्वपति' इत्युक्तत्वादष्टसङ्ख्या अग्नेः प्रिया। तथा 'वैष्णवं चिकपालम्' इत्युक्तत्वात् चिसङ्ख्या विष्णोः प्रिया। तदुभयं 'सम्पद्यै' भवति।

फलविशेषाय चरुं विधत्ते,—"यः कामयेतास्मिंल्लोके ऋध्नुयामिति स चरुं कुर्वीताग्नेर्घृतं विष्णोस्तण्डुलास्तस्माच्चरुः कार्योऽस्मिन्नेव लोके ऋध्नोति"[१४] इति। 'घृतम्' 'अग्नेः', 'घृतमस्य योनिर्घृतः श्रितः' इत्यादिमन्त्रवर्णात्। तण्डुलास्तु विष्णोः प्रियाः, 'येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय' इति श्रुतेः। तस्मादुभयप्रियत्वात् घृतयुक्तश्चरुः कार्यः, एतेनास्मिन् लोके सम्पद्यो भवति।

अथ हविरन्तरं विधत्ते,—"आदित्यो भवतीयं वा अदितिरस्यामेव प्रतितिष्ठत्यथो अस्यामेवाधियज्ञं तनुते"[१५] इति। अदितिर्देवता यस्य चरोः सोऽयमादित्यः, आग्नावैष्णवं हविः प्रथमं श्रुत्वा द्वितीयहविष्टेन अयमादित्यश्चरुः कार्यः। अदितिशब्देनेयमेव भूमिरुच्यते अस्यामेव भूमौ उपरि यज्ञं ततवान् भवति, भूमौ प्रतिष्ठितश्च भवति।

अथ तृतीयं हविर्विधत्ते,—"यो वै संवत्सरमुख्यमभृत्वाग्निं चिनुते यथा सामिगर्भोऽवपद्यते तादृगेव तदार्तिमा ऋच्छेद्वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेत् संवत्सरो वै अग्निर्वैश्वानरो यथा संवत्सरमाप्त्वा काले

आगते विजायते एवमेव संवत्सरमाप्त्वा काले आगतेऽग्निं चिनुते नार्तिमार्च्छति"(१६) इति । उक्त्यस्याग्नेः संवत्सरधारणं उपरिष्टात् विधास्यति 'संवत्सरमुख्यं भूत्वा' इति। तेन च धारणेन विना, अग्निचयन-मपरिपक्वगर्भपातेन समानम्, अतो यजमानो म्रियते । तत् तस्मात् संवत्सरं धारयितुम् अशक्तः, पुमान् संवत्सरात् प्रागेव तिस्रः षट् द्वादश वा रात्रीः दीक्षाः चिकीर्षुः वैश्वानरं द्वादशकपालं निर्वपेत् तस्य च वैश्वानरस्याग्नेः संवत्सररूपत्वात् यथा लोके संवत्सरेण पूर्णो गर्भो काले सुखेन जायते एवमपि अनयेष्ट्या संवत्सरं प्राप्य काले प्राप्ते चितवान् भवति ततो न म्रियते ।

प्रकारान्तरेण प्रशंसति —"एषा वा अग्नेः प्रियस्य तनूर्यद्वैश्वानरः प्रियामेवास्य तनुवं रुन्धे"(१७) इति । सर्वेषां पुरुषाणां उपकारकः कश्चिदग्निमूर्त्तिविशेषो वैश्वानरः, सा च मूर्तिः 'अग्नेः' 'प्रियं' शरीरं, ततः तयेष्ट्या अग्निसम्बन्धिनीं प्रियामेव तनुवं प्राप्नोति ।

विहितानां हविषां चित्वं प्रशंसति,—"त्रीण्येतानि हवींषि भवन्ति त्रय इमे लोका एषां लोकानाम् रोहाय"(१८)—इति । प्राप्तये इत्यर्थः । यद्यपि आग्नावैष्णवं हविः प्रकृतावपि विद्यमान-त्वाच्चोदकप्राप्तं, तथापि उपरितनहविर्विधानायायमनुवाद इत्य-विरोधः । सेयं दीक्षणीयेष्टिः 'षड्भिर्दीक्षयति' इत्येतस्मादनुवाकात् पूर्वं द्रष्टव्या । प्रकृतौ दीक्षाऽऽतीनां इष्यनन्तरभावित्वात् । यत्तु, 'इष्यमन्तरं प्रतिमुञ्चते' इति विहितं,* उपरितने 'न ह स्म वै पुराग्निः' इत्येतस्मिन्ननुवाके समाम्नातम् ।

---

* अत्र 'तत्' इति पदमपेक्षितमिव प्रतिभाति ।

तत्रेयं मीमांसा,—

"पञ्चमाध्यायस्य द्वितीयपादे चिन्तितम्। (१२अधि०),—

"चयने रुक्माभृत्यादिः पुरोत स्वामिसंज्ञितिः।
पाठादाद्योऽन्तिमः कृप्तः क्रमात्पाठस्य न क्षतिः॥

अग्निचयने दीक्षणीयादेरूर्द्धं रुक्माधारणमाम्नातम्, कण्ठे-धृतः सन्नुरसि लम्बमानः सौवर्ण आभरणविशेषो रुक्मशब्दार्थः। उखास्थितो ऽग्निः अग्नेऽवस्थापितः कण्ठे धार्यमाणो यथा उरःप्रदेशं न दहति, तथा व्यवधायकत्वेन तद्धारणम्। अत एव ब्राह्मणम्—'रुक्ममन्तरं प्रतिमुञ्चतेऽमृतमेव मृत्योरन्तर्धत्ते' इति। यजमानसंस्काराश्च वपनादयः प्रकृतौ दीक्षणीयानन्तरभाविनः, इह चोदकेन प्राप्ताः, तेभ्यः पूर्वमेव रुक्मप्रतिमोकः पदार्थः कार्यः, तस्य प्रत्यक्षपाठात् सावित्रादिषु तस्मादृतत्वादिति चेत्। मैवम्, यजमानसंस्काराणां दीक्षणीयानन्तर्यं प्रकृतौ क्लृप्तं, रुक्मस्य तु पाठेन तत्कल्पनीयम्। तस्मात् संस्काराः पूर्वभाविनः। न च, सावित्रदृष्टान्तो युज्यते, दीक्षणीयाया इव संस्काराणां प्रतिमोकादूर्द्धं पुनःपाठात्, न च, दीक्षणीयानन्तर्यं बोधिते रुक्मप्रतिमोकपाठवैयर्थ्यं, स्वरूपबोधनेन चरितार्थत्वात्। ततो रुक्मप्रतिमोकः पश्चात्कार्यः।

चतुर्थाध्यायस्य चतुर्थपादे (६अ०) चिन्तितम्,—


नित्यो नैमित्तिको वा स्याद्यागो वैश्वानरश्रितौ।
नित्यः पुरेव यच्छब्दादविरोधाच्च पश्चिमः॥

अग्निचयने श्रूयते,—"यो वै संवत्सरमुख्यमभृत्वाग्निं चिनुते यथा सामिगर्भोऽवपद्यते तादृगेव तदार्तिमार्च्छेदैश्वानरं द्वादशकपालं पुर-

स्थाग्निर्वपेत्" इति। उखा पीठरः, तामुखां "युञ्जानः प्रथमं मनः" इत्यादिप्रपाठकाख्यातैर्मन्त्रैः सम्पाद्य, तस्यामुखायामग्निं निधाय षडुखामेव द्वादशोखामेव शिक्ये* तामुखामवस्थाप्य तच्छिक्यं स्वकण्ठे बध्वा तम् उखमग्निं संवत्सरं भृत्वा पश्चादिष्टकाभिरग्निश्चेतव्यः, अभरणे त्वपूर्णगर्भपातवद्विनाशः स्यात्। ततो वैश्वानरेष्टिं वपनात् प्रागेव कुर्यादित्यर्थः। अत्रापि अन्नरायवाक्यवद् अभरणवाक्यस्यार्थवादत्वान्नित्या वैश्वानरेष्टिरिति चेत्। मैवं, 'यः पुमान् भृत्वा चिनुते स निर्वपेद्' इति कर्तृसमानाधिकृत-यच्छब्दवशादभरणेष्टेर्नैमित्तनैमित्तिकभावावभासात्। किञ्च दर्शपूर्णमासस्थ नित्यस्य पाक्षिकत्वरूपं नैमित्तिकत्वं विरुद्धम्। इह तु नित्यत्वे प्रमाणाभावादेव नैमित्तिकत्वमित्यविरोधः॥

वेदार्थस्य प्रकाशेन तमो हार्दं विनाशयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके प्रथमोऽनुवाकः॥०॥



प्रजापतिः प्रजाः सृष्ट्वा प्रेणानु प्राविशत्ताभ्यः पुनः सम्भवितुं नाशक्नोत् सोऽब्रवीद् ऋध्नवदित्स यो मा इतः पुनः सञ्चिनवदिति तं देवाः समचिन्वन् ततो वै ते

* 'अग्निक्ये' इति सर्वत्र पाठो न सम्यगिव प्रतिभाति।

आर्भ्नन् यत्समचिन्वन् तच्चित्यस्य चित्यत्वम्[१] य एवं विद्वानग्निं चिनुते कृत्स्नोत्येव[२] कस्मै कमग्निश्चीयते इत्याहुरग्निवान् ॥ १ ॥

असानीति वै अग्निश्चीयतेऽग्निवानेव भवति[३] कस्मै कमग्निश्चीयते इत्याहुर्देवा मा वेदन्निति वै अग्निश्चीयते विदुरेनं देवाः[४] कस्मै कमग्निश्चीयते इत्याहुर्गृह्णीयासानीति वै अग्निश्चीयते गृह्णीव भवति[५] कस्मै कमग्निश्चीयते इत्याहुः पशुमानसानीति वै अग्निः ॥ २ ॥

चीयते पशुमानेव भवति[६] कस्मै कमग्निश्चीयते इत्याहुः सप्त मा पुरुषा उप जीवानिति वै अग्निश्चीयते चयः प्राच्यः चयः प्रत्यच्च आत्मा सप्तम एतावन्त एवैनमुष्मिन् लोके उप जीवन्ति[७] प्रजापतिरग्निमचिकीषत् तं पृथिव्यब्रवीत् न मय्यग्निं चेष्यसेऽति मा धक्ष्यति सा त्वातिदह्यमाना वि धविष्ये ॥ ३ ॥

स पापीयान् भविष्यसीति सोऽब्रवीत् तथा वै अहं करिष्यामि यथा त्वा नातिधक्ष्यतीति स इमामभ्यमृशत् प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद् ध्रुवासीदेतीमामेवेष्टकां कृत्वोपाधत्तानतिदाहाय[८] यत् प्रत्यग्निं चिन्वीत तदभि मृशेत् प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद् ध्रुवा सीद् ॥ ४ ॥

इमामेवेष्टकां कृत्वोप धत्तेऽनतिदाहाय[९] प्रजापतिरकामयत प्र जायेयेति स एतमुख्यमपश्यत्तꣳ संवत्सरमबिभस्ततो वै स प्राजायत तस्मात् संवत्सरं भार्यः प्रैव जायते[१०] तं वसवोऽब्रुवन् प्र त्वमजनिष्ठा वयं प्र जायामहै इति तं वसुभ्यः प्रायच्छत्तं चीण्यहानि अबिभरुस्तेन ॥ ५ ॥

चीणि च शतानि असृजन्त त्रयस्त्रिꣳशच्च तस्मात् त्र्यहं भार्यः प्रैव जायते तान् रुद्रा अब्रुवन् प्र यूयमजनिढ्वं वयं प्र जायामहै इति तꣳ रुद्रेभ्यः प्रायच्छन्तꣳ षडहानि अबिभरुस्तेन चीणि च शतानि असृजन्त त्रयस्त्रिꣳशच्च तस्मात् षड्हं भार्यः प्रैव जायते तानादित्या अब्रुवन् प्र यूयमजनिढ्वं वयं ॥ ६ ॥

प्र जायामहै इति तमादित्येभ्यः प्रायच्छन्तं द्वादशाहानि अबिभरुस्तेन चीणि च शतानि असृजन्त त्रयस्त्रिꣳशच्च तस्मात् द्वादशाहं भार्यः प्रैव जायते[११] तेन वै ते सहस्रमसृजन्तोखाꣳ सहस्रतमीम्[१२] य एवमुख्यꣳ साहस्रं वेद प्र सहस्रं पशून्नाप्नोति ॥ ७ ॥

अग्निवान्। पशुमानसानीति वै ऋग्निः। धविष्ये। इत्येत् प्रजापतिरेवा सादतु तया देवतयाऽङ्गिरस्वद्

भ्रवा सीद्। तेन। तानादित्या अब्रुवन् प्र यूयमजनिढ्वं वयं। चत्वारि॒ꣳशच्च ॥ २ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥०॥

दीक्षणीयेष्टिराद्यानुवाके चिद्विरीरिता।

अथ द्वितीये चयन-तत्फले अभिधीयेते। तत्रादौ चयनं विधातुं प्रस्तौति,—"प्रजापतिः प्रजाः सृष्ट्वा प्रेणानु प्राविशत् ताभ्यः पुनः सम्भवितुं नाशक्नोत्सोऽब्रवीद्भ्रवदित्सं यो मेतः पुनः संचिनवदिति तं देवाः समचिन्वन् ततो वै ते आर्ध्नुवन् यत्समचिन्वन्तत् चित्यस्य चित्यत्वम्"(१) मिति। पुरा कदाचित् प्रजापतिः सर्वाः प्रजाः 'सृष्ट्वा' 'प्रेणा' प्रेत्वा प्रियातिशयेन तासु प्रजासु स्वयं 'प्राविशत्', प्रविश्य च 'ताभ्यः' प्रजाभ्यः सकाशात् स्वकीयेन केनचिद्रूपेण 'पुनः' उद्भवितुं, 'नाशक्नोत्', अशक्तस्तत्रैव स्थित इदम् 'अब्रवीत्'-'यः'-कश्चिन्माम् 'इतः' प्रजाभ्यः पुनः-सम्भवो यथा भवति तथा 'चिनवत्' चिनोति। 'स' पुरुषो 'भ्रवत् इति' भ्रवोत्येवेति। तदाकर्ण्य श्रुत्वा देवा अग्निरूपेण पुनः संभृतो यथा भवति, तथा 'तं' प्रजापतिरूपमग्निमिष्टकाभिः 'अचिन्वन्' तेन चयनेन ते देवा ऋद्धिं प्राप्ताः। यस्मादेवं सम्यक् अचिन्वन्: तस्माच्चयनविषयादग्नेश्चित्यमिति नाम सम्पन्नम्।

इदानीं विधत्ते,—"य एवं विद्वानग्निं चिनुते भ्रवोत्येव"(१)—इति

अथ प्रश्नोत्तराभ्यां क्रमेण फलविशेषान्निदर्शयितुरादावेकं फलं दर्शयति,—"कस्मै कमग्निश्चीयते?—इत्याऽऽत्मवान् अस्मानीति वै अग्निश्चीयतेऽग्निवानेव भवति"(२) इति। कमित्यव्ययं, कामायेत्यस्मिन्नर्थे वर्त्तते। ब्रह्मवादिषु मध्ये केचिदेवं पप्रच्छुः, 'कस्मै' कामाय अयम् 'अग्निश्चीयते?'—'इति' उक्ते एवमुत्तरम् 'आत्मः',—'अग्निवानस्मानीति', —आत्मीयाग्नियुक्तोऽहं भवानि—इति कामयित्वा अयमग्निश्चीयते इति। ततोऽग्निं चित्वा उत्तरक्रतुयोग्यआत्मीयाग्नियुक्त एव भवति।

द्वितीयं फलं दर्शयति,—"कस्मै कमग्निश्चीयते?—इत्याऽऽदेवा मा वेदन्निति वै अग्निश्चीयते विदुरेनं देवाः"(३) इति। स्वर्गस्था 'देवाः' सर्वे 'मा' मां यजमानं 'वेदन्' अयं यजमानः सम्यगनुष्ठितवानित्येवं विदन्तु—इति कामयित्वा अग्नेश्चितत्वाद्देवा एनं विदन्त्येव।

तृतीयं फलं दर्शयति,—"कस्मै कमग्निश्चीयते?—इत्याऽऽर्द्धी अस्मानीति वै अग्निश्चीयते गृह्येव भवति"(४) इति। आत्मीयसर्व-कर्मानुष्ठानसमर्थो गृहस्थो भवानि इति कामयित्वा अग्निं चिन्वान-स्त्वयैव भवति।

चतुर्थं फलं दर्शयति,—"कस्मै कमग्निश्चीयते?—इत्याऽऽः पशु-मानस्मानीति वै अग्निश्चीयते पशुमानेव भवति"(५) इति। पशु-समृद्धेः कामितत्वात् पशुमत्समृद्धिर्भवत्येव।

पञ्चमं फलं दर्शयति,—"कस्मै कमग्निश्चीयते?—इत्याऽऽः सप्तमा पुरुषा उपजीवानिति वै अग्निश्चीयते त्रयः प्राञ्चस्त्रयः प्रत्यञ्च आत्मा सप्तम एतावन्त एवैनमस्मिन् लोके उपजीवन्ति"(६) इति। 'प्राञ्चः' पूर्वभाविनः, पितृपितामहप्रपितामहास्त्रयः पुरुषाः। 'प्रत्यञ्चः'

पश्चाद्भाविनः, पुत्रपौत्रप्रपौत्रास्तथः पुरुषाः। मध्यवर्त्ती स्वयं सप्तमः। एते सर्वे पुरुषाः मामुपजीवन्तु,—अहमेवैतेषां रक्षको भविष्यामि इति कामयमानोऽग्निं चिता स्वर्गलोके तथैव रक्षको भवति।

यदत्रं सूत्रकारेण,—'प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद् ध्रुवा सीदेत्युत्तरवेदिमभिमन्त्र्य' इति। तदिदं विधातुं प्रस्तौति,—"प्रजापतिरग्निमचिकीषत* तं पृथिवी अब्रवीन्न मय्यग्निं चेष्यसेऽति मा धक्ष्यति, मा त्वानिदह्यमाना विधविष्ये। स पापीयान् भविष्यसीति सोऽब्रवीत् तथा वै अहं करिष्यामि यथा त्वा नाति धक्ष्यति इति स इमामभ्यमृशत् प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद् ध्रुवा सीदेतीमामेवेष्टकां कृत्वोपाधत्त अनतिदाहाय"(क) इति। पुरा कदाचित्, प्रजापतिरग्निं, चेतुमिच्छां चकार, 'तं' चयनार्थिनं प्रजापतिं 'पृथिवी' एवम् 'अब्रवीत्',—हे प्रजापते, ममोपरि 'अग्निं न चेष्यसे', अग्निचयनं न करिष्यसि मा कुर्वित्यर्थः। कुतः? इति चेत्। तच्छृणु, ममोपरि चीयमानोऽग्निर्मामतिशयेन 'धक्ष्यति', तदानीमत्यन्तं दह्यमाना 'सा' अहम् इतस्ततः परिलुठन्ती ममोपरिस्थितं त्वामपि कम्पयिष्ये। ततः 'स' त्वं पापिष्ठो दरिद्रो† 'भविष्यसि-इति',तच्छ्रुत्वा प्रजापतिरिदमब्रवीत्,-'यथा' अयं चीयमानोऽग्निस्त्वां नातिशयेन 'धक्ष्यति', 'तथा' एव 'अहं करिष्यामि'—इत्युक्त्वा प्रजापतिर्वक्ष्यमाणेन मन्त्रेण 'इमां' भूमिमभितः स्पृष्टवान्।

मन्त्रस्य चायमर्थः, हे भूमे, त्वामाद्यकारणभूताम्‡ आद्य-

* अचिकीर्षत इति का० क्री० पु० पाठो न सम्यक्।
† दरिद्रोऽयं इति का० क्री० पु० पाठो न सम्यक्।
‡ त्वां ममापि कारणभूताम्—इति का० क्री० पु० पाठः।

प्रजापतिः त्वां* 'सादयतु' स्थापयतु, अथ प्रजापतिरूपया 'त्वया' त्वया तव रचयित्र्या देवतया 'ध्रुवा' सती 'सीद्' उपविश, अङ्गिरोभिः स्थापिता यथा ध्रुवा भवति तदिति। अनेन समस्तक-स्वर्गेण 'इमां' सर्वां भूमिम् 'इष्टकाम्' 'एव' 'ह्वत्वा' अग्निरवीरात्मः-पातित्वेन 'उपाधत्त', न ह्यग्निः स्वात्मानमतिदहति।

अथ विधत्ते,—"यत्प्रत्यग्निं चिन्वीत तदभिमृशेत् प्रजापतिस्त्वा सादयतु तया देवतया अङ्गिरस्वद्ध्रुवा सीदेति इमामेवेष्टकां ह्वत्वोप धत्तेऽनतिदाहाय"(९) इति। 'यत्' यदनन्तरं, 'प्रति' इष्टकाभिः 'अग्निं' चेतुमिच्छति, 'तत्' स्थानं 'प्रजापतिः'—इत्यादिमन्त्रेण 'अभिमृशेत्'। तेन अभितः-स्वर्गेण 'इमां' भूमिं ह्वत्वामपि 'इष्टकां' 'ह्वत्वा' उपहितवान् भवति। तेन पातिदाहो न भवति।

अथोख्याग्नेर्धारणं विद्यते,—"प्रजापतिरकामयत प्रजायेयेति स एतमुख्यमपश्यत्तꣳ संवत्सरमबिभस्ततो वै स प्राजायत तस्मात् संवत्सरं भार्यः प्रैव जायते"(१०) इति। प्रजोत्पादनसाधनत्वेनो-ख्याग्निमेकस्मिन् संवत्सरे प्रतिदिनमुपस्थानकाले स्वगले शिक्यपाशं बध्वा धारयेत्। तत उत्पादको भवति।

अथ चीणि पत्नीत्तराणि त्र्यह-षडह-द्वादशाह-धारणरूपाणि क्रमेण विधत्ते,—'तं वसवोऽब्रुवन् प्र त्वमजनिष्ठा वयं प्र जायामहै इति तं वसुभ्यः प्रायच्छत् तं चीणि अहानि अबिभरत्तेन चीणि च शतानि असृजत यत्त्रिꣳशतं च तस्मात् त्र्यहं भार्यः प्रैव जायते।

---

* त्वामिति पदं पुनरुक्तमिव प्रतिभाति।

तान् रुद्रा अब्रुवन् प्र यूयमजनिढ्वं वयं प्र जायामहै इति तꣳ रुद्रेभ्यः प्रायच्छन् तं षडहानि अबिभरुस्तेन चीणि च शतान्यसृजन्त चयस्त्रिꣳशतं च तस्मात् षडहं भार्यः प्रैव जायते। तानादित्या अब्रुवन् प्र यूयमजनिढ्वं वयं प्र जायामहै इति तमादित्येभ्यः प्रायच्छन् तं द्वादशाहानि अबिभरुस्तेन चीणि च शतान्यसृजन्त चयस्त्रिꣳशतं च तस्मात् द्वादशाहं भार्यः प्रैव जायते"(११) इति। 'तं' प्रजापतिं 'वसव' एवम् 'अब्रुवन्',- हे प्रजापते, त्वं प्रजा उत्पादितवानसि, तथा वयमप्युत्पादयाम इति, ततः प्रजापतिः 'तम्' उख्यमग्निं वसुभ्यः 'प्रायच्छत्'; ते च तमग्निं अहं धृत्वा चयस्त्रिंशदधिकं प्रजानां शतचयम् 'असृजन्त', तस्मात् प्रजोत्पत्तये अहं भार्य इत्येकः पक्षः। एवं रुद्रादित्यवाक्ययोरपि व्याख्येयं।

पक्षत्रयार्थवादान् समूहाकारेण निगमयति,—"तेन वै ते सह-स्रमसृजन्त उखाꣳ सहस्रतमीम्"(१२) इति। 'ते' वसुरुद्रा-दित्याः। उखा सहस्रतमी यथा भवति, तथा एकोनं प्रजासहस्रम् 'असृजन्त'।

वेदनं प्रशंसति,—"य एवमुख्यं साहस्रं वेद प्र सहस्रं पशून् आप्नोति"(१३) इति। अत्र चयनविधि-तद्ब्राह्मणं "सावित्राणि जुहोति" (५।२।१) इत्येतस्मात् प्राक् द्रष्टव्यं। भूमिस्पर्शनमन्त्र-ब्राह्मणे तु "अग्ने तव श्रवो वय" (५।२।६) इत्यनुवाके "ग्रंथुं बाईस्पत्यं मेधो नोपानमत्" (४) इत्यतः प्राक् द्रष्टव्ये। उख्यधारणब्राह्मणं तु "न ह स्म वै पुराग्निः" (५।२।२०) इत्यनुवाके द्रष्टव्यम्॥

अत्र मीमांसा,—

द्वितीयाध्यायस्य तृतीयपादे (१०अ०) चिन्तितम्,—

"अग्निं चिनुत इत्यत्र यागो वा संस्कृतिर्यजिः।
लिङ्गेन यागनामत्वाद्यजिना चानुवादतः॥
रूढ्या द्रव्यस्य नामैतद्धरेराधानवच्चितिः।
संस्कृतिः संस्कृते वह्नावग्निष्टोमो विधीयते॥

'य एवं विद्वानग्निं चिनुते' इत्येवं विधाय श्रूयते,—'अथातोऽग्निमग्निष्टोमेनानुयजति तमुख्येन तं षोडशिना तमतिरात्रेण' इति। अत्राग्निशब्दो यागवाची स्तोत्रशस्त्रादेः क्रतुलिङ्गस्य श्रूयमाणत्वात्। तत्र लिङ्गमेवं श्रूयते,—'अग्नेस्तोत्रमग्नेः शस्त्रम्' इति षड्विंशदोऽग्नेस्त्रित्यस्य भवन्ति' इति। यदि लिङ्गं प्रापकापेक्षं, तर्हि यजिना तदनुवादः प्रापकोऽस्तु, 'अग्निमग्निष्टोमेनानुयजति' इत्यस्मिन् वाक्ये 'अग्निं यजति' इति यजिसामानाधिकरण्यात्, 'उपांशु याजयति' इतिवत् यागनामत्वं। अथोच्येत,—'अनुशब्दस्य अग्निशब्देनान्वयाद् यज्यन्वयोऽग्निष्टोमस्येति'। तथाप्यग्नेः पुरोयजने सति अग्निष्टोमस्यानुयजनं सम्भवति, 'देवदत्तमनुगच्छति यज्ञदत्तः' इत्यत्र देवदत्ते पुरोगमनदर्शनात्। तस्माद् 'अग्निं चिनुते' इत्यत्राग्निनामको याग आख्यातेन विधीयते। चिनोतिस्तु 'इष्टकाभिरग्निं चिनुते' इतिवाक्यप्राप्तस्य चयनस्य सोमयागविकृतित्वप्राप्तस्य यूपसमुदायस्यानुवादः।

इति प्राप्ते ब्रूमः,—अग्निशब्दो रूढ्या वह्निद्रव्यमाचष्टे, रूढिस्तु क्लिष्टतया लिङ्गादिकल्पाद् यागवाचित्वात् 'बलीयसी',—इति न यागनामत्वं। न च, अत्र यागरूपमस्ति, द्रव्यदेवतयोरसिद्धेः, अतः

'अग्निमादधीत' इत्युक्ताधानवद् 'अग्निं चिनुते' इत्युक्तं चयनम् अग्निद्रव्यसंस्कारः। न च, संस्कृतस्य विनियोगाभावः, 'अग्निमग्निष्टोमेन यजते' इत्यादिवाक्यैरग्निष्टोमादौ विनियोगात्। तस्मात् संस्कारविधिः॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके द्वितीयोऽनुवाकः॥०॥

यजुषा वै एषा क्रियते यजुषा पच्यते यजुषा वि मुच्यते यद् उखा सा वै एषैतर्हि यातयाम्नी सा न पुनः प्रयुज्येत्याहुरग्ने युक्ष्वा हि[1] ये तव युक्ष्वा हि देवहूतमाꣳ इत्युखायां जुहोति तेनैवैनान् पुनः प्र युङ्क्ते तेनायातयाम्नी यो वै अग्निं योगे आगते युनक्ति युंक्ते युञ्जानेषग्नेः॥ १॥

युक्ष्वा हि ये तव युक्ष्वा हि देवहूतमाꣳ इत्याहैष वै अग्नेर्योगस्तेनैवैनं युनक्ति युंक्ते युञ्जानेषु[2] ब्रह्मवादिनो वदन्ति न्यङ्ङग्निश्चेतव्या३। उत्तानाइ इति वयसां वै एष प्रतिमया चीयते यदग्निर्यद् न्यञ्चं चिनुयात् पृष्टित एनमाहुतय कृच्छ्रेयुर्यदुत्तानं न पतितुꣳ शक्नुयाद् असुवर्ग्योऽस्य स्यात् प्राचीनमुत्तानं॥ २॥

पुरुषशीर्षमुप दधाति मुखत एवैनमाहुतय कृच्छ्रन्ति नोत्तानं चिनुते सुवर्ग्योऽस्य भवति[3] सौर्या जुहोति

चक्षुरेवास्मिन् प्रति दधाति(४) द्विर्जुहोति द्वे हि चक्षुषी(५) समान्या जुहोति समानꣳ हि चक्षुः सम्पध्यै(६) देवासुराः संयत्ता आसन् ते वामं वसु सं न्यदधत तद्देवा वाम-भृता अवृञ्जत तद्वामभृतो वामभृत्वं यद्वामभृतम्, उपदधाति वाममेव तया वसु यजमानो भ्रातृव्यस्य वृङ्क्ते(७) हिरण्यमूर्ध्नी भवति ज्योतिर्वै हिरण्यं ज्योति-र्वामं ज्योतिषैवास्य ज्योतिर्वामं वृङ्क्ते(८). द्वियजुर्भवति प्रतिष्ठित्यै(९) ॥ ३ ॥

युञ्जानेषम्ने। प्राचीनमुत्तानं। वामभृतम्। चतु-र्विꣳशतिश्च ॥ ई ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥०॥



यजनस्य विधिस्तस्य फलमुख्यस्य धारणम्।
अनुवाके द्वितीये हि तदेतत्त्रयमीरितम्॥

अथ तृतीयानुवाके उख्यहोमादिकमभिधीयते। तमेतं होमं विधत्ते,—"यजुषा वै एषा क्रियते यजुषा पच्यते यजुषा वि मुच्यते यद् उखा सा वै एषैतर्हि यातयामी सा न पुनः प्रयुज्येताऽग्ने युक्षा हि ये तव युक्षा हि देवऋतमाꣳ इत्युखायां जुहोति तेनैवैनान्

पुनः प्र युङ्क्ते तेनायातयाम्नी"(१) इति। 'एषा' उखा "वसवस्त्वा छन्दन्तु"*-(४।२।६।३) इत्यादिना 'यजुषा' 'क्रियते'; "धिषणास्त्वा" (४।२।६।२) इत्यादिना 'यजुषा' सेयमुखा 'पच्यते'; "मातेव पुत्रम्" (४।२।५।२) इत्यादिना 'यजुषा' म्रिक्यात् 'मुच्यते', येयम् 'उखा' बहुधा यजुर्भिरनुष्ठिता, 'सा' इयमुखा एतस्मिन् काले गतसारा सम्पन्ना, बहुधा प्रयुक्तत्वात्; अतः 'सा' गतसारा उखा 'पुनः' प्रयोक्तुं न योग्येत्येवमभिप्रा 'आङ्' ; अतः पुनः ससारत्वसम्पादनाय "अग्ने युक्ष्वा हि"(५)-इति मन्त्रद्वयेनोखायां जुहुयात्; 'तेन' होमेनोखां पुनः-प्रयोगयोग्यां करोति, होमेनैव ससारत्वञ्च सम्पादितत्वात्। "अग्ने युक्ष्वा हि"-इत्यादिके ऋचौ तु "ध्रुवासि"(४।२।९) इत्यनुवाके समाम्नाते व्याख्याते च॥

मन्त्रगतस्य 'युक्ष्व'—इतिशब्दस्य तात्पर्यं दर्शयति,—"यो वै अग्निं योगे आगते युनक्ति युङ्क्ते युञ्जानेषु"(१) इति। 'यो' यजमानो योगकाले समागते सति अप्रमत्तः 'अग्निं' 'युनक्ति', स यजमानो-ऽग्नियोगानुष्ठातृषु यजमानेषु मध्ये स्वयमपि अग्नियोगानुष्ठातेति-व्यपदेशार्हो भवति। स च योगो मन्त्रे युक्ष्व-पदोच्चारणेन सिध्यति, हे अग्ने, त्वं युक्तो भवेत्येवं तस्य पदस्य वाच्यार्थत्वात्। अतस्तदुच्चारणेन एनमग्निं 'युनक्ति', 'युञ्जानेषु' यजमानेषु च परिगण्यते। एतच्च† होमब्राह्मणे "एषा वै एतल्लोकानाम्" (५।२।९) इत्यनुवाके "पूर्णा तस्योप दध्यादनुपदस्यदेवान्नम्"(१)—इति वाक्यादूर्ध्वं द्रष्टव्यम्॥

---

* इयमेव सर्वत्र पाठः। 'छृन्दन्तु' इति पाठो भवितुं युक्तः।

† तच्च इति का० श्री० पु० पाठः।

अथ पुरुषशीर्षोपधानं विधत्ते,—"ब्रह्मवादिनो वदन्ति न्यङ्ङग्निश्चेतव्यः उत्तानाः इति वयसां वै एष प्रतिमया चीयते यदग्नियंत् न्यञ्चं चिनुयात् पृष्ठित एनमाऋतव ऋच्छेयुर्यदुत्तानं न पतिष्णुः भवेत् अक्नुयादसुवर्ग्योऽस्य स्यात् प्राचीनमुत्तानं पुरुषशीर्षमुप दधाति मुखत एवैनमाऋतव ऋच्छन्ति नोत्तानं चिनुते सुवर्ग्योऽस्य भवति"(२) इति। 'न्यङ्' अधोमुखः, 'उत्तानः' ऊर्ध्वमुखो योऽयम् 'अग्निः', स एष पक्षिणामाकारेण 'चीयते', तथा सति अधोमुखत्वे न चितस्याग्नेः पृष्ठभागे सर्वा आऋतव एनमग्निमाप्नुयुः, ऊर्ध्वमुखत्वे स पक्षाभ्यामाकाशे* गन्तुं न शक्नुयात्, गमनाभावे च स्वर्गाय हितो न भवति। अत्र दोषद्वयपरिहाराय 'पुरुषशीर्षम्' उप-दध्यात्। तच्च शिरः प्राचीनं, केशभागं* प्राच्यान्दिशि, छिन्नगलभागं प्रतीच्यान्दिशि कृत्वा ऊर्ध्वमुखं स्थापयेत्। एवं सति तच्च ह्रियमाणा आऋतवो मुखप्रदेशे एवाग्निं प्राप्नुवन्ति, न तु पृष्ठतः; पक्षाकारस्योर्ध्वमुखत्वाभावेन आकाशे गन्तुं शक्यत्वात् स्वर्गाय हिता एव भवन्ति। अस्य चोपधानमन्त्रस्तु "आदित्यं गर्भम्" (४।२।१०) इत्यादिके, उपधानविधिस्तु "मध्ये पुरुषशीर्षमुप दधाति"(२)-इति, [illegible] "एषां वै एतल्लोकानाम्" (५।२।८) इत्यनुवाके समाम्नातः। [illegible] तु उक्तं विधिमनूद्य प्राचीनोत्ताने च गुणे विधीयते॥

यदुक्तं सूत्रकारेण 'चित्रं देवानामित्यृक्चाभ्यामधिकटयो कृत्वा' -इति। तदिदं विधत्ते,—"सौर्या जुहोति चक्षुरेवास्मिन् प्रति दधाति"(४) इति। सौरी "चित्रं देवानाम्"(१) इत्यादिका, सा

* केशभागः एवं छिन्नगलभाग इति च प्रथमान्तपाठो न युक्तः।

च "उदुत्यञ्जातवेदसम्" (१।४।४३)—इत्यनुवाके समाम्नातत्वात् तत्रैव व्याख्याता, सूर्यस्य चक्षुरभिमानीदेवत्वात्* तन्मन्त्रहोमेनात्मिन् पुरुषशीर्षे चक्षुरिन्द्रियं सम्पादयति। चक्षुरभिमानित्वञ्च ऐतरेयिणः समामनन्ति,—'आदित्यश्चक्षुर्भूत्वा अक्षीणि प्राविशद्'—इति॥

अर्धर्चं इयं† विभज्य विनियुङ्क्ते, "द्विर्जुहोति दे हि चक्षुषी"(५) इति। इन्द्रियस्यैकत्वेऽपि गोलकभेदात् द्वित्वम्॥

ऋग्भेदशङ्कां वारयितुमेकत्वं विधत्ते,—"समान्या जुहोति समानꣳ हि चक्षुः समृध्यै(६) इति। गोलकभेदेऽपि इन्द्रियस्यैकत्वात् दृगेकत्वम्। इदं होमन्नाह्मणमपि पुरुषशीर्षविधिसमीपे द्रष्टव्यम्॥

अथ वामभृताख्यायाः‡ इष्टकाया उपधानं विधत्ते,—"देवासुराः संयत्ता आसन् ते वामं वसु सं न्यदधत तद्देवा वामभृता अपृञ्जत तद्वामभृतो वामवामभृत्त्वं यद्वामभृतमुपदधाति वाममेव तया वसु यजमानो भ्रातृव्यस्य कृणुते"(७) इति। यदा देवासुराश्च युद्धायोद्यताः, तदानीं तदुभयेऽपि वननीयं 'वसु' स्वं धनं एकैकत्र मूलत्वेन§ सम्यक् स्थापितवन्तः। तत्रासुरसम्बन्धि यद्धनं, तदेतद्देवा अनया वामभृता खेष्टकया विनाशितवन्तः, अतो वामं हरन्ति नाशयन्तीति व्युत्पत्त्या हकारस्थाने भकारादेशे सति वामभृदिति वाममं सम्पन्नं। अतो 'यजमानोऽप्येतदुपधानेन भ्रातृव्यस्य धनं विनाशयति॥

---

* एवमेव सर्व्वत्र पाठः। अभिमानिदेवत्वादिति पाठो भवितुं युक्तः।

† एवमेव सर्व्वत्र पाठः। 'अर्द्धर्चमिमं' इत्याकारकः कचित्पाठो भवितुं युक्तः।

‡ वामभृदाख्याया इति पाठो भवितुं युक्तः।

§ मूलत्वेन इति आदर्शपुस्तकपाठः।

यदुक्तं सूचकारेण,—'प्रवाऊगिष्टकायां हिरण्मयकलावधूम्र आस्ते अग्ने सूर्ये रुच इति दाभ्यां वामभृतम्'— इति। तत्र हिरण्मयकलौ विधत्ते,—हिरण्मूर्धो भवति ज्योतिर्वै हिरण्यं ज्योतिर्वामं ज्योतिषैव अस्य ज्योतिर्वामं रुक्षे"(८) इति। हिरण्मयकलद्वयं मूर्ध्नि उपरिभागे यस्या इष्टकायाः सा हिरण्मूर्धा, हिरण्यं प्रकाशरूपत्वात् ज्योतिः, वाममपि मणिमुक्तादिकं तथा ज्योतिः॥

"यास्ते अग्ने सूर्ये रुचः" इत्यादिमन्त्रद्वयं तत्र विनियुङ्क्ते,—द्वियजुर्भवति प्रतिष्ठित्यै(९) इति। द्वे यजुषी यस्यां वामभृतः सा द्वियजुः। तदस्य वामभृद्ब्राह्मणं "स्वयमातृण्णामुप दधाति" (५।२।८) इत्यनुवाके दूर्वेष्टकाब्राह्मणादूर्ध्वं "देवलक्ष्मं वै ऋष्मलिखिता"(३) इत्यतः पूर्वं द्रष्टव्यम्॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके द्वितीयोऽनुवाकः॥०॥

आपो॑ वरु॒णस्य॒ पत्न॑य आस॒न् ता अ॒ग्निर॒भ्य॑ध्यायत् ताः सम॑भवत् तस्य॑ रेत॒ः परा॑पतत् तद्दि॒यम॑भवद् यद्द्वि॒तीयं॑ प॒रापत॑त् तद्सावभवद्दि॒यं वै वि॒राड॒सौ स्वरा॒ड् यद् वि॒राजा॑वुप॒दधा॑तीमे ए॒वोप॑ धत्ते॒(१) यद्वै अ॒सौ रेत॑ः सि॒च्यति॒ तद॒स्यां प्रति॑ तिष्ठति॒ तत् प्र जा॑यते॒ ता ओष॑धयः॥ १॥

वीरुधो भवन्ति ता अग्निरत्ति[२] यः एवं वेद प्रैव जायतेऽन्नादो भवति[३] यो रेतस्वी स्यात् प्रथमायां तस्य चित्यामुभे उप दध्यादिमे एवास्मै समीचो रेतः सिञ्चतो यः सिक्तरेता स्यात् प्रथमायां तस्य चित्यामन्यामुप दध्यादुत्तमायामन्याꣳ रेत एवास्य सिक्तमाभ्यामुभयतः परि गृह्णाति[४] संवत्सरं न कं ॥ २ ॥

चन प्रत्यवरोहेत् न ह्येमे कं चन प्रत्यवरोहन्तस्तदेनयोर्व्रतं[५] यो वै अपशीर्षाणमग्निं चिनुतेऽपशीर्षाऽमुष्मिन् लोके भवति यः सशीर्षाणं चिनुते सशीर्षाऽमुष्मिंल्लोके भवति[७] चितिं जुहोमि मनसा घृतेन यथा देवा इहा गमन् वीतिहोत्रा कृतावृधः समुद्रस्य वयुनस्य पत्मन् जुहोमि विश्वकर्मणे विश्वा अहाऽमर्त्यꣳ हविः[८] इति स्वयमातृण्णामुपधाय जुहोति ॥ ३ ॥

एतद्वै अग्नेः शिरः सशीर्षाणमेवाग्निं चिनुते[९] सशीर्षाऽमुष्मिन् लोके भवति यः एकं वेद[१०] सुवर्गाय वै एष लोकाय चीयते यद्ग्निस्तस्य यदयथापूर्वं क्रियते सुवर्ग्यमस्य तत् सुवर्ग्योऽग्निः[११] चितिमुपधायाभि मृशेत्[१२] चित्तिमचित्तिं चिनवद् वि विद्वान् पृष्ठेव वीता वृजिना च मर्तान् राये च नः स्वपत्याय, देव दितिं

च रास्व अदितिमुरुष्येति(१२) यथापूर्वमेवैनामुप धत्ते प्राञ्चमेनं चिनुते सुवर्ग्योऽस्य भवति(१३) ॥ ४ ॥

ओषधयः। कं। जुहोति। स्वपत्याय। अष्टादश च ॥४॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥०॥

उखाहृतिः पुंग्निरस्य वामभृच्च तृतीयके ।

अथ चतुर्थे रेतःसिगाद्या उच्यन्ते, यदुक्तं सूत्रकारेण,—'विराट् ज्योतिरिति तिस्रो रेतःसिक्तासां द्वे प्रथमायां चित्यां यून उप दधात् सर्वा मध्यमायां विवयम एकां प्रथमायामेकामुत्तमायां स्वविरस्य' इति। तत्र द्वयोरुपधानं विधत्ते,—"आपो वरुणस्य पत्नयः आसन् ताः अग्निरभ्यध्यायत् ताः समभवत् तस्य रेतः परापतत् तदियमभवद् यद्वितीयं परापतत् तदसावभवत् इयं वै विराट् असौ स्वराट् यद्विराजौ उपदधाति इमे एवोप धत्ते"(१) इति। वरुणपत्न्यो या अप्-देवताः, 'ताः' कामुकः 'अग्निरभ्यध्यायत्', ध्यात्वा 'समभवत्', तत्र मानसेन सम्भावनेन स्खलितं रेतोऽधः अपतत्, 'तत्' च रेत 'इयं' पृथिवी 'अभवत्', द्वितीयवारं पतितं रेतो 'असौ' द्युलोकः 'अभवत्'। तत्र येयं पृथिवी सा विविधा प्राणाधारत्वेन राजते इति 'विराट्' इत्युच्यते, या त्वसौ द्यौः, 'सा' स्वातन्त्र्येण राजते इति 'स्वराट्'। एवं सति अत्र द्वे विराजावुप

दध्यात्, विराट्शब्दोपेताभ्यां मन्त्राभ्यामुपधेये विराजौ। मन्त्रद्वयं च "विराड् ज्योतिरधारयत् सम्राड् ज्योतिरधारयद्" (४।२।८।४) इत्यत्राम्नातं व्याख्यातं च। अनेन विराड्द्वयोपधानेन द्वे द्युभूमी एवाद्यमुपधत्ते॥

तदेतद्विराडुपधानं प्रकारान्तरेण प्रशंसति,—"यदै अमौ रेतः सिञ्चति तदस्यां प्रति तिष्ठति तत् प्र जायते ता ओषधयः वीरुधो भवन्ति ता अग्निरत्ति"(१) इति। 'अमौ' द्यौः यदेव 'रेतो' वृष्टिरूपं 'सिञ्चति', 'तद्' 'अस्यां' भूमौ प्रतिष्ठितं सत् नानाकरेण उत्पद्यते, 'ताः' च उत्पन्ना 'ओषधयो' ब्रीहियवाद्याः','वीरुधो' नागवल्याद्यस्य भवन्ति। 'ताः' च जाठराग्निं 'अत्ति'। एवंविधे द्युभूमिरूपे* विराजाविति।

तयोः प्रशंसावेदनं प्रशंसति,—"य एवं वेद प्रैव जायतेऽन्नादो भवति"(२) इति॥

अथाधिकारिभेदेन प्रकारान्तरेण विशेषं विधत्ते,—"यो रेतस्वी स्यात् प्रथमायां तस्य चित्यामुभे उप दध्यादिमे एवास्मै समीची रेतः सिञ्चतो यः सिक्तरेताः स्यात् प्रथमायां तस्य चित्यामन्यामुप दध्यादुत्तमायामन्याꣳ रेत एवास्य सिक्ताभ्यामुभयतः परि गृह्णाति,,(३) इति। 'रेतस्वी' युवा, तस्य 'प्रथमायाम् एव चितावुभयोरुपधाने सति ते 'उभे' अपि भूमिरूपे अनुकूले भूत्वा यजमानार्थं 'रेतः सिञ्चतः', 'सिक्तरेताः' स्थविरः, तस्य प्रथमोत्तमचित्योः क्रमेण द्वयोरुपधाने सति स्वकीयं रेत 'आभ्याꣳ'

* एवं विधा द्युभूमिरूपे विराजौ इति पाठो न समञ्जसः।

इष्टकाभ्याम् 'उभयतः' परिगृहीतं भवति। एतद् विराड्ब्राह्मणं पूर्वोक्त-(५।५।३अ०)-वामभृद्ब्राह्मणादनन्तरमेव द्रष्टव्यम्।

अथाग्निचितः कश्चिन्नियमं विधत्ते,—"संवत्सरं न कं चन प्रत्यवरोहेत् न ह्येमे कं चन प्रत्यवरोहतस्तदेनयोर्व्रतम्"(५) इति। अग्निश्चिता संवत्सरपूर्त्तिपर्यन्तं वयोवृद्धेषु विद्यावृद्धेषु च समागतेष्वपि 'कम्' अपि पुरुषं प्रति अभ्युत्थानं न कुर्य्यात्, 'इमे' भूमिरूपे विराजौ इष्टके 'कम्' अप्युत्कृष्टं पुरुषं प्रति नाभ्युत्थानं कुरुतः, 'तद्' अनभ्युत्थानम् 'एनयोः' इष्टकयोः 'व्रतं', अतस्तयोरुपधातापि नाभ्युत्तिष्ठति। यद्यप्ययं नियमः क्षत्रब्राह्मणान्ते वक्तव्यः, तथापि विराड्द्वारेण स्तोतुमिहाम्नातः।

अथ कश्चिद्धोमं विधातुं प्रस्तौति,—"यो वै अपशीर्षाणमग्निं चिनुतेऽपशीर्षाऽमुष्मिंलोके भवति, यः सशीर्षाणं चिनुते सशीर्षा अमुष्मिंलोके भवति"(६) इति। अग्नेः शिरोरादित्यसादित्याभ्यां यजमानोऽपि सुवर्गे तथा भवति।

विधित्सितस्य होमस्य मन्त्रमुत्पादयति,—"चित्तिं जुहोमि मनसा घृतेन यथा देवा दहागमन्नीतिहोत्रा ऋतावधः समुद्रस्य च्युनस्य पत्मन् जुहोमि विश्वकर्म्मणे विश्वा अहा अमर्त्यꣳ हविः"(७) इति। 'यथा देवा दहागमन्',—येन प्रकारेण हविर्भाजो देवा अस्मिन् कर्मणि आगच्छन्ति, तथा अहं 'मनसा' मनोगतया भक्त्या, 'घृतेन' द्रव्येण, 'चित्तिं जुहोमि' देवानां चित्तमुपादद्दे, प्रसादयामि इत्यर्थः। कीदृशा देवाः?-'वीतिहोत्राः' कर्मणीयहविषः, 'ऋतावृधः' यज्ञस्य वर्धयितारः। तत ऊर्द्धं 'विश्वकर्म्मणे' प्रजापतये, 'विश्वा

अद्धा' सर्वेष्वपरुःसु,'अमर्त्यं' विनाशरहितं स्वाङ्गतं 'हविः' 'जुहोमि'। होमस्य स्थानमुच्यते,—'वयुनस्य' क्रमनीयस्य, 'समुद्रस्य' समुद्रवद् उच्छ्रितस्य, स्वयमातृण्णास्वरूपस्य 'पत्मन्' पतने आहुतियोग्ये उपरिभागे इत्यर्थः।

उत्पादितं मन्त्रं विनियुङ्क्ते,—"इति स्वयमातृण्णामुपधाय जुहोत्येतदै अग्नेः शिरः शीर्षाणमेवाग्निं चिनुते"(८) इति। चित्तिं जुहोमीति यो मन्त्र उत्पादितः, 'इति' अनेन मन्त्रेण स्वयमातृण्णोपधानादनन्तरं जुहुयात्। एतदेवाहुतिस्वरूपं अग्नेः शिरःस्थानीयम्। अतः शिरःसहितमेवाग्निं चितवान् भवति।

वेदनं प्रशंसति,—"शीर्षाऽमुष्मिंलोके भवति य एवं वेद"(९)—इति। तदेतद्धोमब्राह्मणं "स्वयमातृण्णाम्" इत्यनुवाके (५।२।८अ०) द्रष्टव्यम्।

अथाभिमर्शनं विधातुं प्रस्तौति,—"सुवर्गाय वै एष लोकाय चीयते यदग्निस्तस्य यदयथापूर्वं क्रियतेऽसुवर्ग्यमस्य तत् सुवर्ग्योऽग्निः"(१०)—इति। योऽयमग्निरस्ति, स 'एष' स्वर्गलोकार्थं चीयते, अतः 'तस्य' अग्नेः 'यद्' अङ्गं 'अयथापूर्वं', क्रमोल्लङ्घनेन 'क्रियते', 'तद्' अङ्गम् 'असुवर्ग्यं' स्वर्गाय हितं न भवति। 'अग्निः' स्वर्गाय हितः; तस्मात् क्रममनुल्लङ्घ्यैव तदङ्गमनुष्ठेयम्।

अथ यदर्थं प्रस्तावः कृतः तदिधत्ते,—"चितिमुपधायाभिमृशेत्"(११)—इति। उपधानादूर्ध्वं तामुपहितां चितिं हस्तेन स्पृशेत्।

तच्च मन्त्रमुत्पादयति,—चित्तिमचित्तिं चिनवद्दि विद्वान् पृष्ठेव वीता वृजना च मर्ताम् राये च नः स्वपत्याय देव दितिं च

राख अदितिसुरुच्येति"(१२)—इति। अथमग्निः 'चिच्चिमचिच्चिम्, अस्मदीयां मानसीं भक्तिमभक्तिं च 'वि'-'चिनवत्', विविच्य निश्चिनोतु। कीदृशोऽग्निः? 'पृष्टेव वीता वृजिना च' 'विद्वान्'—पृष्टोपलक्षितानि* सर्व्वावयवसदृशानि कर्म्माङ्गानि, 'वीता' कान्तानि, 'वृजिना च' स्खलितानि च,—इत्युभयं जानानः। तथा 'मर्त्तान्', मनुष्यरूपान् बन्धुत्वान् अस्मानपि 'विद्वान्'। हे 'देव', 'नः' अस्माकं 'राये' धनाय 'स्वपत्याय' च शोभनपुत्रार्थमपि 'दितिं' च 'राख' यद्देयं तदपि देहि। 'अदितिसुरुच्य',—यदपि इतः परं न देयं, किन्तु पूर्वमेव दत्तं, तदपि बन्धुत्वं कर्तुमिच्छ।

अनेन मन्त्रेणानुष्ठितमभिमर्शनं प्रशंसति,—"यज्ञापूर्वमेवैनमुप धत्ते प्राञ्चमेनं चिनुते सुवर्ग्योऽस्य भवति"(१३)—इति। अत्र भक्त्यभक्त्योः स्खलनास्खलनयोर्विवेककारिणा वह्निना वैकल्यस्य समाहितत्वात् क्रममनुरुन्धैव 'एनां' चितिम् 'उप'-'धत्ते', अग्निञ्च प्राङ्मुखं चिनुते; स चाग्निः 'अस्य' यजमानस्य स्वर्गाय हितो भवति। तदिदं ब्राह्मणं "पशूर्वा एष यदग्निः"—इत्यनुवाके (५।२।१०) प्रथमचितिसमाप्तौ द्रष्टव्यम्॥

इति सायनाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः॥०॥

---

* एकोपलक्षित इति सर्व्वत्र पाठो न समीचीनः।

† यददेयमिति का० श्री० पु० पाठो न सम्यगिव प्रतिभाति।

विश्वकर्मा दिशाम्पतिः स नः पशून् पातु सोऽस्मान् पातु तस्मै नमः प्रजापतीरुद्रो वरुणोऽग्निर्दिशाम्पतिः स नः पशून् पातु सोऽस्मान् पातु तस्मै नमः(१) एता वै देवता एतेषां पशूनामधिपतयस्ताभ्यो वै एष आ वृश्च्यते यः पशुशीर्षाण्युपदधाति हिरण्येष्टका उप दधाति एताभ्य एव देवताभ्यो नमस्करोति(२) ब्रह्मवादिनः ॥१॥

वदन्त्यग्नौ ग्राम्यान् पशून् प्र दधाति शुचारण्यान-पर्यति किं तत उच्छिंषतीति यद्धिरण्येष्टका उप-दधाति अमृतं वै हिरण्यममृतेनैव ग्राम्येभ्यः पशुभ्यो भेषजं करोति नैनान् हिनस्ति(३) प्राणो वै प्रथमा स्वयमातृण्णा व्यानो द्वितीयापानस्तृतीया अनु प्राणात् प्रथमाꣳ स्वयमातृण्णामुपधाय प्राणेनैव प्राणꣳ सम-र्द्धयति व्यानात् ॥ २ ॥

द्वितीयामुपधाय व्यानेनैव व्यानꣳ समर्द्धयत्यपा-नात् तृतीयामुपधायापानेनैवापानꣳ समर्द्धयत्यथो प्राणैरेवैनꣳ समिंधे(४) भूर्भुवः सुवरिति स्वयमातृण्णा उप दधातीमे वै लोका स्वयमातृण्णा एताभिः खलु वै व्याहृतीभिः प्रजापतिः प्राजायत यदेताभिर्व्याहृतीभिः स्वयमातृण्णा उपदधातीमानेव लोकानुपधायैषु ॥ ३ ॥

लोकेषधि प्रजायते[५] प्राणाय व्यानायापानाय वाचे त्वा चक्षुषे त्वा तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद[६] अग्निना वै देवाः सुवर्गं लोकमजिगाꣳसन् तेन पतितुं नाशक्नुवन् ते एताश्चतस्रः स्वयमातृण्णा अपश्यन् ता दिक्षूपादधत तेन सर्वतश्चक्षुषा सुवर्गं लोकमायन् तश्चतस्रः स्वयमातृण्णा दिक्षूपदधाति सर्वतश्चक्षुषैव तद्ग्निना यजमानः, सुवर्गं लोकमेति[७] ॥ ४ ॥

ब्रह्मवादिनः। व्यन्यात्। एषु। यजमानः। चीणि च ॥ ५ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ * ॥

रेतःसिग्घोमसंस्पर्शाश्चतुर्थे समुदीरिताः।

अथ पञ्चमे हिरण्मेष्टकाद्या उच्यन्ते,—यदुक्तं सूत्रकारेण, 'विश्वकर्मा दिशां पतिः इति पञ्च हिरण्मेष्टकाः प्रतिदिग्गमेकां मध्ये' इति। तत्र मन्त्रानुत्पादयति,—"विश्वकर्मा दिशाम्पतिः स नः पशून् पातु सोऽस्मान् पातु तस्मै नमः प्रजापतीरुद्रो वरुणोऽग्निर्दिशाम्पतिः स नः पशून् पातु सोऽस्मान् पातु तस्मै नमः"[१]—इति।

योऽयं 'विश्वकर्मा' 'दिशां' पालकः, 'सः' अस्मदीयान् 'पशून्' अस्मांश्च रक्षतु, 'तस्मै' विश्वकर्मणे 'नमः'। प्रजापतिरित्यादिभिः पदैश्चत्वारो मन्त्राः उत्पन्नाः सर्वेषानुषङ्गाय दिशाम्पतिरिति पुनःपाठः।

एतन्मन्त्रसाध्यमुपधानं विधत्ते,—"एता वै देवता. एतेषां पशूनामधिपतयस्ताभ्यो वै एष आ वृश्च्यते यः पशुशीर्षाण्युपदधाति हिरण्येष्टका उप दधात्येताभ्य एव देवताभ्यो नमस्करोति"(९)—इति। पुरुषाश्वर्षभवृषिणवस्तानामेतेषां पशूनां विश्वकर्मादयः स्वामिभूता 'देवताः', एवं सति पशुशीर्षोपधाने 'ताभ्यो' देवताभ्य 'आ-वृश्च्यते', तासां देवतानां द्रोही भवतीत्यर्थः। अतस्तत्परिहाराय हिरण्येष्टका उपदध्यात्। हिरण्यशकला एव हिरण्येष्टकाः, तदुपधानेन ताभ्यो 'नमस्करोति', तन्मन्त्रेषु 'तस्मै नमः' इति दर्शनात्।

प्रकारान्तरेण हिरण्येष्टकाः प्रशंसति,—"ब्रह्मवादिनो वदन्त्यग्नौ ग्राम्यान् पशून् प्र दधाति प्रुचारण्यानर्पयति किं तत उच्छिष्यतीति यद्धिरण्येष्टका उपदधाति अमृतं वै हिरण्यममृतेनैव ग्राम्येभ्यः पशुभ्यो भेषजङ्करोति नैनान् हिनस्ति"(१०)—इति। लोके हि द्विविधा एव पशवः,—ग्राम्याश्चारण्याश्चेति, तत्र 'ग्राम्यान्' पुरुषाश्वादीन् अयं यजमानस्त्रीयमाने 'अग्नौ' स्थापितवान्; 'मयुमारण्यमनु ते दिशामि'—इत्यादिभिर्मन्त्रैः 'आरण्यान्' च ग्रामेण योजितवान्*। 'ततः' उभयविधेभ्यः पशुभ्योऽन्यत्तु यदनुपहितं† पशुस्वरूपं 'किं' नामोच्छिष्यते?

---

* योजिता इति आदर्शपुस्तके पाठः।

† अन्यदनुदितमिति आदर्शपुस्तके पाठः।

अतः कष्टोऽयं सर्वकर्मोपद्रवको यजमानव्यापार* इति 'ब्रह्मवादिनः' परस्परमाहुः। तचैतदुत्तरं द्रष्टव्यं नायं कष्टो व्यापारः,—यस्मादयं 'हिरण्येष्टका उपदधाति', 'हिरण्यं' च 'अमृतम्', तेन 'अमृतेन' 'ग्राम्येभ्यः पशुभ्यो', भेषजकरणात् एतदीयहिंसादोषं न प्राप्नोति। एतच्चोपलक्षणं,—आरण्यपशुप्रयोक्तस्यापि भेषजमेतदिति द्रष्टव्यम्। एतासां वृत्तिकानचयेष्टकाभ्य ऊर्ध्वभावित्वात् तद्ब्राह्मणानन्तरमेवैतद्ब्राह्मणं द्रष्टव्यम्।

अथ तिसृणां स्वयमातृण्णानामुपधानानन्तरं प्राणनादिकं विधत्ते,—"प्राणो वै प्रथमा स्वयमातृण्णा व्यानो द्वितीया अपानस्तृतीया अनु प्राणात् प्रथमाꣳ स्वयमातृण्णामुपधाय प्राणेनैव प्राणꣳ समर्धयति व्यन्याद् द्वितीयामुपधाय व्यानेनैव व्यानꣳ समर्धयति अपान्यात् तृतीयामुपधायापानेनैवापानꣳ समर्धयति अथो प्राणैरेव एनꣳ समिन्धे"(४)—इति। प्रथममध्यमोत्तमचितिषु तिस्रः स्वयमातृण्णाः, तासु क्रमेण प्राणव्यानापानस्वरूपा प्राग्वृत्ति-मध्यवृत्ति-पश्चाद्वृत्तित्वसाम्यादतः प्रथमचितौ स्वयमातृण्णाम् उपधाय 'प्राणात्' उच्छ्वासं कुर्यात्। मध्यमचितौ 'व्यन्यात्' प्राणापानस्तम्भनं कुर्यात्। उत्तमचितौ 'अपान्यात्',—निश्वासं कुर्यात्। स एवं सति स्वकीयैः प्राणादिभिरग्नेः प्राणादीन् 'समर्धयति'। अपि च प्राणवायुभिरेव एनमग्निं प्रदीपयति।

अथ तिसृषु स्वयमातृण्णासु व्याहृतित्रयं क्रमेण विनियुङ्क्ते,—"भूर्भुवः सुवरिति स्वयमातृण्णा उपदधातीमे वै लोकाः स्वयमा-

---

* सर्वकर्मोपद्रवयजमानकार्य्य इति का० को० पु० पाठः। सर्वकर्मोपद्रवकार्य्यजन्यमानव्यापार इति तु आदर्शपुस्तके पाठः।

दृष्टा एताभिः खलु वै व्याहृतीभिः प्रजापतिः प्राजायत यदेताभिर्व्याहृतीभिः स्वयमातृण्णा उपदधातीमानेव लोकानुपधायेषु लोकेषु अधि प्रजायते"(५) इति। तत्तत्स्वयमातृण्णोपधानब्राह्मणानन्तरमेव इतदपि ब्राह्मणं विभज्य योजयितव्यम्।

यदुक्तं सूत्रकारेण,—'प्राणाय त्वा चक्षुषे त्वेति चतस्रः स्वयमातृण्णाः प्रतिदिशम्' इति। तच्च मन्त्रानुत्पादयति,—"प्राणाय व्यानायापानाय वाचे त्वा चक्षुषे त्वा तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद"(६) इति। प्राणादिपदैश्चत्वारो मन्त्राः, 'प्राणाय', 'त्वा चक्षुषे त्वा तया'—इत्यादि सर्वत्रानुषज्यते। हे पूर्वदिग्वृत्तिस्वयमातृण्णे, प्राणवृत्तिसिद्ध्ये त्वामुपदधामि, 'चक्षुषे' दृष्टिसिध्यर्थं त्वामुपदधामि, या तव स्वामिभूता देवता, 'तया' अनुगृहीता 'ध्रुवा' सती त्वं 'सीद' उपविश, यथाऽङ्गिरोभिः उपहिता ध्रुवा, तद्वत्। एवं व्यानायेत्यादिमन्त्रत्रये योजनीयम्।

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते,—"अग्निना वै देवाः सुवर्गं लोकमजिगाꣳसन् तेन पतितुं नाशक्नुवन् ते एताश्चतस्रः स्वयमातृण्णा अपश्यन् ता दिक्षूपादधत तेन सर्वतश्चक्षुषा सुवर्गं लोकमायन् यच्चतस्रः स्वयमातृण्णा दिक्षु उपदधाति सर्वतश्चक्षुषैव तदग्निना यजमानः सुवर्गं लोकमेति"(७) इति। पुरा कदाचिद्देवाग्नीयमानमग्निं साधनं कृत्वा स्वर्गं प्राप्तुमैच्छन्, 'तेन' चाग्निना साधनेन प्राप्तुं 'नाशक्नुवन्'; अतः अग्निसाधनबलेन स्वयमातृण्णां निश्चित्योपधाय तच्चयेन सर्वदिगवगतेन 'चक्षुषा' स्वर्गं प्राप्ताः, तदीयमन्त्रेषु हि, 'चक्षुषे त्वा'—इत्यादि सर्वेष्वप्यनुषक्तं। अत एताश्चतस्रः स्वयमातृण्णाश्चतसृषु दिक्षु उपधाय

सर्वदिग्वगतचक्षुर्युक्तेनाग्निना* स्वर्गं प्राप्नोति। त्रिरण्येष्टकाब्राह्मणेन सहैतद्ब्राह्मणं द्रष्टव्यम्॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः॥०॥

अग्ने आ याहि वीतये इत्याहाग्नेवैवैनमग्निं दूतं वृणीमहे इत्याह वृत्वैवैनं वृणीतेऽग्निनाग्निः समिध्यते इत्याह समिंधे एवैनमग्निर्वृचाणि जङ्घनदित्याह समिद्ध एवास्मिन्निन्द्रियं दधात्यग्नेः स्तोमं मनामहे इत्याह मनुते एवैनम्(१) एतानि वै अह्नाꣳ रूपाणि॥ १॥

अन्वहमेवैनं चिनुतेऽवाह्नाꣳ रूपाणि रुन्धे(२) ब्रह्मवादिनो वदन्ति कस्मात् सत्याद् यातयाम्नीरन्या इष्टका अयातयाम्नी लोकंपृणेत्यैन्द्राग्नी हि बार्हस्पत्येति ब्रूयादिन्द्राग्नी च हि देवानां बृहस्पतिश्चायातयामानः(३) अनुचरवती भवत्यजामित्वाय(४) अनुष्टुभानुचरत्यात्मा वै लोकंपृणा प्राणोऽनुष्टुप् तस्मात् प्राणः सर्वाण्यङ्गानि अनु चरति(५) ता अस्य हृद्दोहसः॥ २॥

---

* चक्षुर्युक्तेनाग्निना इति सर्वत्र पाठो न समीचीन इव प्रतिभाति।

इत्याह॒ तस्मा॒त्पर॑षि-पर॑षि॒ रस॒:(६) सोम॑ꣳ श्रीणन्ति पृ॒श्न॑य इत्याह॒ अन्नं॒ वै पृ॒श्नि अन्न॑मे॒वाव॑ रुन्धे॒ अर्को॑ वै अ॒ग्निर॒र्कोऽन्न॒मन्न॑मे॒वाव॑ रुन्धे(७) जन्म॑न्दे॒वाना॑ विश॒स्त्रि-षा॑रोचने दि॒व इत्याह॒मानि॒वास्मै॑ लो॒कान् ज्योति॑ष्मतः करोति॒(८) यो वै दृ॒ष्टकाना॑ प्रति॒ष्ठां वेद॒ प्रत्ये॑व॒ ति॑ष्ठति॒ तया॒,दे॒व॒तया॒ऽङ्गिर॒स्वद्ध्रु॒वा सी॒देत्याह॒ एषा वै दृ॒ष्टकाना॑ प्रति॒ष्ठा य ए॒वं वेद॒ प्रत्ये॑व॒ ति॑ष्ठति॒(९) ॥ ३ ॥

रू॒पाणि॒। स्व॒दे॒होऽस॒:। तया॒। षोड॑श च ॥ ६ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ * ॥

हिरण्मयमाहवनीयाभिधाः पञ्चम ईरिताः।

अथ षष्ठेऽक्षां रूपादयः कथ्यन्ते। यदुक्तं सूचकारेण,—'अग्ने आ याहि वीतये(१) अग्निं दूतं वृणीमहे(२) अग्निनाग्निः समिध्यते(३) अग्निर्वृत्राणि जङ्घनत्(४) अग्नेः सोमं मनामहे सिध्रमद्य' दिविस्पृशं देवस्य द्रविणस्य(५) इति पञ्चाक्षाः रूपाणि' इति। तदिदं विधातुं मन्त्राणां तात्पर्याणि क्रमेण दर्शयति;—"अग्ने आ याहि वीतये इत्याहाक्षतैवैनमग्निं दूतं वृणीमहे इत्याह हुत्वैवैनं वृणीतेऽग्निनाग्निः समिध्यते इत्याह, समिन्ध एवैनमग्निर्वृत्राणि जङ्घनदित्याह, समिद्ध एवास्मिन्निन्द्रियं दधात्यग्नेः सोमं मनामहे इत्याह मनुते एवैनम्(१)"

* एवमेव सर्व्वत्र पाठः।

इति। प्रथममन्त्रे, 'आ याहि' इत्युक्तमादरार्थं प्रतीयते। द्वितीये तु, 'वक्षीमहे' इत्युक्तमात् आहृत्य पश्चादरणं प्रतीयते। तृतीये, 'समिध्यते' इत्युक्तमात् समिन्धनम् प्रतीयते। चतुर्थे, 'वृषाणि अङ्गन्द्' इति मन्त्रवर्णोक्तेः सामर्थ्यं प्रतीयते। पञ्चमे तु 'मनामहे' इत्युक्तमान्मननं प्रतीयते। तच्च प्रथमद्वितीयौ खण्डकाण्डे (ब्रा०-१।५।२अ०) 'प्र वो वाजाः'—इत्यनुवाके समाम्नातौ, तौ चास्माभिर्द्वितीयकाण्डस्य पञ्चमप्रपाठके (७।२।एवं ८।५) सामिधेनीब्राह्मणे व्याख्यातौ। तृतीयो 'यस्या हृदा' इत्यनुवाके (१।४।४६।२) समाम्नातत्वात् तत्रैव व्याख्यातः। चतुर्थस्तु चतुर्थकाण्डस्य तृतीयप्रपाठकस्यान्त्यानुवाके (१२।१) व्याख्यातः। पञ्चमः मन्त्रखाण्डरगतः। एतैर्मन्त्रैरुपधेयानामिष्टकानाम् 'अङ्गां रूपाणि' इत्येतन्नामधेयम्।

तेषामुपधानविधिमर्थवादेनोन्नयति,—"एतानि वै अङ्गाꣳ रूपाणि अन्वहमेवैनं चिनुतेऽवाङ्गाꣳ रूपाणि दधे[१]" इति। पञ्चसु अहःसु तस्यां तस्यां चितावुपधेयत्वादेतन्मन्त्रसाध्यानि दृष्टकास्वरूपाणि अङ्गां रूपाणीत्युच्यन्ते। तान्युपदधादिति विधिरत्रेयः। तदुपधानेन सर्वदा प्रतिदिनमग्निं चितवान् भवति, कालविशेषाणामङ्गां स्वरूपं च प्राप्नोति। एतच्च ब्राह्मणवाक्यं तत्तच्चितिप्रस्तावे विभज्य द्रष्टव्यम्।

अथ लोकंपृणाया विधिमर्थवादेनोन्नयति,—"ब्रह्मवादिनो वदन्ति, कस्मात् सत्याद् यातयाम्नीरन्या इष्टका अयातयाम्नी लोकंपृणेत्यैन्द्राग्नी हि बार्हस्पत्येति ब्रूयादिन्द्राग्नी च हि देवानां हविष्कृतिस्वायातयामानः[२]" इति। "लोकं पृण छिद्रं पृण" (ब्रा०३।१।१।१)

इति मन्त्रेणोपधेया लोकंपृणा तन्नातिरिक्तानामिष्टकानामेकस्यां चितौ यद्यदेवोपधानं, तावतैव गतसारत्वात्; लोकंपृणायास्तु अगतसारत्वाद् असदुपधानं क्रियते, तदेतदगतसारत्वम् 'कस्मात्' कारणात्?-इति ब्रह्मवादिभिः पृष्टे सति ऐन्द्राग्नत्वात् वाईस्पत्यत्वाच्चेति बुद्धिमान् उत्तरं ब्रूयात्, 'इन्द्राग्नी त्वा हृहस्पतिः'—इति मन्त्रे समाम्नातत्वात् तदीयत्वम्। इन्द्राग्नी हृहस्पतिरित्येते देवाः सामर्थ्यातिशयोपेतत्वात् कदाचिदपि गतसारा न भवन्ति। तादृशीमयातयामीं लोकंपृणाख्यामिष्टकामुपदध्याद्-इति विधिरत्रेयः।

अत्र लोकंपृणेतिमन्त्रस्य मन्त्रान्तरोपेतत्वं विधत्ते,—"अनुचरवती भवद्जामित्वाय[४]" इति। "लोकं पृण छिद्रं पृण" इति मन्त्रम् 'अनु' पश्चात् चरति पचते इत्यनुचरः* द्वितीयमन्त्रः, तेनाप्युपधेयत्वात्† इयमिष्टका अनुचरवती। एकेनैव मन्त्रेण पुनःपुनरुपधाने सति आलस्यं भवेत्, मन्त्रान्तरसद्भावे तु तदालस्यं न भवति।

अनुचरमन्त्रं सामान्यतो विधाय पुनर्विशेषतो विधत्ते,—"अनुष्टुभा अनुचरत्यात्मा वै लोकंपृणा प्राणोऽनुष्टुप् तस्मात् प्राणः सर्वाणि अङ्गानि अनु चरति[५]" इति। लोकंपृणेति मन्त्र 'आत्मा' शरीरम्; अनुचरूपो द्वितीयोऽनुष्टुपुष्णन्दस्कः प्राणरूपः, यस्मादेवं, तस्मात्तोकेऽपि प्राणवायुः सर्वान् शरीरावयवाननुसृत्य चरति।

---

* 'अनुचरवतो' इति आदर्शपुस्तकपाठः। 'अनुचरोवतो' इति का० श्री० पुस्तकपाठः।

† 'तेन ह्युपधेयत्वात्' इति आदर्शपुस्तकपाठः।

तस्मिन्ननुवरमन्त्रे प्रथमपादस्य तात्पर्यं दर्शयति,—"ता अस्य सुदोहस इत्याह तस्मात्परुषि-परुषि रसः[६] इति। सुदुग्धेन दोहनीयः क्षीरादिरस उपलक्ष्यते। सुदं दुहन्तीति 'सुददोहसः', 'ताः' इष्टकाः, यस्मादेवमुक्तं, 'तस्मात्' सोमवल्लतामपि, 'परुषि-परुषि' तत्तत्पर्वणि 'रसः' अवतिष्ठते।

द्वितीयपादस्य तात्पर्यं दर्शयति,—"सोमꣳ श्रीणन्ति पृश्नय इत्याहान्नं वै पृश्निरन्नमेवाव रुन्धेऽर्को वै अग्निरर्कोऽन्नमन्नमेवाव रुन्धे[७]" इति। पृश्नयः श्वेतगोरूपा इष्टकाः, अन्नञ्च श्वेतवर्णं, तस्मादन्नप्राप्तिः*। किञ्च इष्टकचितोऽग्निरर्चनीयः, अन्नं चार्चनीयं, तस्मादप्यन्नप्राप्तिः।

द्वितीयार्द्धे 'चिच्चारोचने दिवः'—इत्यस्य तात्पर्यं दर्शयति,—"अन्नमन्देवानां विश्वस्मिंश्चारोचने दिव इत्याहेमानेवास्मै लोकान् ज्योतिष्मतः करोति[८]" इति। चिच्छब्देन लोकत्रयं गृह्यते, आरोचनशब्देन ज्योतिः, "यावती वै पृथिवी" (५।२।३) इत्यनुवाके 'त्रयोदश लोकंपृणा उप दधाति' इत्यावृत्तेर्विहितत्वाद् यातयामत्वशङ्कायां तत्परिहारोऽवाक्षातः, अतस्तत्रैवेदं ब्राह्मणं द्रष्टव्यम्। तत्र सङ्ख्यामात्रविधिमभिप्रेत्य त्रिविधुन्नयनमुक्तं; यदा तु तत्रैव विशिष्टोपधानविधिः, तदानीं नात्र विधिरुन्नेतव्यः।

अथ सर्वेष्टकाग्नेयत्वेन "तया देवतया" इति मन्त्रं विधत्ते,—"यो वै इष्टकानां प्रतिष्ठां वेद प्रत्येव तिष्ठति तया देवतयाऽङ्गिरस्वद्

---

* 'अन्नं प्राप्नम्' इति आदर्शपुस्तकपाठः। 'अन्नं प्राप्तिः' का० क्री० पुस्तकपाठः। एवं परत्रापि।

ध्रुवा सीदेत्याह एषा वै दृष्टकानां प्रतिष्ठा च एवं वेद प्रत्येव तिष्ठति(९)"-इति। मन्त्रे ध्रुवेत्यभिधानादेवोपधाने सति दृष्टकाः प्रतिष्ठिता भवन्ति, अतः सर्वास्वपि दृष्टकासु इमं मन्त्रं पठेदित्यभिप्रायः। इदं ब्राह्मणं स्वयमाह्लोपधानब्राह्मणे द्रष्टव्यम् ॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥०॥

सुवर्गाय वै एष लोकाय चीयते यदग्निर्वज्र एकादशिनी यदुभावेकादशिनीं मिनुयाद्वज्रेणैनꣳ सुवर्गाल्लोकादन्तर्दध्याद्यन्न मिनुयात् स्वरुभिः वि पप्रून् अर्ध्वयेदेकयूपं मिनोति नैनं वज्रेण सुवर्गाल्लोकादन्तर्दधाति न स्वरुभिः पप्रून् वि अर्धयति(१) वि वै एष इन्द्रियेण वीर्येण ऋध्यते योऽग्निं चिन्वन्नधिक्रामत्येन्द्रिया ॥ १

ऋचा आक्रमणं प्रतीष्टकामुप दध्यान्नेन्द्रियेण वीर्येण व्यृध्यते(२) रुद्रो वै एष यदग्निस्तस्य तिस्रः शरव्याः प्रतीची तिरश्ची अनूची ताभ्यो वै एष आ वृश्च्यते योऽग्निं चिनुतेऽग्निं चित्वा तिसृधन्वमयाचितं ब्राह्मणाय दद्यात्ताभ्य एव नमस्करोत्यथो ताभ्य एवात्मानं निष्क्रीणीते(३) यत् ते रुद्र पुरः ॥ २ ॥

धनुस्तदातो अनु वातु ते तस्मै ते रुद्र संवत्सरेण

मस्करोमि यत्ते रुद्र दक्षिणा धनुस्तदातो अनु वातु ते तस्मै ते रुद्र परिवत्सरेण नमस्करोमि यत्ते रुद्र पश्चाद्धनुस्तदातो अनु वातु ते तस्मै ते रुद्र इदावत्सरेण नमस्करोमि यत्ते रुद्र उत्तराद्धनुस्तत् ॥ ३ ॥

वातो अनु वातु ते तस्मै ते रुद्र उदुवत्सरेण नमस्करोमि यत्ते रुद्र उपरि धनुस्तदातो अनु वातु ते तस्मै ते रुद्र संवत्सरेण नमस्करोमि[४] रुद्रो वै एष यदग्निः स यथा व्याघ्रः क्रुद्धस्तिष्ठत्येवं वै एष एतर्हि सञ्चितमेतैरुप तिष्ठते नमस्कारैरेवैनꣳ शमयति[५] योऽग्नयः ॥ ४ ॥

पुरीष्याः• प्रविष्टाः पृथिवीमनु तेषां त्वमस्युत्तमः प्र णो जीवातवे सुव । आपन्वा अग्ने मनसा आपन्वा अग्ने तपसा आपन्वा अग्ने दीक्षया आपन्वा अग्ने उपसद्भिरापन्वा अग्ने सुत्यया आपन्वा अग्ने दक्षिणाभिरापन्वा अग्ने अवभृथेन आपन्वा अग्ने वृष्ट्या आपन्वा अग्ने स्वगाकारेण[६] इत्याह, एषा वै अग्नेरात्मिस्तयैवैनमाप्नोति[७] ॥ ५ ॥

ऐन्द्रिया । पुरः । उत्तराद्धनुस्तत् । अग्नयः । आह । अष्टौ च ॥ ७ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके सप्तमोऽनुवाकः ॥•॥

अङ्गां रूपाणीरितानि सर्वे लोकंपृणा* तथा।

अथ सप्तमे यूपैकत्वादीन्युच्यन्ते। यदुक्तम्, अश्वमेधकाण्डे, 'एकयूपो वैकादशिनी वा। अन्येषां यज्ञानां यूपा भवन्ति। एकविंशत्यश्वमेधेस्य' इति। तच्च विकल्पेन प्राप्तां यूपैकादशिनीमपोद्य यूपैकत्वमेव विधत्ते,—"सुवर्गाय वै एष लोकाय चीयते यदग्निर्वज्र एकादशिनी यदग्नौ एकादशिनीं मिनुयाद्वज्रेणैनꣳ सुवर्गाल्लोकादन्तर्दध्याद् यत् न मिनुयात् खरुभिः पशून् वि अर्धयेदेकयूपं मिनोति नैनं वज्रेण सुवर्गाल्लोकादन्तर्दधाति न खरुभिः पशून् वि अर्धयति(१)" इति।

योऽयमग्निः स एष सुवर्गार्थं चीयते, यूपैकादशिनी च वज्रसमाना। तत्रेदं विचार्यते, किमग्नौ पश्वर्थं यूपैकादशिनी कर्त्तव्या न वा? इति। यदि तामेकादशिनीं प्रक्षिपेत्, तदा तद्रूपेण वज्रेण एनमग्निं स्वर्गलोकादन्तर्हितं कुर्यात्, बहुयूपव्यवधानात् स्वर्गो न दृश्येत। अथ तामेकादशिनीं न प्रक्षिपेत्, तदानीं पशून् खरूभिर्वियोजयेत्, खरुशब्देन यूपतक्षणकालीनानि शकलान्युच्यन्ते; यूपाभावे च कथं तानि सम्भवेयुः, तदभावे च 'खरुणा पशूनमनक्ति' इत्येतन्न सिध्येत्। अतोभयदोषपरीहारायैकं यूपं प्रक्षिपेत्। तदानीं वज्रात्मकबहुयूपव्यवधानाभावादिममग्निं स्वर्गादन्तर्हितं न करोति। यूपसङ्गावेन खरुसङ्गावात् तद्वियोगोऽपि न भविष्यति। अस्य च ब्राह्मणस्य षोडकप्राप्तापवादरूपत्वान्नाम्नाते कस्मिंश्चिदप्यनुवाकेऽन्तर्भावः†।

---

* एवमेव सर्व्वत्र पाठो न सम्यगिव प्रतिभाति।

† नाम्नातः कस्मिंश्चिदप्यनुवाकेऽन्तर्भाव—इति का० श्री० पुस्तकपाठः।

यदुक्तं सूचकारेण,—"इन्द्रं विश्वा अवीवृधन्नित्युत्तरेण पुच्छाप्यमन्तर्विधाक्रमणं प्रतीष्टकामुपदधात्"—इति। पुच्छाप्यः पुच्छपक्षयोः सन्धिः। तदिदं सूत्राक्रमुपधानं विधत्ते,—"वि वै एष इन्द्रियेण वीर्येण ऋध्यते योऽग्निं चित्वन्नधिक्रामति ऐन्द्रिया ऋचा आक्रमणं प्रतीष्टकामुप दध्यान्नेन्द्रियेण वीर्येण व्यृध्यते[१]"—इति। 'यः' उपधानकर्ता चयनकाले 'अग्निम्' 'अधिक्रामति', स 'एष' इन्द्रियसामर्थ्येन* वियुक्तो भवति। अतस्तत्परिहाराय 'आक्रमणं' प्रतिपादप्रक्षेपस्थाने काञ्चिद् 'इष्टकाम्' 'इन्द्रं विश्वा अवीवृधत्' (४।६।३।४) इति ऋचा 'उप'-'दध्यात्'। सा च अग्निप्रणयनप्रस्तावे समाम्नातत्वात् तत्रैव व्याख्याता। अत्र पुनर्वाचनिकं विनियोगान्तरम्। एतदुपधानेन इन्द्रियसामर्थ्यवियोगो न भवति। एतच्च ब्राह्मणं 'शं युं'-बार्हस्पत्यादेरग्याक्रमणब्राह्मणात् (५।२।६) पूर्वं द्रष्टव्यम्।

अथ धनुर्दानं विधत्ते,—"रुद्रो† वै एष यदग्निस्तस्य तिस्रः शरव्याः प्रतीची तिरश्ची अनूची ताभ्यो वै एष आ वृश्च्यते योऽग्निं चिनुते योऽग्निं चित्वा तिसृधन्वमयाचितं ब्राह्मणाय दद्यात्ताभ्य एव नमस्करोति अथो ताभ्य एवात्मानं निष्क्रीणीते[२]"—इति। योऽयमग्निः स 'एष' 'रुद्रः' क्रूरो देवः। 'रुद्रो वै क्रूरः' (६।२।३) इति ह्यन्यत्राम्नातम्। 'तस्य' च क्रूरस्य 'तिस्रः' 'शरव्याः' शरेण माध्याः, प्रत्यञ्चः तिस्रः शरव्याः। यद्वा हिंसकत्वात् दृषुरेव शरव्या‡, सा च

* एवमेव सर्व्वत्र पाठः। 'इन्द्रियेण सामर्थ्येन च' इति पाठो भवितुं युक्तः।
† 'इन्द्रो वै' इति का० की० पु० पाठः।
‡ 'शरव्याः' इति सर्व्वत्र सविसर्गपाठो न सम्यक्।

धेधा,—'प्रतीची' संमुखमागच्छन्ती, 'तिरश्ची' पार्श्वयोश्च* गच्छन्ती, 'अनूची' पृष्ठत आगच्छन्ती चेति। एवं सति 'योऽग्निं चिनुते', स 'एव' 'ताभ्यः' इषुभ्यो निमित्तभूताभ्य 'आ वृश्च्यते' सर्वतश्छिद्यते, ताभिः प्रद्रुतो भवति इत्यर्थः। अतस्तत्परिहाराय तिसृभिरिषुभिर्युक्तमेकं धनुः 'अयाचितम्' अपि 'ब्राह्मणाय दद्यात्'। तेन दानेन बाधिकाभ्यः 'ताभ्य' इषुभ्यो 'नमस्करोति' 'एव'। अपि च 'ताभ्यः' इषुभ्यः सकाशात् 'एव' 'आत्मानं' स्वशरीरं 'निक्रीणीते'।

यदुक्तं सूत्रकारेण,—"तिसृधन्वमयाचितं यजमानो ब्राह्मणाय दत्वा यत्ते रुद्र पुरोधनुरिति तैर्यथालिङ्गमुपतिष्ठते"—इति। तदेतद्विधातुं मन्त्रानुत्पादयति, "यत्ते रुद्र पुरो धनुस्तदातो अनु वातु ते तस्मै ते रुद्र संवत्सरेण नमस्करोमि यत्ते रुद्र दक्षिणा धनुस्तदातो अनु वातु ते तस्मै ते रुद्र परिवत्सरेण नमस्करोमि यत्ते रुद्र पश्चाद्धनुस्तदातो अनु वातु ते तस्मै ते रुद्र इदावत्सरेण नमस्करोमि यत्ते रुद्र उत्तराद्धनुस्तदातो अनु वातु ते तस्मै ते रुद्र इदुवत्सरेण नमस्करोमि यत्ते रुद्र उपरिधनुस्तदातो अनु वातु ते तस्मै ते रुद्र वत्सरेण नमस्करोमि[४]"—इति। हे 'रुद्र', 'पुरः' पूर्वस्यान्दिशि 'ते' त्वदीयं 'यत्' 'धनुः' अस्ति, तदनुलक्ष्य 'वातो' 'वातु' प्रसरतु। किमर्थं? 'ते' त्वदर्थं, त्वत्सहायार्थमित्यर्थः। त्वया बाणे मुक्ते सति यदा वायुरनुकूलो भवति, तदा बाणः शीघ्रमुद्गच्छति, तदिदं साहाय्यम्। हे 'रुद्र', 'ते' 'त्वदीयाय' 'तस्मै' धनुषे 'संवत्सरेण' कालेन नमोऽस्तु, एकस्मिन्

* अत्र प्रकारो न साधुरिव प्रतिभाति।

संवत्सरे निरन्तरं नमस्करोमीत्यर्थः। एवमुत्तरत्रापि योज्यम्। प्रभवविभवादीनां षष्टिसंवत्सराणां मध्ये एकैकस्मिन् पञ्चके स्थिताः संवत्सराः क्रमेण संवत्सर-परिवत्सरेदावत्सरेदुवत्सरवत्सरशब्दैराऽऽख्यातिर्विवक्षिताः*। प्रथमः संवत्सरः, द्वितीयः परिवत्सरः, तृतीयः इदावत्सरः, चतुर्थः इदुवत्सरः, पञ्चमो वत्सरः। एवं सति एकैकदिग्विनिधनुषे निरन्तरमेकैकस्मिन् संवत्सरे नमस्कारः कृतो भवति।

एतन्मन्त्रसाध्यमुपस्थानं विधत्ते,—"रुद्रो वै एष यदग्निः स यथा व्याघ्रः क्रुद्धस्तिष्ठत्येवं वै एष एतर्हि संचितमेतैरूप तिष्ठते नमस्कारैरेवैनꣳ शमयति(५)"—इति। लोके क्रुद्धो व्याघ्रो गर्जन् भक्षणोद्यतो यथा भयङ्करस्तिष्ठति, एवमेवैष सम्यक् चितोऽग्निः उग्रः सन् उपस्थाने सति तन्मन्त्रगतैर्नमस्कारैः शान्तो भवति। तदिदमुपस्थानब्राह्मणं शतरुद्रीयहोमब्राह्मणाद् (५।४।२) ऊर्ध्वं द्रष्टव्यम्।

यदुक्तं सूत्रकारेण,—"येऽग्नयः पुरीष्या इति प्रयास्यन्नाग्निभिरग्निं यजमान उपतिष्ठते" इति। तदिदं विधातुं मन्त्रान् पठति,—"येऽग्नयः पुरीष्याः प्रविष्टाः पृथिवीमनु तेषां त्वमुत्तमः प्र णो जीवातवे सुव। आपं त्वा अग्ने मनसा आपं त्वा अग्ने तपसा आपं त्वा अग्ने दीक्षया आपं त्वा अग्ने उपसद्भिरापं त्वा अग्ने सुत्यया आपं त्वा अग्ने दक्षिणाभिरापं त्वा अग्ने अवभृथेनापं त्वा अग्ने वशया आपं त्वा अग्ने स्वगाकारेण(६)" इति। हे अग्ने, मया चीयमाना ये केचिदन्येऽग्नयः, 'पुरीष्याः' मृदा निष्पाद्याः 'पृथिवीम्' 'अनु' 'प्रविष्टाः' सन्ति,

* एवमेव सर्वत्र पाठः। आऽऽख्यातिर्विवक्षितेति किंवा आऽऽख्यातयो विवक्षिताः इत्येव पाठो भवितुं युक्तः।

† प्रयास्यन्नाग्नीभिरिति सर्वत्र पाठः।

'तेषां' मध्ये 'त्वम्' 'उत्तमः' 'असि', तादृशः 'त्वं' 'नः' अस्मान् 'जीवातवे' जीवनौषधाय चिरं जीवितुं 'प्र'-'सुव' प्रकर्षेण प्रेरय। हे 'अग्ने', त्वाम् 'आपम्' प्राप्तवानस्मि। सामान्येनोक्ता प्राप्तिः पुनर्विशेष्यते,—सङ्कल्पमारभ्य वशानूबन्ध्यास्वगाकारपर्यन्ताः ये सोमप्रयोगावयवाः, तैः सर्वैः त्वां प्राप्तोऽस्मि। मनः सङ्कल्पः, वचो* मन्त्रोच्चारणं, तपः अनशनं, दानं, दीक्षा मौनादिनियमः, उपसदः दिनत्रयानुष्ठेया होमाः, सुत्या सोमग्रहहोमः, दक्षिणा द्वादशशतगवाद्यः, अवभृथो जले होमः, वशा अनूबन्ध्यापशुः। स्वगाकारः अवशिष्टावदानसंपूर्त्या स्वाधीनत्वकरणम्। अत्रापि 'आपं त्वा अग्ने'—इत्यनुषज्यते।

एतन्मन्त्रसाध्यं प्रयाणकालीनोपस्थानविधिं मन्त्रव्याख्यानरूपेणार्थवादेनोन्नयति,-"एत्यादित्यैषा वै अग्नेराप्तिस्तयैवैनमाप्नोति(७)"—इति। योऽयं मन्त्रः पठितः, तं मन्त्रमुक्तप्रकारेण प्रयाणकाले ब्रूयात्, 'एषा' एव मन्त्रपाठानुष्ठितिः 'अग्नेः' प्रापिका, तस्मात् 'तयैव' अग्निं 'प्राप्नोति'॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके सप्तमोऽनुवाकः॥०॥

गायत्रेण पुरस्तादुप तिष्ठते प्राणमेवास्मिन् दधाति बृहद्रथन्तराभ्यां पक्षावोज एवास्मिन् दधाति ऋतुस्थायन्नाय्यैर्येन पुच्छमृतुधैव प्रति तिष्ठति पृष्ठैरुप तिष्ठते तेजो वै पृष्ठानि तेज एवास्मिन् दधाति(१) प्रजापति-

---

* संहितायां वचोदानयोरक्लेशो भाति।

रश्मिमसृजत सोऽस्मात् सृष्टः पराङ्त्तं वारवन्तीय
अवारयत तद्वारवन्तीयस्य वारवन्तीयत्वं श्यैत
श्येती अकुरुत तच्छ्यैतस्य श्यैतत्वम् ॥ १ ॥

यद्वारवन्तीयेनोपतिष्ठते वारयत एवैनꣳ श्यैत
श्येते। कुरुते[२] प्रजापतेर्हृदयेनापि पक्षं प्रत्युपति
प्रेमाणमेवास्य गच्छति[३] प्राच्या त्वा दिशा सादया
गायत्रेण छन्दसा अग्निना देवतया अग्नेः शीर्ष्णा अग्ने
शिर उप दधामि दक्षिणया त्वा दिशा सादयामि
वैष्टुभेन छन्दसेन्द्रेण देवतया अग्नेः पक्षेणाग्नेः पक्षमुप
दधामि प्रतीच्या त्वा दिशा सादयामि ॥ २ ॥

जागतेन छन्दसा सविचा देवतया अग्नेः पुच्छेनाग्नेः
पुच्छमुप दधामि उदीच्या त्वा दिशा सादयामि
आनुष्टुभेन छन्दसा मित्रावरुणाभ्यां देवतया अग्ने
पक्षेणाग्नेः पक्षमुप दधामि ऊर्ध्वया त्वा दिशा सादया
पाङ्क्तेन छन्दसा बृहस्पतिना देवतया अग्नेः पृष्ठेनाग्ने
पृष्ठमुप दधामि[४] यो वै अपात्मानमग्निं चिनु
अपात्माऽमुष्मिन् लोके भवति यः सात्मानं चिनुते
सात्माऽमुष्मिन् लोके भवत्यात्मेष्का उप दधात्येष
अग्नेरात्मा सात्मानमेवाग्निं चिनुते[५] सात्माऽमुष्मि
लोके भवति य एवं वेद[६] ॥ ३ ॥

श्येतत्वं। प्रतीच्या त्वा दिशा सादयामि। यः सात्मानं चिनुते। द्वाविंशतिश्च ॥ ८ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके अष्टमोऽनुवाकः ॥ ० ॥

एकयूपादिविधयः सप्तमे समुदीरिताः।

अथ अष्टमे उपस्थानादिकमुच्यते। यदुक्तं सूत्रकारेण,—"पृष्ठैरुप तिष्ठते गायत्रेण पुरस्ताद् बृहद्रथन्तराभ्यां पक्षावृतुस्थाथज्ञायज्ञियेन पुच्छं दक्षिणस्यां श्रोण्यां वारवन्तीयेनोत्तरस्यां वामदेव्येनापि पक्षे प्रजापतेः सामानृचं गायन्ति"—इति। तदेतदिधत्ते,—"गायत्रेण पुरस्तादुप तिष्ठते प्राणमेवास्मिन् दधाति बृहद्रथन्तराभ्यां पक्षावोज एवास्मिन् दधात्यृतुस्थायज्ञायज्ञियेन पुच्छमृतुष्वेव प्रति तिष्ठति पृष्ठैरुप तिष्ठते तेजो वै पृष्ठानि तेज एवास्मिन् दधाति[१]"—इति। गायत्रादीनि सामविशेषनामानि, "तत्सवितुर्वरेण्यम्" (२।५।६।४) इत्यस्मादृचि उत्पन्नं गायत्रं, तेन शिरोभ इस्य उपस्थाने सति अस्मिन्नग्नौ प्राणः स्थापितो भवति। "त्वामिद्धि हवामहे" (२।४।१४।२) इत्यस्मादृचि उत्पन्नं बृहत् "अभि त्वा शूर नो नुमः" (२।४।१४।२) इत्यस्मादृचि उत्पन्नं रथन्तरं, ताभ्यां पक्षयोरुपस्थाने सति बलं सम्पादितं भवति। "वसन्तम्*" (२।६।१२) इत्यादिकायाम् ऋचि

* 'वसन्तः' इति सर्वत्र पाठः। परन्तु 'वसन्तः' इति क्वापि ऋक्सर्वानुक्रमणी आदिर्गोत्साभिर्दृष्टः।

उत्पन्नमृतुस्थायज्ञायज्ञियं, तेन पुच्छोपस्थाने सति ऋतुषु प्रतिष्ठितो भवति। यानि पृष्ठस्तोत्रगतानि सामानि, तैः सर्वैः ग्राम्यमपि सुपतिष्ठेत। तेन शरीरकान्तिः प्राप्यते।

अथ श्रोणिदयोपस्थानाय सामद्वयं विधत्ते,—"प्रजापतिरग्निमसृजत सोऽस्मात् सृष्टः पराङैत्तं वारवन्तीयेनावारयत तद्वारवन्तीयस्य वारवन्तीयत्वम् श्यैतेन श्येती अकुरुत तत् श्यैतस्य श्यैतत्वं यद्वारवन्तीयेनोपतिष्ठते वारयत एवैनम् श्यैतेन श्येती कुरुते(१)"—इति। "अग्ने नत्वा वारवन्तम्" (१।२७।१ऋ०वे०) इत्यस्यामृचि उत्पन्नं वारवन्तीयं, तेन साम्ना पराचीनं गच्छन्तमग्निं विनिवारयामास, निवारणसाधनत्वादेव वारवन्तीयं नाम सम्पन्नम्। "अभि वः सुराधसम्" (८।४८।१ऋ०वे०) इत्यस्यामृचि उत्पन्नं श्यैतं, तेन साम्ना तं निवारितमग्निं 'श्येती' स्ववशो यथा भवति तथा 'अकुरुत'। श्यैतीकरणसाधनत्वात् श्यैतमिति साम्नो नाम। तेन सामद्वयेन श्रोणीदयोपस्थाने सति अस्य गमनं निवार्य्य, स्वाधीनं करोति। सूत्रे तु शाखान्तरानुसारेण श्यैतस्थाने वामदेव्यमुक्तम्॥

अथ पत्सन्ध्युपस्थानाय सामान्तरं विधत्ते,—"प्रजापतेर्हृदयेनाग्निं पत्सम् प्रत्युप तिष्ठते प्रेमाणमेवास्य गच्छति(२)" इति ऋग्रचितेषु स्तोमेषु यदुत्पन्नं साम प्रजापतेर्हृदयं नाम, तेषु स्तोमेष्वेतस्य सम्बन्धस्य सद्भावात् तेन पत्सन्ध्युपस्थाने सति अग्नेः प्रीतिं प्राप्नोति। एतस्योपस्थानस्य विकर्षणानन्तरभावित्वात् "अग्मन्नूर्जम्" (५।४।४) इत्यस्मिन् ब्राह्मणानुवाके तदेतत् द्रष्टव्यम्।

यदुक्तं सूत्रकारेण,—"प्राच्या त्वा दिशा सादयामीति पत्सा

त्मेष्टकाः प्रतिदिशमेकां मध्ये"—इति। तदेतद्विधातुं मन्त्रानुत्पादयति, "प्राच्या त्वा दिशा सादयामि गायत्रेण छन्दसा अग्निना देवतया अग्नेः शीर्ष्णा अग्नेः शिर उप दधामि दक्षिणया त्वा दिशा सादयामि त्रैष्टुभेन छन्दसा इन्द्रेण देवतया अग्नेः पक्षेण अग्नेः पक्षमुप दधामि प्रतीच्या त्वा दिशा सादयामि जागतेन छन्दसा सविचा देवतया अग्नेः पुच्छेनाग्नेः पुच्छमुप दधामि उदीच्या त्वा दिशा सादयामि आनुष्टुभेन छन्दसा मित्रावरुणाभ्यां देवतया अग्नेः पक्षेणाग्नेः पक्षम् उप दधामि ऊर्ध्वया त्वा दिशा सादयामि पाङ्क्तेन छन्दसा बृहस्पतिना देवतया अग्नेः पृष्ठेनाग्नेः पृष्ठमुप दधामि[४]" इति। येयं प्राची दिक्, यच्च गायत्रीच्छन्दः, यापि अग्निरूपा देवता यदपि देवतात्मनोऽग्नेः शिरः, सर्वैः सहितोऽहं हे इष्टके, त्वामस्य चीयमानस्याग्नेः शिरःस्थाने 'उप'-'दधामि'। एवमुत्तरेष्वपि योज्यम्॥

इदानीमात्मेष्टका विधत्ते,—"यो वै अपात्मानमग्निं चिनुते अपात्मा अमुष्मिन् लोके भवति यः सात्मानं चिनुते सात्मा अमुष्मिन् लोके भवति आत्मेष्टका उप दधाति एष वै अग्नेरात्मा सात्मानम् एवाग्निं चिनुते[५]" इति। आत्मा शरीरं, तद्रहितमग्निं चिन्वानः स्वर्गे शरीररहितो भवति, सात्मकमग्निं चिन्वानस्तत्र सात्मक एव भवति। तस्मात् आत्मेष्टका उपदध्यात्। शिरः-पक्ष-पुच्छरूपं शरीरमात्मा, तन्निष्पादकत्वादेव एता आत्मेष्टकाः। 'एष' शिरःप्रभृत्यवयवसङ्घ एवाग्नेः शरीरं, तस्मादेतदुपधानेन सशरीरमग्निं चिनुते।

वेदनं प्रशंसति, "सात्मा अमुष्मिन् लोके भवति य एवं वेद[६]" इति॥

अथ मीमांसा,—

सप्तमाध्यायस्य तृतीयपादे (२।४ अ०) चिन्तितम्,—

"पृष्ठैरुपस्थितौ स्तोत्रधर्माः सन्ति नवाऽग्निः।

अग्निहोत्रनयान्नैवं मन्त्रोक्तेरात्मनेपदात्॥

अग्निचयने श्रूयते,—'पृष्ठैरुपतिष्ठते' इति। पृष्ठशब्दो ज्योतिष्टोमे माध्यन्दिनसवनगतस्य स्तोत्रकर्मणो नामधेयमिति प्रथमाध्याये (४।२ अ०)निर्णीतम्। सोऽग्निचयनगतोपस्थानकर्मणि प्रयुज्यमानोऽग्निहोत्रशब्दन्यायेन पृष्ठस्तोत्रधर्मान् उपस्थानेऽतिदिशतीति चेत्। नैवम्, अत्र पृष्ठशब्दस्य मन्त्रपरत्वेन कर्मपरत्वाभावात्। 'मासमग्निहोत्रं जुहोति' इत्यत्राग्निहोत्रशब्दो जुहोतिधातुना समानाधिकरणः कर्मपरः। अत्र "उपान्मन्त्रकरणे" (१।३।२५) इत्येतत्पाणिनीयसूत्रम् उपशब्दयुक्तात्तिष्ठतिधातोरात्मनेपदं विदधत् तृतीयान्तस्य पृष्ठशब्दस्य मन्त्रात्मककरणपरतां दर्शयति। यद्यपि स्तोत्रकर्मवाची पृष्ठस्तथापि तत्साधनभूतान् रथन्तरादिसामोपेतान् 'अभि त्वा शूर' इत्यादिमन्त्रान् उपलक्षयति। न च, लक्षणाश्रयणमेव दोष इति वाच्यम्, त्वत्पक्षेऽप्याश्रयणीयत्वात्। किञ्च, त्वत्पक्षे यथा नित्याग्निहोत्रवाचिना अग्निहोत्रशब्देन तद्धर्मानुपलक्ष्य तैश्च धर्मैस्तद्युक्तं मामाग्निहोत्रात्मकं कर्मान्तरं लक्ष्यते, तथा स्तोत्रवाचिना पृष्ठशब्देन तद्धर्मोपलक्षणद्वारेणोपस्थानरूपं कर्मान्तरं लक्षणीयमिति विप्रलप्यते। तस्मात् पृष्ठशब्देन स्तोत्रधर्मान् अतिदिशन्ति।

एतच्च ब्राह्मणं नक्षत्रेष्टकात्राह्मणाद् (४।४।१० अ०) ऊर्ध्वं द्रष्टव्यम्॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठकेऽष्टमोऽनुवाकः॥ ०॥

अग्न उदधे या त इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उपजीवन्तो भूया स्माग्ने दुध्र गच्छ किꣳशिल वन्य या त इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उपजीवन्तो भूया स्म[१] पञ्च वा एतेऽग्नयो यच्चितय उदधिरेव नाम प्रथमो दुध्रः ॥ १ ॥

द्वितीयो गच्छस्तृतीयः किꣳशिलश्चतुर्थो वन्यः पञ्चमस्तेभ्यो यदाहुतीर्न जुहुयादध्वर्युञ्च यजमानञ्च प्रदहेयुर्यदेता आहुतीर्जुहोति भागधेयेनैवैनाञ्छमयति नार्तिमार्च्छत्यध्वर्युर्न यजमानो[२] वाङ्म आसन्नसोः प्राणोऽक्ष्योश्चक्षुः कर्णयोः श्रोत्रं बाहुवोर्बलमूरुवोरोजोऽरिष्टा विश्वान्यङ्गानि तनूः ॥ २ ॥

तनूवा मे सह नमस्ते अस्तु मा मा हिꣳसीः[३] अप वा एतस्मात् प्राणाः क्रामन्ति योऽग्निं चिन्वन्नधिक्रामति वाङ्म आसन्नसोः प्राण इत्याह प्राणानेवात्मन्धत्ते[४] यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु[५] आहुतिभागा वा अन्ये रुद्रा हविर्भागाः ॥ ३ ॥

अन्ये शतरुद्रीयꣳ हुत्वा गावीधुकञ्चरुमेतेन यजुषा चरमायामिष्टकायां नि दध्याद्भागधेयेनैवैनꣳ शमयति तस्य वै शतरुद्रीयꣳ हुतमित्याहुर्यस्यैतदग्नौ क्रियत

इति[1] वसवस्त्वा रुद्रैः पुरस्तात्पान्तु पितरस्त्वा यम-राजानः पितृभिर्दक्षिणतः पान्त्वादित्यास्त्वा विश्वेदेवैः पश्चात्पान्तु धुतानस्त्वा मारुतो मरुद्भिरुत्तरतः पातु ॥ ४ ॥

देवास्त्वेन्द्रज्येष्ठा वरुणराजानोऽधस्ताच्चोपरिष्टाच्च पान्तु[2] न वा एतेन पूतो न मेध्यो न प्रोक्षितो यदेन-मतः प्राचीनं प्रोक्षति यत्सञ्चितमाज्येन प्रोक्षति तेन पूतस्तेन मेध्यस्तेन प्रोक्षितः ॥ ५ ॥

दुग्धः। तनूः। हविर्भागाः। पातु। द्वाचिंशच्च ॥ ९ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके नवमोऽनुवाकः ॥ ० ॥

आत्मेष्टकामुपस्थान-मष्टमं उदीरितम्।

अथ नवमे आङ्क्त्यादिकमभिधीयते। यदुक्तं सूचकारेण, 'अग्न उदधे या ते इषुर्युवा नामेति पञ्चाज्याङ्क्तीर्जुवा' इति। तदिदं विधातुं मन्त्रानुत्पादयति। "अग्ने उदधे या ते इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्ते उपजीवन्तो भूया स्म अग्ने दुग्ध गव्य किंशिल वन्य या ते इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्ते उपजीवन्तो भूया स्म[1]" इति। उदधिरिति कस्यचिदग्ने-र्नाम, उदधिनामक हे 'अग्ने', 'ते' त्वदीया 'या' इयम् 'इषुः' 'युवा नाम' परशरीरे सहसा मिश्रणात् युवा वाणस्य नामधेयं, 'तया' युवाभिधेयया 'नः' अस्मान् 'मृड' सुखय। 'ते' त्वदीयायाः 'तस्याः'

दृषोः 'नमः' अस्तु। 'ते' त्वदीयायाः 'तस्याः' दृषोः प्रसादात् 'उपजीवन्तः' समीचीनजीवनयुक्ताः 'भूया स्म'। एवमुत्तरत्रापि योज्यम्। दुग्धादीनि चत्वारि अग्निविशेषनामानि; तैर्मन्त्रश्चतुर्धा भिद्यते। सर्वेषामप्यग्निशब्द आदावनुषज्यते। 'या ते दृषुः' इत्यादिः अन्त्यानुषङ्गः।

अथ तैर्मन्त्रैराज्ञतीर्विधत्ते,—"पञ्च वै एतेऽग्नयो यच्चितयः उदधिरेव नाम प्रथमः, दुग्धो द्वितीयः, गह्यस्तृतीयः, किंशिलश्चतुर्थः, वन्यः पञ्चमः; तेभ्यो यदाज्ञतीर्न जुहुयादध्वर्युञ्च यजमानञ्च प्रदहेयुः यदेता आज्ञतीर्जुहोति भागधेयेनैवैनान् शमयति नार्तिमार्च्छत्यध्वर्युर्न यजमानः(९)" इति। यां एताः पञ्च 'चितयः' उपर्यधोभावेन निष्पादिताः, ता एव उदध्यादिनामकाः 'पञ्च' 'अग्नयः', तेषामाज्ञत्यभावे अध्वर्युयजमानयोः दाहः स्यात्, अतस्तत्परिहाराय तैर्मन्त्रैः पञ्च आज्याज्ञती*र्जुहुयात्।

एतासाञ्च वाजनामाज्ञत्यनन्तरभावित्वात् "अग्नेर्वैश्वभ्यः" (५।४। ९अ०) इत्यनुवाकान्ते तदेतद् ब्राह्मणं द्रष्टव्यम्।

यदुक्तं सूत्रकारेण, 'वाङ्म आसन्निति सर्वत्रारोहान् प्रत्यवरोहांश्च जपति सकृदा अन्ततः' इति। नमितं विधिमुन्नेतुं मन्त्रमुत्पादयति,—"वाङ्मे आसन् नसोः प्राणोऽक्ष्योश्चक्षुः कर्णयोः श्रोत्रं बाहुवोर्बलम् ऊर्वोरोजोऽरिष्टा विश्वान्यङ्गानि तनूस्तनुवा मे सह नमस्ते अस्तु मा मा हिंसीः(१)" इति। 'मे' मदीया येयं 'वाक्', सेयम् 'आसन्' आस्ये मुखे सुस्थिता भवतु। 'नसोः' नासिकाच्छिद्रयोः 'प्राणः' सुस्थितो भवतु। तथा अक्षिगोलकयोः 'चक्षुः' इन्द्रियम्।

* पञ्च आज्ञतीः इति का० क्री० पु० पाठः।

'कर्णयोः' श्रोत्रेन्द्रियम्। वाक्नोर्नानाविधव्यापारसामर्थ्यम्। ऊर्वोर्गमन-सामर्थ्यम्। तथा 'विश्वानि' 'अङ्गानि' अरिष्टानि,—सर्वेऽप्यवयवाः हिंसारहिता भवन्तु। 'तनूः' अवयवीभूतं शरीरमपि हिंसारहित-मस्तु। 'मे' 'तनुवा' मदीयेन शरीरेण 'सह' 'ते' तुभ्यं 'नमः' साष्टाङ्गदण्डप्रणामः 'अस्तु'। अतो 'मा' मां त्वं 'मा हिंसीः'।

अथ जपविधिमुन्नयति,—"अप वा एतस्मात् प्राणाः क्रामन्ति योऽग्निं चित्वन्नधि-क्रामति वाङ्मे आसन्नसोः प्राण इत्याह प्राणानेवा-त्मन्धत्ते[४]" इति। 'यो' यजमानोऽध्वर्युर्वा अग्निचयनकाले चितम् 'अग्निम्' अधिरुह्य पादेनाक्रामति, 'एतस्मात्' 'प्राणाः' सर्वेऽपि 'अप'-'क्रामन्ति', अतः प्राणधारणाय मन्त्रे वागादीनां स्वस्थानेऽवस्थिति-रुच्यते। तस्मादिमं मन्त्रं जपेदितिविधिरभ्युन्नेयः। यदा तु 'आह' इति पदमेव ब्रूयादिति लिङर्थं ब्रूते, तदा प्रत्यक्ष एव विधिः।

एतच्च आक्रमणेष्टकाब्राह्मणात् (५।२।२) ऊर्ध्वं द्रष्टव्यम्।

यदुक्तं सूत्रकारेण,—'यो रुद्रो अग्नाविति रौद्रं गावीधुकञ्चरु-मेतेन यजुषा यस्यामिष्टकायां शतरुद्रीयं जुहोति तस्यां प्रतिष्ठा-पयति' इति। तदिदं विधातुं मन्त्रमुत्पादयति,—"यो रुद्रो अग्नौ यः अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु[५]" इति। रुद्रदेवतारूपोऽग्निः, स च लौकिके अङ्गाररूपे 'अग्नौ' उदकादिषु च प्रविश्य गूढो वर्त्तते, 'तस्मै' 'नमो अस्तु'।

एतन्मन्त्रसाध्यं चरोरुपधानं विधत्ते,—"आकृतिभागा वै अन्ये रुद्रा हविर्भागाः अन्ये, शतरुद्रीयꣳ हुत्वा गावीधुकञ्चरुमेतेन यजुषा चरमायामिष्टकायां नि दध्याद्भागधेयेनैवैनꣳ शमयति तस्य वै (तु वै)

शतरुद्रीयꣳ ऊतमित्याऊर्यस्यैतद्गौ क्रियते इति(१)" इति। "सहस्राणि सहस्रशो ये रुद्राः" इत्युक्तत्वात्(४।५।११) मन्यनेके 'रुद्राः', तेषां मध्ये केचिदाऊतिमेव भजन्ते, तदर्थः शतरुद्रीयः होमः। 'अन्ये' तु हविर्भजन्ते, तदर्थमिमं गवीधुकधान्येन निष्पादितं 'चरुं' 'नि-दध्यात्'। उपधाने सति हविर्भाजमग्निं स्वभागेन शान्तं करोति। 'यस्य' यजमानस्य क्षयने तदिदं चरूपधानं 'क्रियते', 'तस्य' एव शतरुद्रीयहोमः सफलो भवति। अन्यथा शतरुद्रीयं ऊतमप्यफलं स्यात् 'इति' अभिज्ञा 'आऊः'।

एतच्च "रुद्रो वै एष यदग्निः"—इत्यनुवाके (५।४।३) द्रष्टव्यम्।

यदुक्तं सूत्रकारेण, 'वसवस्त्वा रुद्रैः पुरस्तात् पान्त्विति यथालिङ्गं सञ्चितमग्निमाज्येन प्रोक्षति मध्य उत्तमेन प्राङ्मुखः' इति। तदिदं विधातुं मन्त्रानुत्पादयति,—"वसवस्त्वा रुद्रैः पुरस्तात्पान्तु, पितरस्त्वा यमराजानः पितृभिर्दक्षिणतः पान्तु, आदित्यास्त्वा विश्वैर्देवैः पश्चात्पान्तु, द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतः पातु, देवास्त्वा इन्द्रज्येष्ठाः वरुणराजानोऽधस्ताच्चोपरिष्टाच्च पान्तु(२)" इति। ये एते अष्टौ 'वसवः' सन्ति, ते 'रुद्रैः' एकादशभिः सह, हे अग्ने, त्वां पूर्वस्यान्दिशि रक्षन्तु। यमो राजा एषां पितॄणां ते 'यमराजानः', तादृशाः 'पितरः' अन्ये 'पितृभिः' सार्धं दक्षिणस्यान्दिशि 'पान्तु'। ये द्वादश 'आदित्याः' ते 'विश्वैर्देवैः' सार्धं 'पश्चात्पान्तु'। यो द्युतानाभिधानोऽधिकप्रकाशवान् कश्चिन्मरुतां स्वामी, स सर्वैर्मरुद्गणैः सह उत्तरस्यान्दिशि 'पातु'। इन्द्रो ज्येष्ठो वयोगुणाभ्याम् अधिको येषां देवानां ते 'इन्द्रज्येष्ठाः', वरुणो राजा येषामन्येषां देवानां ते 'वरुणराजानः', ते च उभयविधा देवा ऊर्ध्वाधोदिशोः 'पान्तु'।

अथ विधत्ते,—"न वै एतेन पूतो न मेध्यो न प्रोक्षितो यदेनम् अतः प्राचीनं प्रोक्षति यत्सञ्चितमाज्येन प्रोक्षति तेन पूतस्तेन मेध्यस्तेन प्रोक्षितः(८)" इति। 'अतः' अस्मादाज्यप्रोक्षणात् 'प्राचीनं' पूर्वमेव यदि "सहस्रस्य प्रमा असि" (४।४।११ अ०) इत्यादिमन्त्रेण हिरण्यशकलैः प्रोक्षेत्, तदानीम् 'एतेन' प्रोक्षणेन अयमग्निः 'पूतः' अपि यज्ञयोग्यो 'न' भवति, किम् बहुना, 'प्रोक्षितः' एव 'न' भवति। यदि 'सञ्चितम्' अग्निम् आज्यद्रव्येणोक्तमन्त्रेण प्रोक्षेत्, 'तेन' एव आज्यप्रोक्षणेनाग्निः 'पूतो' भवति, यज्ञयोग्यश्च भवति, सम्यक् 'प्रोक्षितः' स भवति। एतच्च "साहस्रवता प्रोक्षति" (५।४।२ अ०) इति ब्राह्मणादूर्ध्वम् अपूर्वं द्रष्टव्यम्॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके नवमोऽनुवाकः॥०॥

समीची नामासि प्राची दिक् तस्यास्तेऽग्निरधिपतिरसितो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जम्भे दधामि ऐजस्विनी नामासि दक्षिणा दिक् तस्यास्त इन्द्रोऽधिपतिः पृदाकुः प्राची नामासि प्रतीची दिक् तस्यास्ते॥ १॥

सोमोऽधिपतिः स्वजोऽवस्थावा नामास्युदीची दिक् तस्यास्ते वरुणोऽधिपतिस्तिरश्चराजिरधिपत्नी नामासि

दृहतो दिक् तस्यास्ते दृहस्पतिरधिपतिः श्वित्रो वर्शिनी नामासीयन्दिक् तस्यास्ते यमोऽधिपतिः कल्माषग्रीवो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च ॥ २ ॥

नो देष्टि तं वां जम्भे दधामि(१) एता वै देवता अग्निं चितꣳ रक्षन्ति ताभ्यो यदाहुतीर्न जुहुयादध्वर्युञ्च यजमानं च ध्यायेयुर्यदेता आहुतीर्जुहोति भागधेये-नैवैनाञ्छमयति नातिमार्ष्ट्यध्वर्युर्न यजमानो(२) हेतयो नाम स्थ तेषां वः पुरो गृहा अग्निर्व इषवः सलिलो निलिम्पा नाम ॥ ३ ॥

स्थ तेषां वो दक्षिणा गृहाः पितरो व इषवः सगरो वज्रिणो नाम स्थ तेषां वः पश्चाद्गृहाः स्वप्नो व इषवो गन्धरोऽवस्थावानो नाम स्थ तेषां व उत्तराद्गृहा आपो व इषवः समुद्रोऽधिपतयो नाम स्थ तेषां व उपरि गृहा वर्ष व इषवोऽवस्वान् क्रव्या नाम स्थ पार्थिवा-स्तेषां व इह गृहाः ॥ ४ ॥

अन्नं व इषवो निमिषो वातनामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो देष्टि तं वो जम्भे दधामि(१) हुतादो वा अन्ये देवा अहुतादोऽन्ये तानग्नि-चिदेवोभयान् प्रीणाति दध्ना मधुमिश्रेणैता आहुती-

र्जुहोति भागधेयेनैवैनान् प्रीणात्यथो खल्वाहुरिष्टका वै देवा अहुताद इति ॥ ५ ॥

अनुपरिक्रामं जुहोत्यपरिवर्गमेवैनान् प्रीणाति[1] इमꣳ स्तनमूर्जस्वन्तं धयापां प्रपातमग्ने सरिरस्य मध्ये। उत्सं जुषस्व मधुमन्तमूर्वं समुद्रियꣳ सदनमा विशस्व[2]। यो वै अग्निं प्रयुज्य न विमुञ्चति यथाऽश्वो युक्तोऽविमुच्यमानः क्षुध्यन् पराभवत्येवमस्याग्निः परा भवति तं पराभवन्तं यजमानोऽनु परा भवति सोऽग्निं चित्वा लूक्षः ॥ ६ ॥

भवतीमꣳ स्तनमूर्जस्वन्तमित्याज्यस्य पूर्णाꣳ स्रुचं जुहोत्येष वै अग्नेर्विमोको विमुच्यैवास्मै अन्नमपि दधाति[3] तस्मादाहुर्यश्चैवं वेद यश्च न सुधायꣳ ह्य वै वाजी सुहितो दधातीत्यग्निर्वाव वाजी तमेव तत् प्रीणाति स एनं प्रीतः प्रीणाति वसीयान् भवति[4] ॥७॥

प्रतीची दिक् तस्यास्ते। द्विषो यश्च। निर्लिम्पा नाम। इमं गृहाः। इति। लूक्षः। वसीयान् भवति॥१०॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके दशमोऽनुवाकः ॥ ० ॥

आज्याहुतीः प्रोक्षणं चेत्यादिकं नवमे श्रुतम्।

अथ दशमे सर्पाहुत्यादिकमुच्यते। यदुक्तं सूचकारेण,—'समीची नामासि प्राची दिगिति दध्ना मधुमिश्रेण षट्सर्पाहुतीरनुपरिचारम्' इति। तदेतद्विधातुं मन्त्रानुत्पादयति,—"समीची नामासि प्राची दिक् तस्यास्तेऽग्निरधिपतिरसिता रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जम्भे दधामि[१], ओजस्विनी नामासि दक्षिणा दिक् तस्यास्ते दक्षोऽधिपतिः पृदाकुः[२], प्राची नामासि प्रतीची दिक् तस्यास्ते सोमोऽधिपतिः स्वजः[३], अवस्यावा नामासि उदीची दिक् तस्यास्ते वरुणोऽधिपतिस्तिरश्चराजिः[४] अधिपत्नी नामासि बृहती दिक् तस्यास्ते बृहस्पतिरधिपतिः श्वित्रः[५] वश्रिनी नामासीयं दिक् तस्यास्ते यमोऽधिपतिः कल्माषग्रीवो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जम्भे दधामि[६][(१)]" इति। येयं प्राची दिक् तस्याः समीचीति नामधेयं, सम्यगञ्चतीति प्रातःकालानुष्ठानार्थं प्रवर्तते इति व्युत्पत्तेः। हे 'प्राची', त्वं समीत्यभिधा 'असि' 'तस्याः' तादृश्याः 'अग्निः' देवः स्वामी, 'असितः' कृष्णसर्पः, स च तव 'रक्षिता', 'ताभ्याम्' अधिपति-रक्षितृभ्यां 'नमः' अस्तु, 'तौ' उभौ 'नः' अस्मान् 'मृडयतां' सुखयतां, 'ते' सुखिनो वयं 'यं' पुरुषं अस्मान् हिंसितुं प्रवर्त्तमानं 'द्विष्मः', 'यश्च' शत्रुः अस्मानुदासीनानपि 'द्वेष्टि', 'तं' द्विविधं शत्रुं 'वां' युवयोः अधिपतिरक्षितोः 'जम्भे' विदारितास्ये 'दधामि' स्थापयामि। एवमुत्तरत्रापि योज्यम्। 'ओजस्विनी' बलवतीति दक्षिणदिशो नाम।

'पृदाकुः' अजगरः सर्पः। 'रचिता' इत्यादि-शेषोऽनुषज्यते। प्रकर्षेण अञ्चतीति सायंसन्ध्याद्यनुष्ठानाय प्रवर्तते इति पश्चिमदिशः प्राचीति नामधेयम्। खस्मिन् जायते इति 'खजः', खाधीनबलः सर्पः। मनुष्यान् अवस्थापयति इति व्युत्पत्त्या 'अवस्थावा'-इति उदक्-दिशो नाम। तिरश्चीनाः कटकवलयाकाराः राजयो रेखाः यस्य सर्पस्य असौ 'तिरश्चराजिः'। अधिपालयतीति व्युत्पत्त्या 'अधिपत्नी'-इति ऊर्ध्वदिशो नाम। सा च प्रौढत्वात् 'बृहती'। 'श्वित्रः', यस्य सर्पस्य श्वासधारणेन खशरीरे उच्छूनता भवति, दशनेन मनुष्यशरीरेऽप्युच्छूनता भवति, सोऽयं श्वित्रः। वशः (प्राणिनामवश्यात् खाधीनता) अस्यामस्तीति 'वशिनी'। एतच्च भूमिरूपाया अधोदिशो नाम। कल्माषाः (कृष्णबिन्दवो) ग्रीवायां यस्य सर्पस्य, सोऽयं 'कल्माषग्रीवः'। 'रचिता' इत्यादेः, सर्पस्य वाचकेभ्यः शब्देभ्यः ऊर्ध्वम् अनुषङ्गद्योतनाय अन्तिममन्त्रे पुनःपाठः।

एतन्मन्त्रमाश्रित्य आज्रुतीर्विधत्ते,—"एना वै देवता अग्निं चित्रं रचन्ति ताभ्यो यदाज्रुतीर्न जुहुयादध्वर्युं च यजमानञ्च ध्यायेयुर्यदेता आज्रुतीर्जुहोति भागधेयेनैवैनाञ्छमयति नार्तिमार्च्छत्यध्वर्युं न यजमानः[२]" इति। 'एनाः' अग्नीन्द्राद्यधिपतिरूपा अमितादिसर्परूपाश्च 'देवताः' इष्टकाभिः 'चितम्' 'अग्निं' 'रचन्ति' अतस्तासां आज्रुतीर्जुहुयात्।

यदुक्तं सूत्रकारेण, 'हेतयो नाम स्थेति' षण्महाज्रुतीर्यथा सर्पाज्रुतीः' इति। तदेतद्विधातुं मन्त्रानुत्पादयति,—"हेतयो नाम स्थ तेषां वः पुरो गृहाः अग्निर्व इषवः सलिलो[१] निलिम्पा नाम

स्थ तेषां वो दक्षिणा गृहाः पितरो व इषवः सगरो[२] वज्रिणो नाम स्थ तेषां वः पश्चाद्गृहाः स्वप्नो व इषवो गङ्करः[३] अवस्थावानो नाम स्थ तेषां व उत्तराद्गृहाः आपो व इषवः समुद्रः[४], अधिपतयो नाम स्थ तेषां व उपरि गृहाः वर्षं व इषवोऽवस्वान्[५] क्रव्या नाम स्थ पार्थिवास्तेषां व इह गृहाः अन्नं व इषवो निमिषो वातनामं तेभ्यो वो नमः ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि[६]-(९)" इति। 'हेतयः' शत्रूणां गन्तारः* हे गन्धर्वविशेषाः, यूयं हेतिनामकाः 'स्थ', 'तेषां' युष्माकं पूर्वस्यान्दिशि 'गृहाः' वर्त्तन्ते। 'अग्निः' युष्माकम् 'इषवः', अग्निसमाना इत्यर्थः। 'सलिलो' वायु-विशेषः। चरममन्त्रे पठितं 'वातनामम्' इत्यादिकं सर्वेष्वपि मन्त्रेषु अनुषज्यते। पूर्वस्यान्दिशि सञ्चरतो वायोः 'सलिलः' इति नामधेयम्। 'तेभ्यो वो नमः' इत्यादिकं विस्पष्टम्। नितरां चन्द्रेणानुलिप्ता ये गन्धर्वास्तेषां 'निलिम्पाः' इति नामधेयम्। 'पितरः' पितृसमानाः। 'सगरः' इति तत्र स्थितस्य नामधेयम्। वज्रं येषामस्तीति 'वज्रिणः', तदेतद्गन्धर्वनाम। 'स्वप्नः' स्वप्नसमानाः, यथा स्वप्नैः किञ्चिदपि प्रयोजनं नास्ति, एवमेतासामिषूणामित्यर्थः। 'गङ्करः' इति वायोर्नाम। अवस्था स्थितिः अवस्थानमेषामस्तीति 'अवस्थावानः' तदेतद्गन्धर्वनाम। 'आपः' उदकसमानाः, जलवत् सर्वदा प्रसरन्तीत्यर्थः। 'समुद्रः' इति वायोर्नाम। अधिकं पालयन्तीति 'अधिपतयः'। 'वर्षं' वृष्टिसमानाः, निरन्तरं पतन्तीत्यर्थः। 'अवस्वान्' इति वायोर्नाम। 'क्रव्याः' मांसप्रियाः, तदेतद्गन्धर्वनाम। ते च 'पार्थिवाः', पृथिव्यां वर्त्तन्ते।

* एवमेव सर्वत्र पाठः। हन्तारः इति तु भवितुमुचितः।

'दृह' भूमौ। 'अन्नम्' अन्नहेतवः। 'निमिषः' इति वायोर्नाम।

एतैर्मन्त्रैः साध्यं होमं विधत्ते,—"ऋतादो वै अन्ये देवा अऋतादोऽन्ये तानग्निर्हिदेवोभयान् प्रीणाति दध्ना मधुमिश्रेणैना आऋतीर्जुहोति भागधेयेनैवैनान् प्रीणात्यथो खल्वाऋरिष्टका वै देवा अऋताद इत्यनुपरिक्रामं जुहोत्यपरिवर्गमेवैनान् प्रीणाति[४]" इति। "पूर्वं नृषदे वड्डिति" (५।४।५अ०) इत्यनुवाके दध्ना मधुमिश्रेणावोक्षणे ऋतभक्षकदेवप्रीत्यर्थमुक्तम्, इह तु ऋतभक्षकदेवप्रीत्यर्थं तेनैव द्रव्येण होम उच्यते। अपि च एकेऽभिज्ञा एवम् 'आऋः' 'दृष्टका' एव 'अऋतादो' 'देवाः',तच्च होमेन ऋतभक्षकाणां प्रीतावप्येतासामिष्टकानां प्रीत्यर्थं होमकालेऽनुक्रमेण परितः क्रमणीयं, तेनैव परिक्रमणेन क्रमपि देवमवर्जयित्वा सर्वानप्येतावतो देवान् 'प्रीणाति'। तदेवं होमेनानुपरिक्रमणेन च ऋतादामऋतादां च सर्वेषां प्रीतिरुपपद्यते। तदिदं सर्पाऋतिमहाऋतिब्राह्मणं वातनामब्राह्मणात् (५।४।६अ०) ऊर्ध्वं द्रष्टव्यम्।

यदुक्तं सूचकारेण,—'अनुबन्ध्यावपायां ऋतायामौदुम्बरीं स्रुचं पूरयित्वेमꣳ स्तनमूर्जस्वन्तं धयापामित्यग्रेर्विमोकं जुहोति' इति। तदिदं विधातुं मन्त्रमुत्पादयति,—"इमꣳ स्तनमूर्जस्वन्तं धय अपां प्रपातम् अग्ने, सरिरस्य मध्ये उत्सं जुषस्व मधुमन्तमूर्व, समुद्रियꣳ सदनमा विशस्व[५]" इति। हे 'अग्ने', 'इमं' स्रुचि अवस्थितं द्रव्यविशेषं 'धय' पिब। कीदृशं ?—'अपां' मातृस्थानीयानां 'स्तनं' स्तनस्थानीयं, घृतस्य गोदारा उदककार्यत्वात् तदीयस्तनत्वोपचारः। 'ऊर्जस्वन्तं' रसवन्तं, 'प्रपातम्' अतिप्रवृद्धं, 'सरिरस्य' 'मध्ये',—यथा जलस्य मध्ये 'उत्सं' प्रवाहशक्तिः, तथा प्रभूतं, घृतं 'मधुमन्तं' माधुर्योपेतं 'जुषस्व'

वेवस्व। हे 'ऊर्व' विस्तृताग्ने, 'समुद्रियं' समुद्रसम्बन्धि 'सदनं' तदीयस्थानम् 'आ विशस्व' प्रविश।

एतेन मन्त्रेण माध्यं होमं विधत्ते,—"यो वै अग्निं प्रयुज्य न विमुञ्चति यथाश्वो युक्तोऽविमुच्यमानः क्षुधन् पराभवति, एवमस्याग्निः परा भवति तं पराभवन्तं यजमानोऽनु परा भवति सोऽग्निं चित्वा लूनो भवति। इमꣳ स्तनमूर्जस्वन्तं धयापामित्याज्यस्य पूर्णाꣳ स्रुचं जुहोति एष वै अग्नेर्विमोको विमुच्यैवास्मै अन्नमपि दधाति[१]" इति। 'यो' यजमानो "अग्निं युनज्मि" (४।७।१३अ०) इत्यादिभिर्मन्त्रैरेतम् 'अग्निं' कर्मणि 'प्रयुज्य' 'न' विमुञ्चेत्, 'अस्य' यजमानस्य 'अग्निः' 'परा भवति' विनश्यति, 'यथा' लोके 'अश्वो' रथे युज्यमानशिरम् 'अविमुच्यमानः' क्षुधाक्रान्तः पराभूतः पीडितो भवति तद्वत्। अग्निपराभवम् 'अनु' 'यजमानोऽपि 'परा भवति'। तादृशः 'अग्निं' 'चित्वा' 'लूनः' सर्वदा रूक्षो दाहोपेतो 'भवति', अतो जुहुयात्। 'एष' च होमः 'अग्नेर्विमोकः'। ततोऽग्निं 'विमुच्य' 'अस्मै' 'अन्नं' समर्पितवान् भवति।

पुनः प्रकारान्तरेण प्रशंसति,—"तस्मादाहुर्यस्यैवं वेद यस्य न सुधायꣳ ह वै वाजी सुहितो दधातीत्यग्निर्वाव, वाजी तमेव तत्प्रीणाति स एनं प्रीतः प्रीणाति वसीयान् भवति[२]" इति। यस्मादेवाग्निं विमुच्य अन्नं समर्पयते, तस्मात् कारणात्लोके 'यस्य' पुरुषः एनमग्निवृत्तान्तं जानाति, 'यस्य' 'न' जानाति तादृशाः सर्वेऽप्येवं 'आहुः'। 'सुहितः' सुष्ठुखाद्यादिना हृप्तो 'वाजी' 'सुधायं' स्वस्योपरि धारणीयं पुरुषं पुनःपुनर्धारयित्वा गन्तव्यस्थले नीत्वा 'दधाति' स्थापयतीति। अत्र ह-शब्दः आवाल-

---

[१] एतमित्यत्र 'एवम्' इति सुसङ्गतः पठः।

गोपालप्रसिद्धिं दर्शयति। एवं लौकिकोक्तौ सत्यामप्याग्नेयेव वाजिस्थानीयः। 'तमेव' अग्निं तेन विमोकहोमेन 'प्रीणाति'। 'सः' च 'प्रीतः' अग्निः 'एनं' यजमानं प्रीणयति। स च यजमानोऽतिशयेन धनवान् 'भवति'। एतस्य च ब्राह्मणस्य आम्नातेष्वनुवाकेष्वन्तर्भावात्सम्भवात् अन्ते निवेशः। एवमन्यस्यापि तादृशस्य द्रष्टव्यम्।

अत्र मीमांसा।

एकादशाध्यायस्य तृतीयपादे (८अ०) चिन्तितम्,—

"किमग्निमोकः सर्वान्ते मुख्यान्ते वाऽग्निमो, यतः।
योगे सर्वार्थता, नैवं, मुख्यार्थोऽसौ तदन्तिमः॥

अग्निचयने योगविमोकौ अग्नेः श्रूयेते,—"अग्निं युनज्मि" (४।७।१३अ०) इतिमन्त्रहोमो योगः। "इमं स्तनम्" (५।५।१०।६) इतिमन्त्रहोमो विमोकः। स च साङ्गप्रधानविषयः सर्वप्रयोगान्ते कर्त्तव्यः। कुतः?। योगस्य सर्वार्थत्वेन मध्ये तद्विमोकासम्भवात्। इति प्राप्ते ब्रूमः,—'पञ्चभिर्युनक्ति पाङ्क्तो यज्ञो यावानेव यज्ञस्तमाप्नोति' इत्यनेन यज्ञप्राप्तिवचनेन योगस्य प्रधानार्थत्वावगमात् प्रधानकर्मणोऽन्ते विमोकं कुर्यात्"। तत्रैव वार्तिककारमतेन चिन्तितम्,—

"व्यत्यस्तावुभौ पक्षावुत्पत्तावविशेषतः।
सर्वार्थत्वं गुणे भाति सर्वान्ते तद्विमोचनम्॥

'प्रधानान्ते विमोकः' इति यो भाष्ये सिद्धान्तः स एवात्र पूर्वः पक्षः। 'अग्निं युनज्मि शवसा घृतेन इति जुहोत्यग्निमेव तद्युनक्ति' इत्येतत् योगस्योत्पत्तिवाक्यम्। 'पञ्चभिर्युनक्ति' इति गुणविधिः। तत्र न तावदुत्पत्तौ प्रधानमात्रगामी योग इत्यस्यार्थस्य गमको विशेषोऽस्ति'

गुणविधिशेषेऽपि यज्ञशब्दो न प्रधानमात्रमाचष्टे, किन्तु, साङ्गम्। तस्मात् योगस्य सर्वार्थत्वादिमोकोऽपि सर्वाङ्गे कर्तव्य इति"।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके दशमोऽनुवाकः ॥०॥

इन्द्राय राज्ञे सूकरो वरुणाय राज्ञे कृष्णो यमाय राज्ञे ऋश्य ऋषभाय राज्ञे गवयः शार्दूलाय राज्ञे गौरः पुरुषराजाय मर्कटः क्षिप्रश्येनस्य वर्तिका नीलङ्गोः क्रिमिः सोमस्य राज्ञः कुलुङ्गः सिन्धोः शिंशुमारो हिमवतो हस्ती ॥ १ ॥

इन्द्राय राज्ञेऽष्टाविंशतिः ॥ ११ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके एकादशोऽनुवाकः ॥ ० ॥

सर्पाकृतिर्महाहोमो मोकश्च दशमे श्रुताः।

अथाग्निशेषमवभृथाप्याश्वमेधशेषभूता एकादशिनः पशवो विधीयन्ते। एकादशानां पशूनां समूहः एकादशिनी, सा चैकैकस्मिन्ननुवाके एकैका विधीयते। तत्र प्रथमामेकादशिनीमाह,—"इन्द्राय राज्ञे सूकरो वरुणाय राज्ञे कृष्णो यमाय राज्ञे ऋश्यः ऋषभाय राज्ञे गवयः शार्दूलाय राज्ञे गौरः पुरुषराजाय मर्कटः क्षिप्रश्येनस्य वर्तिका नीलङ्गोः क्रिमिः सोमस्य राज्ञः कुलुङ्गः सिन्धोः शिंशुमारो हिमवतो हस्ती" इति।

अत्र चतुर्थ्या षष्ठ्या तद्धितेन च देवतासम्बन्धः प्रतिपाद्यते। 'इन्द्राय' देवानां 'राज्ञे' 'शूकरो' वराहः आलभ्यते। 'वरुणाय' अपां 'राज्ञे' 'कृष्णः' कृष्णमृगः। 'यमाय' धर्माणां 'राज्ञे' 'ऋश्यः' मृगविशेषः। 'ऋषभाय' गवां 'राज्ञे' 'गवयो' गोसदृशः मात्सार्-रहितः। 'शार्दूलाय' आरण्यानां 'राज्ञे' 'गौरो' गौरमृगः, रक्त इत्येके, शुक्ल इत्यन्ये। पुरुषाणां राज्ञे प्रधानाय 'मर्कटः' वानरः। 'क्षिप्रश्येनस्य' क्षिप्रगतेः शकुनिराजस्य श्येनविशेषस्य 'वर्त्तिका' चटकासदृशी। 'नीलङ्गोः' नीलप्रभस्य सर्पविशेषस्य सरीसृपाणां राज्ञे 'क्रिमिः' गोमयपिण्डकारी। 'सोमस्य' ओषधीनां 'राज्ञः' 'कुलुङ्गः' चित्रगः कटुकस्वरः। 'सिन्धोः' समुद्रस्य 'शिंशुमारः' ग्राहः। 'हिमवतः' पर्वतानां राज्ञः 'हस्ती' गजः॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके एकादशोऽनुवाकः॥०॥

मयुः, प्राजापत्य ऊलो हलीक्ष्णो वृषदंशस्ते धातुः सरस्वत्यै शारिः श्येना पुरुषवाक सरस्वते शुकः श्येतः पुरुषवागारण्योऽजो नकुलः शका ते पौष्णा वाचे क्रौञ्चः॥ १॥

मयुः। चयोविंशतिः॥ १२॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके द्वादशोऽनुवाकः॥ ०॥

अथाष्ट दम्पतीमाह,—

"मयुः प्राजापत्यः जलो हलीक्ष्णो हृषदंशः ते धातुः सरखत्यै शारिः श्वेता पुरुषवाक् सरखते शुकः श्वेतः पुरुषवाक् आरण्योऽजो नकुलः अका ते पौष्णाः वाचे क्रौञ्चः" इति। 'मयुः' किंपुरुष इत्येके, आरण्यमयूर इत्यपरे। स 'प्राजापत्यः'। जलादयस्त्रयो 'धातुः'। 'जलः' काकः, जलूक इत्यन्ये, दिव्यकर्ण इत्यपरे। 'हलीक्ष्णः' हृष्टहिंसक इत्येके, हरितचटक इत्यन्ये। 'हृषदंशो' मार्जारः, तत्सदृश इत्येके। 'सरखत्यै' 'शारिः' शुकस्त्री, कीदृशी? 'श्वेता' अरुणवर्णा। पुनश्च विशेष्यते—'पुरुषवाक्',—पुरुषवत् वदितुं समर्था। 'सरखते' 'शुकः' 'श्वेतः' 'पुरुषवाक्'। पूर्ववत् व्याख्येयम्। आरण्याजादयस्त्रयः 'पौष्णाः'। 'आरण्योऽजः' शरभः। 'नकुलः' प्रसिद्धः। 'अका' मक्षिका इत्येके, दीर्घकर्णो मृगविशेष इत्यन्ये। 'वाचे' वाग्देवतायै 'क्रौञ्चो' दारुणखनः पक्षिविशेषः॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके द्वादशोऽनुवाकः॥०॥

अपां नप्त्रे जषो नाको मकरः कुलीकयस्तेऽकूपारस्य वाचे पैङ्गराजो भगाय कृषीतक आती वाहसो दर्विदा ते वायव्या दिग्भ्यश्चक्रवाकः॥ १॥

अपां नप्त्रे। एकान्नविंशतिः॥ १३॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके त्रयोदशोऽनुवाकः॥ ०॥

द्वयोरनुवाकयोः एकादशिनी दशिनी चेति ।
सुगमत्वादपि यथायोगं द्रष्टव्यम् ।

अथ तृतीयं मन्त्रमाह,—"अपां नप्त्रे जषो नाक्र
ते अकूपारस्य वाचे पैङ्गराजो भगाय कुषीतकः आती वाहसो दर्विदा
ते वायव्याः दिग्भ्यश्चक्रवाकः" इति। 'अपां नप्त्रे' अपाम् अविनाशिने
देवविशेषाय 'जषः' जषवत्प्रुण्डो मकरः। नाक्राद्यस्त्रयः 'अकूपारस्य'
समुद्रस्य। 'नाक्रः' दीर्घतुण्डो ग्राहः, दीर्घपुच्छो मत्स्यविशेष इत्येके।
'मकरः' पर्यस्ततुण्डः। 'कुलीकयो' बकपात् मत्स्यविशेषः। 'वाचे'
'पैङ्गराजः' रौक्षाजो भरद्वाजः, समुद्रतरङ्गे-चारी महापक्षी इत्यन्ये,
चकोर इत्यपरे। 'भगाय' 'कुषीतकः' समुद्रकाकः। आद्यादयस्त्रयो
'वायव्याः',—'आती' कुरङ्गी, चाष इत्यन्ये। 'वाहसः' पृष्ठे कुलशक्त-
वाही जन्तुः। 'दर्विदा' जलपक्षी, द्रुमकुक्कुट इत्येके। 'दिग्भ्यः'
दिग्देवताभ्यः। 'चक्रवाकः' प्रसिद्धः॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-
संहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके त्रयोदशोऽनुवाकः॥०॥

बलायाजगर आखुः सृजया शृयण्डकस्ते मैचा मृत्यवेऽजिरो
मन्यवे स्वजः कुम्भीनसः पुष्करसादो लोहितास्ते त्वाष्ट्राः प्रतिश्रुत्कायै वाहसः॥१॥१४॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके
चतुर्दशोऽनुवाकः॥०॥

अथ चतुर्थं मन्त्रमाह,—

"बलाय अजगरः आखुः सृजया ग्रयण्डकः ते मेचाः मृत्यवे असितो मन्यवे खजः कुम्भीनसः पुष्करसादो लोहिताक्षिः ते लाङ्गाः प्रतिश्रुत्काये वाहसः" इति। 'बलाय' बलाख्याय देवाय 'अजगरो' महोरगः। आखादयस्त्रयो 'मेचाः'। 'आखु' प्रसिद्धः। 'सृजया' नीलमक्षिका, शुक्लसर्प इत्येके, नीलमक्षिव इत्यपरे। 'ग्रयण्डकः' कृकलासः। 'मृत्यवे' 'असितः' कृष्णसर्पः। 'मन्यवे' 'खजः' 'सर्पविशेषः' बिलादिषु यः स्वयमेव जायते। कुम्भीनसादयस्त्रयः 'लाङ्गाः' [illegible] 'कुम्भीनसः' खापशीलः सर्पावशेषः। 'पुष्करसादः' पुष्करसर्पः, भ्रमर इत्येके। 'लोहिताक्षिः' श्वेतलोहितसर्पः। 'प्रतिश्रुत्काये' प्रतिश्रुत्यै, 'वाहसः' कल्पप्रमाणसर्पः॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके चतुर्दशोऽनुवाकः॥

पुरुषमृगश्चन्द्रमसे गोधा कालका दार्वाघाटस्ते वनस्पतीनामेव्यृक्षे कृष्णो राचिये पिकः क्विङ्का नीलशीर्षा नैर्ऋत्यै धातुः कल्कटः॥ १॥ १५॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके पञ्चदशोऽनुवाकः॥ ०॥

अथ पञ्चमं वल्गमाह,—

"पुरुषमृगः चन्द्रमसे गोधा कालका दार्वाघाटः ते वनस्पतीनाम् एणी अक्षे कृष्णः राचिये पिकः खिङ्गा नीलशीर्षी ते अर्यम्णे धातुः कत्कटः" इति। 'पुरुषमृगः' नरमुखो मृगविशेषः 'चन्द्रमसे'। गोधादयस्त्रयो 'वनस्पतीनाम्'। 'गोधा' सुषलिका, महागोधा इत्येके। 'कालका' सरटा। 'दार्वाघाटः' द्रुमकुक्कुटः। 'एणी' मृगी 'अक्षे'। 'कृष्णः' कृष्णमृगः 'राचिये'। पिकादयस्त्रयः 'अर्यम्णे'। 'पिकः' कोकिलः। 'खिङ्गा' रक्तमुखी वानरी। 'नीलशीर्षी' कृष्णशिरस्की। 'धातुः' 'कत्कटः' विलवासी कर्कटः॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः संहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके पञ्चदशोऽनुवाकः॥०॥

सौरी बलाकाश्यो मयूरः श्येनस्ते गन्धर्वाणां वल्गां कपिञ्जलो रुद्राणां तित्तिरी रोहित्कुरुण्डाची गोलक्तिका ता अप्सरसामरण्याय स्तृणुरः॥ १॥ १६॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके षोडशोऽनुवाकः॥ ०॥

अथ षष्ठं वल्गमाह,—

"सौरी बलाका श्यो मयूरः श्येनः ते गन्धर्वाणां वल्गां कपिञ्जलो रुद्राणां तित्तिरिः रोहित् कुरुण्डाची गोलक्तिका ताः

अप्सरसाम् अरण्याय चमरः" इति। 'सौरी' 'बलाका' प्रसिद्धा। चतस्रादयस्तयो 'गन्धर्वाणाम्', ते तु प्रसिद्धाः। 'वसूनां' 'कपिञ्जलः' अधोनिपाती। 'रुद्राणां' 'तित्तिरिः' परुषस्वरः। रोहितादयस्त्रिस्रः 'अप्सरसाम्'। 'रोहित्' चटकस्त्री। 'कुण्डृणाची' गृहगोधिका। 'गोलक्तिका' खञ्जरीटका, पीतशुक्लेति केचित्। 'अरण्याय' अरण्यनामकाय, 'चमरः' चमरः॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके षोड़शोऽनुवाकः॥०॥

पृषतो वैश्वदेवः पिल्वो न्यङ्कुः कश्स्ते ऽनुमत्या अन्यवापोऽर्धमासानां मासां कश्यपः क्रयिः कुटरुर्दात्यौहस्ते सिनीवाल्यै दृहस्पतये शित्पुटः॥ १॥ १७॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके सप्तदशोऽनुवाकः॥ ०॥

अथ सप्तमं सूक्तमाह,—

"पृषतो वैश्वदेवः पिल्वो न्यङ्कुः कश्ः ते अनुमत्यै अन्यवापः अर्धमासानां मासां कश्यपः क्रयिः कुटरुः दात्यौहः ते सिनीवाल्यै दृहस्पतये शित्पुटः" इति। 'पृषतः' श्वेतबिन्दुश्ववलाङ्गो मृगः। पिलादयस्त्रयः 'अनुमत्यै'। 'पिल्वो' व्याघ्रः। 'न्यङ्कुः' हरिणः, चमर इत्येके। 'कश्ः' 'अन्यवापः' 'कश्यपः' 'क्रयिः' कुटरवो* मृगविशेषाः।

---

* अत्र 'कुटरुः,—एते' इत्येतादृशः कोऽपि पाठो भवितुं युक्तः।

'दात्यौहः' काकलकण्ठ इत्येके, पुष्करिणीवसतिरित्यन्ये। 'हृदयनवे' 'मित्पुटः' मार्जारसदृशो जातिविशेषः ॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके सप्तदशोऽनुवाकः ॥ ० ॥

शका, भौमी पांचः कशो मान्थीलवस्ते पितॄणाम्ऋतूनां जहका संवत्सराय लोपा कपोत उलूकः शशस्ते नैर्ऋताः कृकवाकुः साविचः ॥ १ ॥

बलाय। पुरुषमृगः। सौरी। पृषतः। शका। अष्टादश। अष्टादश ॥ १८ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके अष्टादशोऽनुवाकः ॥ ० ॥

अथाष्टमं सूक्तमाह,—

"शका भौमी पांचः कशो मान्थीलवः ते पितॄणाम्, ऋतूनां जहका, संवत्सराय लोपा कपोतः उलूकः शशः ते नैर्ऋताः कृकवाकुः साविचः" इति। 'शका' मक्षिका। 'भौमी' भूमिदेवता। पांचादयस्त्रयः 'पितॄणाम्'। पांचकशौ पक्षिविशेषौ। 'मान्थीलवः' अरण्यकुक्कुटः। 'ऋतूनां' 'जहका' बिलवासी कोष्टा। 'संवत्सराय' 'लोपा' शशाभिन्नशकुनिः। कपोतादयस्त्रयो नैर्ऋताः', ते च प्रसिद्धाः। 'कृकवाकुः' कुसरण्यकुक्कुटः ॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके अष्टादशोऽनुवाकः ॥०॥

हरूरौद्रः शकलासः शकुनिः पिप्पका ते शरव्यायै हरिणो मारुतो ब्रह्मणे शार्गस्तरक्षुः कृष्णः श्वा चतुरक्षो गर्दभस्त इतरजनानामग्नये धूङ्क्षणा ॥ १ ॥

हरुः। विꣳशतिः ॥ १९ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके ऽनविंशोऽनुवाकः ॥ * ॥

नवमं संघमाह,—

"हरुः रौद्रः शकलासः शकुनिः पिप्पका ते शरव्यायै हरिणो मारुतो ब्रह्मणे शार्गः तरक्षुः कृष्णः श्वा चतुरक्षो गर्दभः ते इतरजनानाम् अग्नये धूङ्क्षणा" इति। 'हरुः' मृगविशेषः। शकलासादयस्त्रयः 'शरव्यायै'। शरव्या बाणधारिणी देवता। 'शकलासः' कामरूपी। 'शकुनिः' काकः। 'पिप्पका' पक्षिविशेषः। 'हरिणः' प्रसिद्धः। 'शार्गः' आरण्यशटकः। तरक्षादयस्त्रयः 'इतरजनानाम्'। 'तरक्षुः' व्याघ्रविशेषो गर्दभाकारः। कृष्णवर्णः 'चतुरक्षः' 'श्वा' अक्ष्णोः उपरि बिन्दुद्वयवान् चतुरक्षः। 'धूङ्क्षणा' श्वेतकाकी॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके एकोनविंशोऽनुवाकः ॥०॥

अजस आन्तरिक्ष उद्रो मद्गुः शवस्तेऽपामदित्ये हꣳससाचिरिन्द्राण्ये कीर्ग्रा गभ्रः शितिकक्षो वार्ध्राणसस्ते दिव्या शावाऽपृथिव्या श्वावित् ॥ १ ॥ २० ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके विंशोऽनुवाकः ॥ ० ॥

दशमं सङ्गमाह,—

"अजस आन्तरिक्ष उद्रो मद्गुः शवः ते अपाम् अदित्ये हꣳससाचिः इन्द्राण्ये कीर्ग्रा गभ्रः शितिकक्षो वार्ध्राणसः ते दिव्याः शावाऽपृथिव्या श्वावित्" इति। 'अजसो' भासः। 'आन्तरिक्षः' प्रसिद्धः। उद्रादयस्त्रयः 'अपाम्'। 'उद्रो' जलविडालः। 'मद्गुः' जलकाकः। 'शवः' तस्यैव अवान्तरजातिविशेषः। 'हꣳससाचिः' सर्वश्वेतो हंसः। 'कीर्ग्रा' कृष्णाङ्गी शकुनिका। गभ्रादयस्त्रयो 'दिव्याः'। 'गभ्रः' प्रसिद्धः। 'शितिकक्षो' पाण्डरोदरो गभ्रः। 'वार्ध्राणसः' खड्गमृगः। 'श्वावित्' शशकी सूचीरोमा॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके विंशोऽनुवाकः॥०॥

सुपर्णः पार्जन्यो हꣳसो हको हषद्वꣳशस्त ऐन्द्रा अपामुद्रोऽर्यम्णो लोपाशः सिꣳहो नकुलो व्याघ्रस्ते मह्ये न्द्राय ग्रामाय परस्वान्॥ १ ॥

अजवः* सुपर्णः अष्टादश अष्टादश ॥ २१ ॥

अथैकादशं सप्तमाह,—

"सुपर्णः पार्जन्यो हꣳसो वृको वृषदꣳशः ते ऐन्द्राः अपाः अर्वण्णो लोपाशः सिꣳहो नकुलो व्याघ्रः ते महेन्द्राय कामाय परस्वान्" इति। 'सुपर्णः' प्रसिद्धः। हंसादयस्त्रयः 'ऐन्द्राः'। 'वृकः' अरण्यस्था। 'वृषदंशो' मार्जालसदृशः। 'उद्रो' जलविडालः। 'लोपाशः' क्रोष्टा। सिंहादयस्त्रयो 'महेन्द्राय'। ते च प्रसिद्धाः। 'परस्वान्' मदिवः॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके एकविंशोऽनुवाकः ॥०॥

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शितिपादो वैश्वदेव ऐन्द्रोऽरुणो मारुतः कृष्णाघ ऐन्द्राग्नः सꣳहितो ऽधोरामः सावित्रो वारुणः पेत्वः ॥ १ ॥

आग्नेयः द्वाविꣳशतिः ॥ २२ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके द्वाविंशोऽनुवाकः ॥ * ॥

---

* A पुस्तके विंशानुवाकशेषे "अजवः अष्टादश", एवं एकविंशानुवाकशेषे "सुपर्णः अष्टादश" इति एवमुभय पठितम्। इदमेव सम्यक्।

उक्ताः सर्वे आरण्याः। अथ ग्राम्यास्तत्रः सप्तः। तत्र प्रथमं सप्तमाह,—

"आग्नेयः कृष्णग्रीवः सारस्वती मेषी वभ्रुः सौम्यः पौष्णः श्यामः त्रितिपृष्ठो बार्हस्पत्यः त्रिवत्सो वैश्वदेवः ऐन्द्रोऽरुणः मारुतः कल्मावः ऐन्द्राग्नः सङ्कृत्तिः अधोरामः सावित्रो वारुणः पेत्वः" इति। कृष्णो वर्णो ग्रीवायां यस्य छागस्य असौ 'कृष्णग्रीवः'। 'वभ्रुः' पिङ्गलवर्णः। 'त्रितिपृष्ठः' श्वेतपृष्ठः। 'त्रिवत्सो' वत्सरूपः। 'कल्मावः' कृष्णबिन्दुलाञ्छितः। 'संकृत्तिः' कृष्णः कृष्णश्रवाः। 'अधोरामः' श्वेतकृष्णोदरः। 'पेत्वो' गलितरेतस्को मेषः॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके द्वाविंशोऽनुवाकः॥०॥

अश्वस्तूपरो गोमृगस्ते प्राजापत्या आग्नेयौ कृष्णग्रीवौ त्वाष्ट्रौ लोमशसक्थौ त्रितिपृष्ठौ बार्हस्पत्यौ धाने पृषोदरः सौर्यो वलक्षुः पेत्वः॥ १॥

अश्वः षोडश॥ २३॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे पञ्चमप्रपाठके द्वाविंशोऽनुवाकः॥ ०॥

अथ द्वितीयं सप्तमाह,—

"अश्वः तूपरो गोमृगः ते प्राजापत्याः आग्नेयौ कृष्णग्रीवौ त्वाष्ट्रौ लोमशसक्थौ त्रितिपृष्ठौ बार्हस्पत्यौ धाने पृषोदरः सौर्यो वलक्षः

अथाऽऽद्य प्रपाठकस्य विनियोगसङ्ग्रहः ।
औपानुवाक्ये ये मन्त्रा आधातास्तानथ ब्रुवे ।
आग्नेयीष्टिद्वयौ हौत्रे विद्याद्दायुमतीद्वयम्(१) ॥
'पीवोन्नाम्' इति विज्ञेयं 'हिरण्य'(१)-इति चतुर्थकम् ।
'प्रजापतिस्त्वा'(१)-भूस्तूर्णं हि 'अग्ने युक्ष्वा'(१)-दयाऽऽप्तिः ॥
'चित्तं देवा' इति सौरी(१) स्याद् 'याश्ते यावो' यजुर्द्वयम् ।
'चितिं जुहोमि'(१)-इति होमः स्तूर्णेत् 'चित्तिमचित्तिम्' ॥
मन्त्रा हिरण्येष्टकानां 'विश्वकर्मा'(१) इति पञ्च हि ।
प्राजापत्यादिपदतो मन्त्रभेदोऽवगम्यताम् ॥
इष्टकास्त्वयमाहत्या निदध्याद्व्याहृतित्रयात् ।
पुनर्दित्तु चतस्रस्ताः 'प्राणाय'(१) इति चतुष्टयात् ॥
पदभेदान्मन्त्रभेदाः 'त्वा चक्षु'(५।५।७)-इत्यनुषज्यते ।
अष्टौ रूपाणीष्टकाः स्युः 'अग्न आ याहि'(१)-पञ्चकात् ॥
'लोकं पृणा'(१) इति मन्त्रस्य नान्तरोऽनुचरो भवेत् ।
'इन्द्रं विश्वा' खगेन्द्री स्यात् 'यज्ञे' पञ्चोपतिष्ठते ॥
येऽग्नयो(७) बहुभिर्मन्त्रैः प्रयाजस्तूपतिष्ठते ।
सामनामानि(८) गायत्रं बृहत्तद्द्वयन्तरम् ॥
चतस्रा-यज्ञायज्ञीयं वारवन्तीयकं तथा ।
त्रैतं प्रजापतेर्ज्ञेयं पृष्ठं स्तोत्रार्थसाम हि ॥
पक्षाकारं चितं वह्निं तैदग्नीरुपतिष्ठते ।
आत्मेष्टका उपादध्यात् 'प्राच्या त्वा' इत्यादि मन्त्रतः ॥
'अपे',(९) होमः पञ्चभिः स्याद्भाषीर्मन्त्रभेदनम् ।

चित्यारोहे जपेदाद्ये यो रुद्रो निचिपेत्यदम् ॥
यजयज्ञा पञ्चमन्त्रैः प्रोक्षेदाज्येन सन्विति ।
समीची(१०) सर्पहोमः स्याद् 'रक्षिता' इत्यनुवध्यते
हेतयस्तु महाहोमो 'वातनाम' अनुवध्यते ।
'इमं स्तनं'(१०।७) पूर्णहोम इति मन्त्रा इहेरिताः ॥
'इन्द्राय राज्ञे', (११)-इत्युक्ता एकादशिनीनामकाः ।
इष्टिन्याख्यास्तु(११-२४) पञ्चवत्ते सर्वेऽप्यश्वमेधकाः ॥
वेदार्थस्य प्रकाशेन तमो हार्दं विनाशयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-श्रीवीरबुक्ष-प्रभृतसाम्राज्यधुरन्धरेण माधवाचार्येण विरचिते माधवीये वेदार्थ-प्रकाशनामकतैत्तिरीययजुःसंहिताभाष्ये पञ्चमकाण्डे पञ्चमप्रपाठके सप्तविंशोऽनुवाकः ॥ ० ॥

समाप्तश्च प्रपाठकः ॥

॥ ० ॥ ॐतत्सत् ॥ ० ॥

॥०॥ श्रीगणेशाय नमः ॥०॥

तैत्तिरीयसंहिताभाष्ये।

पञ्चमकाण्डे षष्ठप्रपाठके

प्रथमोऽनुवाकः।

हरिः ओम् ॥

हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। अग्निं या गर्भमदधिरे विरूपास्ता न आपः शꣳ स्योना भवन्तु[1]। यासाꣳ राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानाम्। मधुश्चुतः शुचयो याः पावकास्ता न आपः शꣳ स्योना भवन्तु[2]। यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति। याः पृथिवीं पयसोन्दन्ति ॥ १ ॥

शुक्रास्ता न आपः शꣳ स्योना भवन्तु[3]। शिवेन मा चक्षुषा पश्यतापः शिवया तनुवोप स्पृशत त्वचं मे सर्वाꣳ अग्नीꣳ रप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त[4]। यदूदः सम्प्रयतीरहावनदता हते। तस्मादा

वो नप्तो नाम स्थ ता वो नामानि सिन्धवः[५]। यत् प्रेषिता वरुणेन ताः शीभं समवल्गत ॥ २ ॥

तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनु स्थन[६]। अपकामꣳ स्यन्दमाना अवीवरत वो हिकम्। इन्द्रो वः शक्तिमिर्देवीस्तस्माद्वार्णाम वो हितम्[७]। एको ह्वो अप्यतिष्ठत् स्यन्दमाना यथावशम्। उदानिषुर्महीरिति तस्मादुदकमुच्यते[८]। आपो भद्रा घृतमिदाप आसुरग्नीषोमौ बिभ्रत्याप इत्ताः। तीव्रो रसो मधुपृचाम् ॥ ३ ॥

अरङ्गमाय मा मो प्राणेन सह वर्चसा गन्[९]। आदित् पश्चाम्युत वा शृणोम्या मा घोषो गच्छति वाङ् म [illegible]म्। मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः[१०]। आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे[११]। यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः[१२]। तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः[१३]। द्यावि अयस्वान्तरिक्षे यतस्व पृथिव्या सम्भव ब्रह्मवर्चसमसि ब्रह्मवर्चसाय त्वा[१४] ॥ ४ ॥

उन्दन्ति। समवल्गत। मधुपृचां। मातरः। द्यावि [illegible]तिष्व ॥ १ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके प्रथमोऽनुवाकः ॥ ० ॥

श्रीगणेशाय नमः।

हरिः ओम्।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥
उक्ता वायव्यपश्वाद्याः पञ्चमे हि प्रपाठके।
कुण्डेष्टकाभिमन्त्रणादीन् षष्ठे मन्त्रानुदीरयेत्॥

यदुक्तं सूत्रकारेण,—'हिरण्यवर्णाः इति उपहिता अभिमन्त्रयते' इति।

तत्र कुण्डेष्टकाभिमन्त्रणार्थानां चयोद्यानाम् ऋचां मध्ये प्रथमामाह,—"हिरण्यवर्णाः शुचयः पावकाः यासु जातः कश्यपो यासु इन्द्रः। अग्निं याः गर्भं दधिरे विरूपाः ताः नः आपः शꣳ स्योनाः भवन्तु[१]" इति। आपः तावन्निर्मलत्वेन भास्वरत्वात् हिरण्यसदृग्वर्णोपेताः। तथा 'शुचयः' स्वयं शुद्धाः। 'पावकाः' ज्वालादिना शरीरादिशुद्धिहेतवश्च। 'यासु' अप्सु कश्यपाख्यः प्रजापतिरुत्पन्नः। 'यासु' अप्सु 'इन्द्रः' अपि उत्पन्नः। 'अग्निं' च 'याः' आपो गर्भत्वेन 'दधिरे'। तदेतत्त्रयं ब्राह्मणान्तरगतेभ्योऽर्थवादेभ्यो द्रष्टव्यम्। अत्रापि 'अग्ने गर्भो अपामसि' (४।२।४।२) इति चतुर्थकाण्डे

अनाधारमाख्यातम्। ईदृशो वा 'आपः', 'ताः' 'सोनाः' सुखकारिण्यः, अतोऽस्मान् 'नः' 'भवन्तु' सुखं प्रापयन्तु।

अथ द्वितीयामाह,—"यासाम् राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानाम्। मधुश्चुतः शुचयो याः पावकास्ता नः आपः शम् स्योनाः भवन्तु[२]" इति। वरुणाख्यो 'राजा' अपाम् अधिपतिः 'यासाम्' अपां 'मध्ये' 'याति' गूढः सञ्चरति। किं कुर्वन्? 'जनानां' 'सत्यानृते' 'अवपश्यन्' ज्ञानपापादौ यत् यद्या-चरणमाचरति तत्सर्वम् अवपश्यन्। 'ताः' च 'आपः' मधुररसं स्रोतन्ति क्षारयन्ति इति 'मधुश्चुतः'। 'शुचयः' इत्यादि पूर्ववत्।

अथ तृतीयामाह,—"यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति। याः पृथिवीं पयसा उन्दन्ति शुक्राः ताः नः आपः शम् स्योनाः भवन्तु[३]" इति। 'दिवि' द्युलोके 'देवाः' 'यासाम्' अपां सम्बन्धि सारं 'भक्षं' 'कृण्वन्ति' स्वभोज्यं कुर्वन्ति। द्यौर्वै हि देवैः सेव्यते, तच्च अपां सारभूतम्। 'याः' च आपः 'अन्तरिक्षे' वृष्टिधारारूपेण बहुप्रकारा 'भवन्ति'। 'याः' च आपः 'पृथिवीं' सर्वां 'पयसा' स्वकीयेन द्रवेण 'उन्दन्ति' क्लेदयन्ति। 'शुक्राः' निर्मलाः। 'ता नः आपः' इत्यादि पूर्ववत्।

अथ चतुर्थीमाह,—"शिवेन मा चक्षुषा पश्यत आपः शिवया तनुवा उप स्पृशत त्वचं मे। सर्वाग्नीग्ं रप्सुषदो हुवे वः मयि वर्चो बलम् ओजो नि धत्त[४]" इति। हे 'आपः', यूयं 'शिवेन' 'चक्षुषा' प्रीत्या दृष्ट्या 'मा' 'पश्यत' माम् अवलोकयत। तथा 'शिवया तनुवा' प्रीत्या मदीयेन शरीरेण 'मे' 'त्वचं' 'उप स्पृशत'।

अथमपि 'अप्सुषदः' जलेषु स्थितान् 'सर्वान्' अपि अग्नीन् 'उभे' द्युलोकेन तर्पयामि। 'वः' युष्मदीयं यत् 'वर्चः' कान्तिः, यच्च 'यज्ञ' यदपि 'ओजः' बलहेतुरष्टमो धातुः, तत्सर्वं 'मयि' 'नि धत्त' स्थापयत।

अथ पञ्चमीमाह,—"यत् अदः सम्प्रयतीः अह्नो अनदतः हते। तस्मात् आ नद्यो नाम स्थ ता वो नामानि, सिन्धवः(५)" इति। 'यत्' यस्मात्कारणात् 'अदः' द्युलोकस्थानात् 'सम्प्रयतीः' सम्यक् प्रकर्षेण गच्छन्त्यो हे आपः, यूयं, अहिशब्दो मेघनामधेयं, यस्मिन् 'हते' युष्माभिस्ताडिते सति 'अनदत' नादं कृतवत्यः। प्रवाहगतपाषाणेष्विव मेघेषु जलाघातेन शब्दो जायते। यस्मान्नादं कृतवत्यः, 'तस्मात्' 'आ' समन्तात् सर्वेष्वपि स्थानेषु 'नद्यो नाम स्थ' नदीति नामधेयं प्राप्ताः। हे 'सिन्धवः' स्यन्दनशीलाः आपः, 'वः' युष्माकं 'ताः' तानि 'नामानि' तादृशानि निर्वचनसाध्यानि नामानि विद्यन्ते।

अथ षष्ठीमाह,—"यत् प्रेषिताः वरुणेन ताः ग्रीभ्रं समवल्गत। तद् आप्नोत् इन्द्रो वः यतीः तस्मात् आपो अनु स्थन(६)" इति। हे आपः, 'यत्' यस्मात्कारणात् 'वरुणेन' 'प्रेषिताः' 'ताः' यूयं 'ग्रीभं समवल्गत' शीघ्रं यथा भवति तथा सम्यक् वल्गनावत् नृत्तं कृतवत्यः। 'तत्' तदानीं 'यतीः' प्रसरन्तीः 'वः' युष्मान् 'इन्द्रः' उदकुकः सन् द्रष्टुम् 'आप्नोत्'। 'तस्मात्' कारणात् आप्यन्ते इति व्युत्पत्त्या 'आपः' इति नामधेयं प्राप्य 'अनु स्थन' सर्वेषामनुकूलाः स्थताः*।

---

* एवमेव सर्वत्र पाठः। 'स्थात' अथवा 'तिष्ठत' इति पाठो भवितुं युक्तः।

अथ सप्तमीमाह,—"अपकामꣳ स्यन्दमानाः अवीवरत वो हिकम्। इन्द्रे वः अग्निभिर्देवीः तस्मादार्-नाम वो हितम्[७]"—इति। देवीः' हे आपो देव्यः, 'अपकामं स्यन्दमानाः' प्रयोजनविशेषमनपेक्ष्य स्वभावत एव प्रवहन्तीः 'वः' युष्मान् 'इन्द्रः' परितोषात् 'अवीवरत' वृतवान्। स्यन्देनेऽपि युष्माकं न साधनान्तरापेक्षा किन्तु 'वः अग्निभिः' युष्मदीयाग्निवशादेव स्यन्दनम्। 'हिकम्' इत्यव्ययं प्रसिद्धिद्योतकम्, उदकस्य स्वभावत्येव स्यन्दनं सर्वलोकप्रसिद्धमित्यर्थः। यस्मादिन्द्रेण वृताः 'तस्मात्' युष्माकं 'वार्' इत्येतत् 'नाम' 'हितं' सत्यकम्।

अथाष्टमीमाहः—"एको देवो अप्यतिष्ठत् स्यन्दमाना यथावशम्। उदानिषुर्महीरिति तस्मादुदकमुच्यते[८]"—इति। 'यथावशं' स्वेच्छयैव 'स्यन्दमानाः' अपः 'एको देवः' इन्द्रः 'अपि'-'अतिष्ठत्' अध्यतिष्ठत् स्वाधीनाः कृतवान्। इन्द्रेणाधिष्ठितास्ता आपः 'महीः' महत्यः प्रभूताः सत्यः 'उदानिषुः' उत्कर्षेण चेष्टितवत्यः। 'तस्मात्' 'उदकम्' इति नाम 'उच्यते'।

अथ नवमीमाह,—"आपो भद्राः घृतम् इत् आपः आसुः अग्नीषोमौ बिभ्रति आपः इत् ताः। तीव्रो रसो मधुपृचाम् अरङ्गम आ मा प्राणेन सह वर्चसा गन्[९]" इति। एताः 'आपः' 'भद्राः' कल्याणरूपाः। 'आपः' 'इत्' आप एव 'घृतम्' 'आसुः' गोशरीर-द्वारा घृतरूपेण परिणताः। 'ताः' 'आपः इत्' तादृश्यः आपः एव 'अग्नीषोमौ' देवौ 'बिभ्रति' धारयन्ति। "अग्निं या गर्भम्" इत्यग्निधारणं पूर्वमेवोक्तम् (५।६।२।२)। सोमधारणमपि अन्नत-धारणद्वारा द्रष्टव्यम्। 'मधुपृचां' माधुर्ययुक्तानाम् अपां 'रसः'

सारांशः 'तीव्रः' अत्यन्तस्वादुः। 'अरङ्गमः' अलं संपूर्णं यथा भवति तथा गच्छति प्राप्नोति सर्वजनपुष्टिकारीत्यर्थः। तादृशो रसः 'प्राणेन' श्वासवायुना 'वर्चसा' बलेन 'सह' 'मा' मां प्रति 'आ'-'अगन्' आगच्छतु। यावत् अपां रसः अन्नादिरूपेण शरीरे तिष्ठति। तावत् प्राणो न अतिगच्छति। बलञ्च न विनश्यति।

अथ दशमीमाह,—"आत् दृत् पश्यामि उत वा शृणोमि आ मा घोषो गच्छति वाक् नः आसाम्। मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णाः अह्वपं यदा वः(१०)" इति। 'आत् दृत्' अनन्तरमेव 'पश्यामि'; अपां रसे मच्छरीरमागते सति तदानीमेव चक्षुषा द्रष्टुं अलोऽस्मि। 'उत वा शृणोमि' अपि च श्रोतुमपि अलोऽस्मि। 'आसाम्' अपां 'घोषः' नादः 'आ'-'गच्छति' मच्छरीरे वर्तते। स एव घोषः 'नः' अस्माकं 'वाक्'। हे 'हिरण्यवर्णाः' तेजस्विन्यः आपः, यदा 'वः' युष्माकं सेवया 'अह्वपम्' अहं ह्वलोऽभवम्। 'तर्हि' तस्मिन् काले 'अमृतस्य' 'भेजानः' 'मन्ये' पीयूषं सेवितवानस्मीति तर्कये।

अथैकादशीमाह,—"आपो हि ष्ठा मयोभुवः ता नः ऊर्जे दधातन। महे रणाय चक्षसे(११)" इति। 'हि'-शब्दः एवकारार्थः प्रसिद्ध्यर्थो वा। 'आपः' यूयमेव 'मयोभुवः' 'स्थ' सुखयित्र्यो भवत, स्नानपानादि-हेतुत्वेन सुखोत्पादकत्वं प्रसिद्धम्। 'ताः' तादृश्यो यूयं 'नः' अस्मान् 'ऊर्जे' रसाय भवदीयरसानुभवार्थं 'दधातन' स्थापयत। किं च 'महे' महते 'रणाय' रमणीयाय 'चक्षसे' दर्शनाय 'दधातन' अस्मान् परतत्त्वसाक्षात्कारयोग्यान् कुरुत इत्यर्थः।

अथ द्वादशीमाह,—"यो वः शिवतमो रसः तस्य भाजयतेह नः उशतीः इव मातरः(१२)" इति। 'वः' युष्माकं 'शिवतमः' आप्ततमः सुखैकहेतुः 'यः' 'रसः' अस्ति, 'इह' अस्मिन् कर्मणि 'नः' अस्मान् 'तस्य भाजयत' तं रसं प्रापयत। तत्र दृष्टान्तः,—'उशतीः इव मातरः' कामयमानाः प्रीतियुक्ताः मातरो यथा स्वकीयमन्नरसं शिशुं प्रापयन्ति तद्वत्।

अथ त्रयोदशीमाह,—"तस्मै अरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः(१३)" इति। 'यस्य' रसस्य 'क्षयाय' क्षयेण निवासेन 'जिन्वथ' यूयं प्रीता भवथ, 'तस्मै' रसाय 'वः' युष्मान् 'अरं' 'गमाम' अलं भृशं प्राप्नुम। किञ्च हे 'आपः', यूयं 'नः' अस्मान् 'जनयथ' प्रजोत्पादकान् कुरुत।

कण्वः,—'दिवि अयस्व' इति वार्हस्पत्यं नैवारं पयसि चरुं मध्ये तुम्बेष्टकामासुपदधाति'—इति। पाठस्तु,—"दिवि अयस्व अन्तरिक्षे यतस्व पृथिव्या सम् भव ब्रह्मवर्चसमसि ब्रह्मवर्चसाय त्वा(१४)" इति। हे नैवार-चरो, 'दिवि अयस्व' द्युलोके आस्थितो भव। 'अन्तरिक्षे' अपि 'यतस्व' प्रयत्नवान् भव। 'पृथिव्या सम् भव' संयुक्तो भव। 'ब्रह्मवर्चसम् असि' तत्साधनत्वात् तद्रूपमसि*। अतो 'ब्रह्मवर्चसाय' त्वाम् अथ उपदधामि॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके प्रथमोऽनुवाकः॥१॥

---

* एवमेव सर्वत्र पाठः। 'तद्रूपोऽसि' इति पाठो मन्तुं युक्तः।

अपां ग्रहान् गृह्णात्येतद्वाव राजसूयं यद्वै ते ग्रहाः सवोऽग्निर्वरुणसवो राजसूयमग्निसवश्चित्यस्ताभ्यामेव सूयतेऽथो उभावेव लोकावभि जयति यश्च राजसूयेनेजानस्य यश्चाग्निचितः[१] आपो भवन्त्यापो वा अग्नेर्भ्रातृव्या यदपोऽग्नेरधस्तादुपदधाति भ्रातृव्याभिभूत्यै भवत्यात्मना परास्य भ्रातृव्यो भवत्यमृतम्॥ १॥

वा आपस्तस्मादद्भिरवतान्तमभि षिञ्चन्ति[२] नार्तिमार्च्छति सर्वमायुरेति यस्यैता उपधीयन्ते य उ चैना एवं वेद[३] अन्नं वा आपः पशव आपोऽन्नं पशवोऽन्नादः पशुमान् भवति यस्यैता उपधीयन्ते य उ चैना एवं वेद[४] द्वादश भवन्ति द्वादश मासाः संवत्सरः संवत्सरेणैवास्मै॥ २॥

अन्नमव रुन्धे[५] पाचानि भवन्ति पाचे वा अन्नमद्यते सयोन्येवान्नमव रुन्ध आ द्वादशात् पुरुषादन्नमत्त्यथो पाचान्न च्छिद्यते यस्यैता उपधीयन्ते य उ चैना एवं वेद[६] कुम्भाश्च कुम्भीश्च मिथुनानि भवन्ति मिथुनस्य प्रजात्यै प्र प्रजया पशुभिर्मिथुनैर्जायते यस्यैता उपधीयन्ते य उ॥ ३॥

[illegible] एवं वेद[७] सुप्त्वा अग्निः सोऽध्वर्युं यजमानं प्रजाः प्रचार्पयति यदप उपदधाति प्रचमेवास्य शमयति नार्तिमार्च्छत्यध्वर्युं न यजमानः शाम्यन्ति प्रजा यद्वेता उपधीयन्ते[८] ऽपां वा एतानि हृदयानि यद्वेता आपो यद्वेता अप उपदधाति दिव्याभिरेवैनाः सꣳसृजति वर्षुकः पर्जन्यः ॥ ४ ॥

भवति[९] यो वा एतासामायतनं कृतिं वेदायतनवान् भवति कल्पतेऽस्मा अनुसीतमुप दधात्येतद्वा आसामायतनमेषा कृतिः[१०] य एवं वेदायतनवान् भवति कल्पतेऽस्मै[११] हुन्दमन्या उपदधाति चतसृणो मध्ये धृत्या[१२] अन्नं वा इष्टका एतत् खलु वै साक्षादन्नं यदेष चरुर्यदेनं चरुमुपदधाति साक्षात् ॥ ५ ॥

एवास्मा अन्नमव रुन्धे[१३] मध्यत उप दधाति मध्यत एवास्मा अन्नं दधाति तस्मान्मध्यतोऽन्नमद्यते[१४] बार्हस्पत्यो भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मा अन्नमव रुन्धे ब्रह्मवर्चसमसि ब्रह्मवर्चसायेत्याह तेजस्वी ब्रह्मवर्चसी भवति यस्यैष उपधीयते, य उ चैनमेवं वेद[१५] ॥ ६ ॥

अन्नतम्। अस्मै। जायते यस्यैता उपधीयन्ते य उ। पर्जन्यः। उपदधाति साक्षात्। सप्तचत्वारिꣳशच ॥ २ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रश्नेऽष्टके द्वितीयोऽनुवाकः ॥ ० ॥

कुम्भेष्टकमन्त्रणार्था मन्त्राः प्रथम ईरिताः ।

अथ द्वितीये तदिष्टकोपधानं विधत्ते ।

यदुक्तं सूत्रकारेण,—'कुम्भं कुम्भीं चाद्भिः पूरयित्वा ग्रभं च स्थ वर्म च स्थ देवः स्थ वः सवितुः प्रसवे मधुमतीः षादयामीति पुरस्तादनुमीतमुपधाय ज्योतिषे वामिति हिरण्यशकौ प्रत्यस्येत्येवमुत्तरा उत्तरैर्मन्त्रैः प्रतिदिग्मनुमीतं चतस्रो मध्ये' इति ।

तदिदमुपधानं विधत्ते,—"अपां ग्रहान् ग्रह्णाति एतद्वाव राजसूयं यदेते ग्रहाः सवः अग्निः वरुणसवो राजसूयम् अग्निसवः चित्यः ताभ्यामेव सूयते अथो उभौ एव लोकौ अभि जयति यस्य राजसूयेन ईजानस्य यस्य अग्निचितः[१]"—इति । ग्रह्णन्ति आपः एषु इति ग्रहाः जलाधाराः कुम्भाः कुम्भाश्च । ते च अद्भिः पूरितत्वात् 'अपां' ग्रहाः। तान् कुम्भकुम्भीरूपान् 'ग्रह्णाति'। ग्रहणेनोपधानमुपलक्ष्यते, 'यस्यैता उपधीयन्ते' इत्युपसंहारात् । राजसूये ग्रहसद्भावात् तत्साम्यमापादयितुम् इह ग्रहि-धातुना व्यवहारः । ये 'एते' 'कुम्भकुम्भीरूपाः' अपां 'ग्रहाः', 'एतत्' एव राजसूयस्वरूपं, फलेन तत्सदृशत्वात् । योऽयं चीयमानः 'अग्निः', सोऽयं 'सवः',—सूयते अभिषिच्यते यजमानः अत्र इत्यभिषेकयुक्तो यज्ञः सवः, तत्सदृशोऽयम् अग्निः । यदेतत् राजसूयाख्यं कर्म, सोऽयं 'वरुणसवः'। वरुणो हि कदाचित् राजसूयं कृत्वा तत्राभिषिक्तः । यस्तु 'चित्यः', सोऽयम्

'अग्निसवः'। अग्निष्वपि अग्नौ अभिषेको विद्यते। अतः कुम्भीष्टकोपधाने सति 'ताभ्यां' वरुणसवाग्निसवाभ्यां उभाभ्यां 'सुवते' अर्थं यजमानः अनुष्ठितवान् भवति। अपि च 'राजसूयेन' इष्टवतो 'यः' लोकः, 'अग्निचितः' 'च' 'यः' लोकः, तौ 'उभौ' 'लोकौ' एतदिष्टकोपधानेन 'अभि'-'जयति' 'एव'।

कुम्भेषु कुम्भीषु च जले स्थापनं* विधत्ते,—"आपो भवन्ति आपो वै अग्नेर्भ्रातव्याः यद् अपः अग्नेः अधस्तात् उपदधाति भ्रातव्याभिभूत्यै भवति आत्मना परा अस्य भ्रातव्यो भवति अमृतं वै आपः तस्मात् अद्भिः अवतान्तम् अभि षिञ्चन्ति(९)" इति। जलेन अग्निग्लानेः अपाम् अग्निग्लानुत्वम्। अतस्थीयमानस्य 'अग्नेः' 'अधस्तात्' भूमौ कुम्भकुम्भीगतानाम् अपाम् उपधाने सति भ्रातव्याभिभूतिर्भवति। उपधाता स्वयम् ऐश्वर्यवान् 'भवति'। 'भ्रातव्यः' 'परा'-'भवति'। किञ्च एताः 'आपः' 'अमृतम्' एव, अत्र तस्योदकजन्यत्वात्। यस्मात् अमृतं, 'तस्मात्' 'अवतान्तम्' अत्यन्तग्लानिमापन्नं मूर्च्छितं मूर्च्छानिवारणाय शीतलाभिः 'अद्भिः' 'अभि'-'षिञ्चति'।

एतदुपधानं तद्देहस्य प्रशंसति,—"न आर्तिम् आर्च्छति सर्वम् आयुः एति यस्य एताः उपधीयन्ते यः उ च एनाः एवं वेद(१०)" इति।

प्रकारान्तरेण अपः प्रशंसति,—"अन्नं वै आपः पशवः आपः अन्नं पशवः अन्नादः पशुमान् भवति यस्यैता उपधीयन्ते यः उ च एनाः एवं वेद(११)" इति। अन्नस्य उदकजन्यत्वात्, पशूनां च उदकपोष्यत्वात्

---

* इदमेव सर्वत्र पाठः। 'जलस्थापनं' 'जलोपधानं' इति वा पाठो भवितुं युक्तः।

अन्न-रूपत्वञ्च। क्षीराज्यहेतुत्वात् पशूनामपि अन्नत्वम्। अतः उपधाता वेदिता च अन्नवान् 'पशुमान्' च 'भवति'।

अग्नेयाचाणां संख्यां विधत्ते,—"द्वादश भवन्ति द्वादश मासाः संवत्सरः संवत्सरेणैव अग्नेः अन्नम् अव रुन्धे[५]" इति।

उपधेयानाम् अपाम् आधारान् विधत्ते,—"पाचानि भवन्ति पाचे वै अन्नम् अद्यते सयोनि एव अन्नम् अव रुन्धे आ द्वादशात् पुरुषात् अन्नम् अत्ति अथो पाचात् न च्छिद्यते यश्चैता उपधीयन्ते यः उ च एनाः एवं वेद[६]" इति। 'पाचानि' कुम्भकुम्भीरूपाणि। 'पाचे' कांस्यादिमये, अग्नेः 'अन्नं' भक्ष्यते पच्यते च। अतः पाचस्य अन्नयोनित्वात् तत्सहितमेव 'अन्नं' प्राप्नोति। किञ्च उपधाता वेदिता च पाचसंख्यया स्वात्मपुत्रपौत्रादेर्द्वादशपुरुष-पर्यन्तात् अन्नसम्पन्नो भवति। अपि च 'पाचात्' मृद्रोपकरणसङ्घातात् कदाचिदपि 'न' विच्छिद्यते।

पाचाणां परिमाणविशेषं विधत्ते,—"कुम्भाश्च कुम्भ्यश्च मिथुनानि भवन्ति मिथुनस्य प्रजात्यै प्र प्रजया पशुभिः मिथुनैर्जायते यश्चैता उपधीयन्ते य उ च एना एवं वेद[७]" इति। 'कुम्भाः' पुरुषसदृशाः प्रौढा घटाः। 'कुम्भ्यः' योषित्समाना अल्पाः। अतो मिथुनसम्पत्त्या प्रजोत्पादनाय 'भवन्ति'। उपधातृवेदितारौ मिथुन-रूपाः प्रजाः उत्पादयतः।

प्रकारान्तरेण तदुपधानं प्रशंसति,—"घृक् वै अग्निः यः अश्वमेधं यजमानं प्रजाः घृचा अर्पयति यत् अपः उपदधाति घृचमेव अस्य शमयति न आर्तिम् आर्च्छति अश्वमेधेन यजमानः भवन्ति प्रजाः वय

इताः उपधीयन्ते[८]" इति। अयम् 'अग्निः' 'मुक् वै' सन्ताप-हेतुरेव। अतः 'यः' अग्निः अध्वर्युप्रभृतीन् सन्तापेन योजयति। अनेनोपधानेन अग्नेः सन्तापहेतुत्वं 'प्रमथयति'। अस्मिन् कर्मणि 'एताः' इष्टकाः 'उपधीयन्ते', 'न' तत्र 'अध्वर्युः' 'म्रियते' नापि 'यजमानः'। 'प्रजाः' च सर्वबाधोपशमयुक्ताः भवन्ति।

पुनः प्रकारान्तरेण प्रशंसति,—"अपां वै एतानि हृदयानि यदेता आपः यदेता अपः उपदधाति दिव्याभिः एव एनाः सृजति वर्षुकः पर्जन्यो भवति[९]" इति। 'एताः' पाचगताः याः 'आपः', 'एतानि' देवतानां हृदयस्थानानि। अत एव आसाम् उपधानेष्टकारूपोपेताः 'अपः' 'दिव्याभिः' अग्निः संयोजयति। ततः 'पर्जन्यः' वर्षणशीलो 'भवति'।

अथ उपधानस्थानं विधत्ते,—"यो वै एतासाम् आयतनं क्रुञ्चिं वेद आयतनवान् भवति कल्पते अस्मै अनुसीतम् उप दधाति एतत् आसाम् आयतनम् एषा क्रुञ्चिः[१०]" इति। आयतनं स्थानम्। क्रुञ्चिः सामर्थ्यम्। तदुभयं यो 'वेद', स प्रौढत्वाद्यायतनवान् 'भवति'। एतदर्थं च सर्वभोग्यजातं सम्पन्नं भवति। अतः अग्निः 'अनुसीतम्' उपदधात्, एकैकस्यां दिशि याः सप्तसप्ततयः ताः अनुसृत्य उपदधात्। एतत्सीतासमीपमेव एतासां कुम्भेष्टकानां स्थानम्, तथावस्थितिरेव एतासां सामर्थ्यसूचकम्।

वेदनफलमुपसंहरति,—"यः एवं वेद आयतनवान् भवति कल्पते अस्मै[११]" इति।

उपधाने प्रकारविशेषं विधत्ते,—"इन्द्रमन्याः उपदधाति यतस्रो

मध्ये धृत्यै[११]" इति। पूर्वदिग्वर्तिनीषु तिसृषु वीतासु कुम्भं कुम्भीं चेति द्वन्द्वम्। एवं दिगन्तरेष्वपि। तदिदमुच्यते,-'द्वन्द्वम् अन्याः' इति। द्वादशानां मध्ये दिक्चतुष्टये अष्टौ गताः, अवशिष्टाः 'चतस्रः' 'मध्ये' स्थापयेत्। तच्च 'धृत्यै' दार्ढ्याय भवति।

अथ "दिवि अयस्व" (५।६।१।४) इति मन्त्रखण्डं चरूपधानं विधत्ते,—"अन्नं वै इष्टका एतत् खलु वै साक्षात् अन्नं यत् एषः चरुः यत् एतं चरुम् उपदधाति साक्षादेव अस्मै अन्नम् अव रुन्धे[१२]" इति। 'इष्टका' अन्नहेतुत्वात् 'अन्नम्'। 'चरुः' 'साक्षात्' एव 'अन्नम्'। अतः चरूपधानेन व्यवधानं विनैव मुख्यम् 'अन्नं' प्राप्नोति।

उपधानस्थानं विधत्ते,—"मध्यतः उप दधाति मध्यतः एव अस्मै अन्नं दधाति तस्मात् मध्यतः अन्नम् अद्यते[१४]" इति। इष्टकानां मध्ये चरुस्थापनं यत् यजमानस्य मध्ये उदरे 'अन्नं' स्थापितं भवति। मध्यमे वयसि भूयिष्ठम् 'अन्नम्' 'अद्यते'।

चरोर्देवतां विधत्ते,—"बार्हस्पत्यो भवति ब्रह्म वै देवानां इष्टस्पतिः ब्रह्मणा एव अस्मै अन्नम् अव रुन्धे[१५]" इति। 'ब्रह्मणा एव' ब्राह्मणजात्या एव, याजनादिना न तु सेवादिना इत्यर्थः।

मन्त्रे ब्रह्मवर्चसशब्दस्य तात्पर्यं दर्शयति,—"ब्रह्मवर्चसमसि ब्रह्मवर्चसाय त्वा इति आह तेजस्वी ब्रह्मवर्चसी भवति यस्यैष उपधीयते यः उ च एनम् एवं वेद[१६]" इति। तेजः कान्तिः। ब्रह्मवर्चसम् अध्ययनादिसम्पत्तिः।

अथ मीमांसा।

द्वितीयाध्यायस्य तृतीयपादे (७अ०) चिन्तितम्।

वरुर्भवति नेवारः उपधत्ते वरुन्धति ।
यागः स्यादुपधानं वा ? यागः शेषोक्तदेवतः ॥
यागस्यानिश्चये शेषो नापेक्ष्योऽतो यजिः कृतः ।
किं त्वुपधानमात्रं यावदुक्तं वरोः स्थितम् ॥

अत्रौ श्रूयते,—"नैवारवरुर्भवति" "वरुमुपदधाति" इति च । तत्र नीवारवरुद्रव्यको यागो विधीयते । न चात्र देवताया अभावः । "दृश्यतेर्वा एतदग्नं यन्नीवाराः" इति वाक्यशेषेण देवतासिद्धेः । उपधानं तु यागोपयुक्तस्य प्रतिपत्तिः स्विष्टकृतिवदिति प्राप्ते ब्रूमः,—यागविधौ निश्चिते सति पश्चाद्देवतायामपेक्षितायां वाक्यशेषबलात् देवताकृप्तिः ; इह तु देवताकल्पनेन यागविधिर्न निश्चयः इत्यन्योन्याश्रयः । तस्मादिहोपधानमात्रं विधीयते ॥

इति मायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके द्वितीयोऽनुवाकः ॥०॥

भूतेष्टका उप दधात्यचाच् वै मृत्युर्जायते यच्च यच्चैव मृत्युर्जायते तत एवैनमव यजते तस्मादग्निचित् सर्वमायुरेति सर्वे ह्यस्य मृत्यवो वेष्टास्तस्मादग्निचिन्नाभिचरितवै प्रत्यगेनमभिचारः स्तृणते सयते वा एष योऽग्निञ्चिनुते देवसुवामेतानि हुवोऽपि भवन्त्येतावन्तो वै देवानाꣳ सवास्त एव ॥ १ ॥

अस्म॑ सुवान् प्र यच्छन्ति त एनं॑ सुवन्ते[१] सुवोऽग्नि॑र्वरुणसुवो राजसूय॑ ब्रह्मसवश्चित्यो॑[२] देवस्य त्वा सवितुः प्रसव इत्याह सवितृप्रसूत एवैन॑ ब्रह्मणा देवताभिरभि षिञ्चत्य[३]-न्नस्यान्नस्याभि षिञ्चत्यन्नस्यान्नस्यावरुध्यै[४] पुरस्तात् प्रत्यञ्चमभि षिञ्चति पुरस्ताद्धि प्रतीचीनमन्न॑मद्यते शीर्षतोऽभि षिञ्चति शीर्षतो ह्यन्नमद्यत[५]-आ मुखादुन्नवस्रावयति ॥ २ ॥

मुखत एवास्मा अन्नाद्यं दधात्य[६]-ग्नेस्त्वा साम्राज्येनाभि षिञ्चामीत्याहैष वा अग्नेः सवस्तेनैवैनमभि षिञ्चति बृहस्पतेस्त्वा साम्राज्येनाभि षिञ्चामीत्याहु ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवैनमभि षिञ्चतीन्द्रस्य त्वा साम्राज्येनाभि षिञ्चामीत्याहेन्द्रियमेवास्मिन्नुपरिष्टाद्दधात्ये[७]-तत् ॥ ३ ॥

वै राजसूयस्य रूपं य एवं विद्वानग्निं चिनुत उभावेव लोकावभि जयति यश्च राजसूयेनेजानस्य यश्चाग्नि॑चित[८]-इन्द्रस्य सुवुवाणस्य दशधेन्द्रियं वीर्यं॑ पराऽपतन्नदेवाः सौचामण्या समभरन्त्सूयते वा एष योऽग्निं चिनुतेऽग्निं चित्वा सौचामण्या यजेतेन्द्रियमेव वीर्यं॑ स्वभृत्यात्मन्धत्ते[९] ॥ ४ ॥

त एव। अन्ववसावयति। एतत्। अष्टाचत्वारिंश-
त्रयं ॥ ३ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके
तृतीयोऽनुवाकः ॥ ० ॥

कुम्भेष्टकास्वरुक्षेति द्वितीये दृश्यमीरितम्।

अथ तृतीये भूतेष्टकादिकमुच्यते*। यदुक्तं सूचकारेण,—'प्रसवाय त्वा उपयामाय त्वा काटाय त्वा अर्णवाय त्वा धर्णसाय त्वा द्रविणाय त्वा सिन्धवे त्वा समुद्राय त्वा सरखते त्वा विश्वव्यचसे त्वा सुभूताय त्वा अन्तरिक्षाय त्वेति द्वादश भूतेष्टकाः' इति। एते मन्त्राः शाखान्तरगताः।

तत्साध्यमुपधानं विधत्ते,—"भूतेष्टका उप दधाति अथाच वै मृत्यु-र्जायते यतश्चैव मृत्युर्जायते तत एव एनम् अव यजते तस्मात् अग्नि-चित् सर्वम् आयुः एति सर्वं हि अस्य मृत्यवः अवेष्टाः तस्माद् अग्नि-चित् न अभिचरितवै प्रत्यक् एनम् अभिचारः हृणुते(१)" इति। देश-काल-निमित्तविशेषान् अपेक्ष्य 'अथाच' इति वीप्सा। सर्प-व्याघ्रचोराकुलाः देशाः मृत्युहेतवः। मध्यामध्यराचादिः यक्ष-राक्षसादिप्रयुक्तमृत्युकालः। दुराहारभोजनादीनि मृत्युनिमित्तानि। भूतेष्टकोपधानेन 'तत एव' देशप्रयुक्तात् कालप्रयुक्तात् निमित्त-

---

* "भूतेष्टकादिकं सर्वमुच्यते" इति का० श्रौ० सू० पाठः।

प्रयुङ्क्ते सर्वस्मादपि मृत्योः 'एनं' यजमानम् अवनयति। 'तस्मात्' अयम् 'अग्निचित्' स्वस्य प्राणम् 'आयुः' 'सर्वम्' एव प्राणीति। यस्माद् 'अस्य' 'सर्वे' अपि अपमृत्यवो विनाशिताः, किञ्च अयम् अग्निचित् अभिचारविषयोऽपि न भवति, एवं सति यो मूर्खः अभिचरति, 'एनं' मूर्खं सः 'अभिचारः' प्रत्यक्षमुखो भूत्वा हिनस्ति।

यदुक्तं सूचकारेण,—'अग्नीषोमीयस्य पशुपुरोडाशमष्टौ देवसुवां हवींष्यनुनिर्वपति समानं खिष्टकृदिडम्' इति।

तदिदं विधत्ते,—"सूयते वै एष यः अग्निं चिनुते देवसुवाम् एतानि हवीꣳषि भवन्ति एतावन्तो वै देवानाꣳ सवाः ते एव अस्मै सवान् प्र यच्छन्ति ते एनꣳ सुवन्ते[१]" इति। 'यः' यजमानः 'अग्निं' 'चिनुते,' सः 'एषः' देवैः 'सूयते' प्रेर्यते। अतः प्रेरणाय हवींषि निर्वपेत्। "अग्नये गृहपतये पुरोडाशम्"—इत्यादिराजसूयाधानानि 'देवसुवां' 'हवींषि', तत्र श्रुताः ये अग्न्यादयो देवाः 'एतावन्तः' एव 'देवानां' मध्ये प्रेरकाः। 'ते' 'एव' देवाः 'अस्मै' यजमानाय स्वकीयाः सर्वाः अनुज्ञाः प्रयच्छन्ति। तेन च अनुज्ञाप्रदानेन 'एनं' यजमानं प्रेरयन्ति।

यदुक्तं सूचकारेण,—'दक्षिणं प्रत्यपि पञ्चौदुम्बरीमासन्दीं प्रतिष्ठाप्य तस्यां कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमास्तीर्य तस्मिन्नासीनं यजमानम् अग्निम् अन्वारब्धं सम्पातैरभिषिञ्चति' इति।

तदिदं विधातुं प्रस्तौति,—"सवः अग्निः वरुणसवः राजसूयं ब्रह्मसवः चित्यः[२]" इति। अभिषेकयुक्तो यागः सवः इति हि उक्तम्। स च द्विविधः, वरुणसवः ब्रह्मसवश्च। राजकर्तृत्वात् राजसूयं वरुण-

क्षः, यदक्षो हि राजाभिमानी देवः। क्षित्रग्निः ब्राह्मणैरप्रसुवेत्यात् ब्रह्मसवः, अग्निः ब्राह्मणाभिमानी देवः। अतः क्षत्रात् अग्नम् अभिषेकाद्योग्यः दूरार्थः।

मन्त्रपूर्वकमभिषेकं विधत्ते,—"देवस्य त्वा सवितुः प्रसव इति आह सवितृप्रसूतः एव एनं ब्रह्मणा देवताभिः अभि षिञ्चति[७]" इति। 'ब्रह्मणा' मन्त्रेण, प्रतिपाद्याभिरिति शेषः।

सर्वौषधीरसम् अभिषेकद्रव्यत्वेन विधत्ते,—"अन्नस्यान्नस्य अभि षिञ्चति अन्नस्यान्नस्य अवरुद्ध्यै[८]" इति।

प्रकारविशेषं विधत्ते,—"पुरस्तात् प्रत्यञ्चम् अभि षिञ्चति पुरस्तात् हि प्रतीचीनम् अन्नम् अद्यते ग्रीवतः अभि षिञ्चति ग्रीवतः हि अन्नम् अद्यते[९]" इति।

पूर्वस्यां दिशि पश्चिमाभिमुखः अवस्थाय 'प्रत्यञ्चं' स्वाभिमुखं यजमानम् अभिषिञ्चेत्। लोके 'हि' 'पुरस्तात्' पात्रे अवस्थितम् 'अन्नं' स्वाभिमुखत्वेन 'अद्यते'*।

शिर आरभ्य अभिषिञ्चेत्। 'अन्नम्' अपि शिरोदेशावस्थिते मुखे भुज्यते†।

मुखान्तरं विधत्ते,—"आ मुखात् अन्ववस्रावयति मुखतः एव

---

* एवमेव का० श्री० पु० पाठः। आदर्शपुस्तके ६ ख पङ्क्तिस्थ—'प्रतिपाद्याभिः' इत्यनन्तरमेव 'पूर्वस्यां दिशि' इत्यादिरयं सन्दर्भो दृश्यते, प्रकारविशेषप्रदर्शनात् पूर्वं तच्छ्रवणं न युक्तमिति नायं साधुपाठः।

† का० श्री० मुखान्ते अयं सन्दर्भो नास्ति।

अग्नौ अग्न्याधं दधाति[७]" इति। शिर आरभ्य आनुलोम्येन मुख-पर्यन्तमेव स्रावयेत्, न अधः।

मन्त्रेषु अग्निबृहस्पतीन्द्रशब्दतात्पर्यं व्याचष्टे,—"अग्नेः त्वा साम्राज्येन अभि षिञ्चामि इति आह एषः वै अग्नेः सवः तेन एव एनम् अभि षिञ्चति बृहस्पतेः त्वा साम्राज्येन अभि षिञ्चामि इति आह ब्रह्म वै देवानां बृहस्पतिः ब्रह्मणा एव एनम् अभि षिञ्चति इन्द्रस्य त्वा साम्राज्येन अभि षिञ्चामि इति आह इन्द्रियम् एव अस्मिन् उपरिष्टात् दधाति[८]" इति। 'एषः' ओषधिरसः 'अग्नेः' 'सवः' अग्निना प्रेरितः। अतः अग्निशब्दम् उच्चारयन् अग्निसम्बन्धेन तेन-'तेन' 'एव' रसेन 'अभिषिञ्चति'। 'एष वै बृहस्पतेः सवः, एष वै इन्द्रस्य सवः'—इत्यपि अनुसन्धेयम्। एते अभिषेकमन्त्राः शाखान्तरे आम्नाताः। इह ब्राह्मणेन व्याख्याताः।

राजसूयसाम्येन अभिषेकं प्रशंसति,—"एतत् वै राजसूयस्य रूपं यः एवं विद्वान् अग्निं चिनुते उभौ एव लोकौ अभि जयति यश्च राजसूयेन ईजानस्य यश्च अग्निचितः[९]" इति। 'एतत्' अभिषेचनम् एव अग्नेः चित्यस्य 'राजसूयस्य' स्वरूपम्। एवंविदः चिन्वानस्य उभयफलं भवति।

अतः वचनाङ्गत्वेन सौत्रामणीं विधत्ते,—"इन्द्रस्य सुषुवाणस्य इन्द्रधा इन्द्रियं वीर्यं परा अपतत् तत् देवाः सौत्रामण्या समभरन् सुषते वै एषः यः अग्निं चिनुते अग्निं चित्वा सौत्रामण्या यजेत इन्द्रियम् एव वीर्यं संभृत्य आत्मन् धत्ते[१०]" इति। सोमम् अभिषुतवतः 'इन्द्रस्य' 'इन्द्रियं' सोमोपद्रवपापेन 'इन्द्रधा' भूत्वा

पतितम् अभूत्। 'तत्' एतत् इन्द्रियं 'देवाः' 'सौचामण्या' "स्वादी त्वा" इत्यादिमन्त्रप्रतिपाद्येन यागेन सम्यक् सम्पादितवन्तः। एवं सति अयमपि 'यः' 'अग्निं' 'चिनुते', 'एषः' अपि सोमाभिषवे प्रेर्यते। तस्मात् अयम् अपि इन्द्रियसामर्थ्यसम्पादनाय सौचामण्याख्यं यागम् अनुतिष्ठेत्। सौचामण्याः श्वयनाङ्गत्वं न बोध्यते, किन्तु कालविधिरयम्*; तस्मादिदं वाक्यं प्रकरणात् उत्कर्षव्यम्†॥

अथ मीमांसा।

चतुर्थाध्यायस्य तृतीयपादे (१९अ०) चिन्तितम्,—

अग्निं चित्वा यजेत् सौचामण्यङ्गेष्टिरुतेदृशी।
अङ्गिकाले स्वकाले वा स्याद् आद्यो ऽन्याङ्गवत् मतः॥
निर्वृत्ते श्वयनादौ तु कर्मान्तरविधानतः।
स्वकाले चोदकप्राप्ते तदनुष्ठानमाश्रितम्॥

"अग्निं चित्वा सौचामण्या यजेत", "वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत" इत्यत्र सौचामणीबृहस्पतिसवयोरङ्गत्वं पूर्वमुक्तम्। तच्चाङ्गम् अङ्गिकाले अग्निना सह प्रयोक्तव्यम्, इतरेषाम् अङ्गानां तथा प्रयुज्यमानत्वादिति चेत्। नैवं, त्वा-प्रत्ययेन पूर्वकालवाचिना साङ्गे श्वयनादौ निर्वृत्ते सति, पश्चात् कर्मान्तरत्वेन सौचामण्यादेर्विधितत्वात्, यदि अग्निना सह एकप्रयोगः स्यात्, तदा प्रत्ययप्राप्तः पूर्वोत्तरकालविभागो‡ बाध्येत! न हि अग्निना सह प्रयोक्तव्यानाम्

* "काले विधिरयम्" इति का० श्री० पु० पाठः।

† आदर्शपुस्तके 'उत्कृष्टम्' इति पाठः। उत्कृष्टव्यं,—इति का० श्री० पु० पाठः।

‡ "पूर्वोत्तरकालः" इति आदर्शपुस्तके पाठः।

उखासम्भरणादीनां चयने निर्वृत्ते पश्वादिधानं श्रुतम्। ततः दृष्टप्रयोगे अवश्यम्भाविनि सति स्वस्वोदकप्रापिते काले तदनुष्ठानं युक्तम्। सौत्रामण्याः दृष्टिप्रकृतिकत्वात् पर्वकालस्योदकप्राप्तेः। चयनेन सह प्रयोगे तु पर्वणि उखासम्भरणादिविधानात् अन्यस्मिन् दिने सौत्रामणी प्रसज्येत। तथा बृहस्पतिसवस्य ज्योतिष्टोमविकृतत्वात् स्वस्मात्कालस्योदकप्राप्तेः। वाजपेयेन सह प्रयोगैक्ये सति वाजपेयस्य विहितत्वात् बृहस्पतिसवोऽपि सति प्रसज्येत। तस्मात् अतिदिष्टे पर्वणि, वसन्ते तदनुष्ठानम्। ननु सर्वत्र अङ्गापूर्वैः प्रधानापूर्वं जनयितव्यम्। इह तु पूर्वकालीनेन साङ्गप्रधानानुष्ठानेन फलापूर्वस्य निष्पन्नत्वात् तदुत्तरकालीनम् अङ्गं निरर्थकमिति चेत्। न, तस्यैव अपूर्वस्य अनेन अङ्गेन प्राबल्यदर्शायाः कल्पनीयत्वात्। तस्मात् न अङ्गिनः काले अनुष्ठानम्। किन्तु स्वकाले इति स्थितम्।

पूर्वानुवाकोक्तकुम्भीष्टकाचरूपधानस्य प्राणभृद्भ्यः अपानभृद्भ्यश्च ऊर्ध्वभावित्वात् इदं ब्राह्मणम् अभिमन्त्रणमन्त्रसहितं "पशुर्वा एष यदग्निः" (५।२।१०) इत्यनुवाकान्ते द्रष्टव्यम्। भूतेष्टकोपधानं तु वाजसिन्योपधानादूर्ध्वं भवति। अभिषेकस्तु "अग्निर्वै देवानामभिषिक्तः" (५।४।८) इत्यस्मात् पूर्वं द्रष्टव्यः। सौत्रामणीब्राह्मणं तु तस्मात् ब्राह्मणात् ऊर्ध्वं द्रष्टव्यम्॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके तृतीयोऽनुवाकः॥ ० ॥

सजूरब्दोऽयावभिः सजूरुषा अरुणीभिः सजूः सूर्य्येणैतशेन सजोषावश्विना दꣳसोभिः सजूर्ग्निर्वैश्वानर इडाभिर्घृतेन स्वाहा[1] संवत्सरो वा अब्दो मासा अर्धावा उषा अरुणी सूर्य्य एतश इमे अश्विना संवत्सरोऽग्निर्वैश्वानरः पशव इडा पशवो घृतꣳ संवत्सरं पशवोऽनु प्र जायन्ते संवत्सरेणैवास्मै पशून् प्र जनयति[2] दर्भस्तम्बे जुहोति यत् ॥ १ ॥

वा अस्या अमृतं यद्दोर्यं तद्दर्भास्तस्मिन् जुहोति प्रैव जायतेऽन्नादो भवति यस्यैवं जुह्वत्येता वै देवता अग्नेः पुरस्ताद्भागास्ता एव प्रीणात्यथो चक्षुरेवाग्नेः पुरस्तात् प्रति दधात्य[3]-नन्धो भवति य एवं वेद-[4] पो वा इदमग्रे सलिलमासीत् स प्रजापतिः पुष्करपर्णे वातो भूतोऽलेलायत्सः ॥ २ ॥

प्रतिष्ठान्नाविन्दत् स एतदुपां कुलायमपश्यत् तस्मिन्नग्निमचिनुत तदियमभवत्ततो वै स प्रत्यतिष्ठद्[5] यां पुरस्तादुपादधात् तच्छिरोऽभवत्सा प्राची दिग्यां दक्षिणत उपादधात् स दक्षिणः पक्षोऽभवत्सा दक्षिणा दिग्यां पश्चादुपादधात् तत्पुच्छमभवत्सा प्रतीची दिग्यामुत्तरत उपादधात् ॥ ३ ॥

स उत्तरः पक्षोऽभवत्सोदीची दिग्यामुपरिष्टादुपा-

दधात्यूर्ध्वमभवत्सोर्ध्वा दिग्[१] ऊर्ध्वं वा अग्निः पञ्चेष्टकस्तस्माद् यदस्यां खनन्त्यभीष्टकान्तृन्दन्त्यभि शर्करा॑ः सर्वा वा ऊर्ध्वं वयोभ्यो नक्तं दृश्ये दीप्यते तस्मादिमां वयाꣳसि नक्तं नाध्यासते[२] य एवं विद्वानग्निं चिनुते प्रत्येव ॥ ४ ॥

तिष्ठत्यभि दिशो जयति[३] आग्नेयो वै ब्राह्मणस्तस्माद् ब्राह्मणाय सर्वासु दिक्ष्वधिकꣳ स्वामेव, तद्दिशमन्वेति[४] अपां वा अग्निः कुलायं तस्मादापोऽग्निꣳ हारुकाः स्वामेव तद्योनिं प्र विशन्ति[५] ॥ ५ ॥

यत्। अलेलायत्सः। उत्तरत उपादधात्। एव। द्वाविꣳशच ॥ ४ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके चतुर्थोऽनुवाकः ॥ ० ॥

भूतेष्टकाभिषेकादि तृतीये समुदीरितम्।

अथ चतुर्थे होमो विधीयते। यदुक्तं सूचकारेण,—'सजूरह्नो ऽश्वाभिरिति दर्भस्तम्बे पश्चाद्धुतीर्जुहोति' इति। तमिमं विधातुं मन्त्रान् उत्पादयति,—"सजूः अह्नः अश्वाभिः सजूः उषाः अरुणीभिः सजूः सूर्यः एतशेन सजोषौ अश्विना दꣳसोभिः सजूः अग्निः वैश्वानरः

इडाभिः हुतेन स्वाहा(६)" इति। 'अब्दः' संवत्सरः। अयावाः मासाः। स च संवत्सरः तैर्मासैः सह समानप्रीतिः। अत्र सर्वेषु मन्त्रेषु 'हुतेन स्वाहा' इत्यनुषज्यते। तस्मै मासयुक्ताय संवत्सराय 'हुतेन' इत्येव 'स्वाहा' जुहोमि। 'उषाः' या इयम् उषःकालदेवता, या इयम् 'अरुणीभिः' रक्तवर्णाभिः 'सजूः' समानप्रीतिः। ताम् उद्दिश्य 'हुतेन स्वाहा' जुहोमि। 'सूर्यः' देवः 'एतशेन' स्वकीयाश्वेन 'सजूः' समानप्रीतिः। तम् उद्दिश्य 'हुतेन स्वाहा' जुहोमि। 'अश्विना' यौ एतौ अश्विनौ, तौ 'दंसोभिः' दंसनैः व्याधिनिराकरणव्यापारैः 'सजोषौ' परस्परसमानप्रीतौ। तौ उद्दिश्य हुतेन जुहोमि। 'वैश्वानरः' सर्वमनुष्यप्रियः यः 'अग्निः,' सः 'इडाभिः' पशुभिः 'सजूः' समानप्रीतिः। तमुद्दिश्य हुतेन जुहोमि।

मन्त्रान् व्याचष्टे,—"संवत्सरो वै अब्दो मासाः अयावाः उषाः अरुणी सूर्यः एतशः द्यावे अश्विना संवत्सरः अग्निः वैश्वानरः पशवः इडा पशवः हुतम् संवत्सरं पशवः अनु प्र जायन्ते संवत्सरेण एव अस्मै पशून् प्र जनयति(७)" इति। मन्त्रगतस्य अब्दशब्दस्य 'संवत्सरः' एव अर्थः। अयावशब्देन 'मासाः' अभिधीयन्ते। उषःशब्दादयः सुबादेशाः प्रसिद्धाः। 'द्यावे' द्यावापृथिव्यौ अश्विशब्देन विवक्षिते। 'अग्निः वैश्वानरः' इत्यनेन 'संवत्सरः' विवक्षितः। इडा-शब्देन 'पशवः' विवक्षिताः। घृत-शब्देनापि तत्कारणत्वात् 'पशवः' एव विवक्षिताः। तात्पर्यार्थस्तु,—गर्भभूताः* 'पशवः' 'संवत्सरम्' अनुलक्ष्य 'प्र'-'जायन्ते'।

---

* आदर्शपुस्तके तु "तात्पर्यतस्तु गर्भिभूताः" इत्येवं पाठः।

अतः एतन्मन्त्रपाठेन 'अस्मै' यजमानाय संवत्सरकालेन 'पशून्' उत्पादयति।

अथ होमं विधत्ते,—"दर्भस्तम्बे जुहोति यत् वै अस्याः अमृतं यत् वीर्यं तत् दर्भाः तस्मिन् जुहोति प्र एव जायते अन्नादः भवति यस्य एवं जुह्वति एताः वै देवताः अग्नेः पुरस्तात् भागाः ताः एव प्रीणाति अथो चक्षुः एव अग्नेः पुरस्तात् प्रति दधाति[२]" इति। 'अस्याः' पृथिव्याः सम्बन्धि 'यत्' 'अमृतं' स्वादुद्रव्यं, 'यत्' च तत्सम्बन्धि 'वीर्यं' सामर्थ्यं, 'तत्' उभयमेव एते 'दर्भाः'। अतः 'तस्मिन्' अमृते वीर्ये दर्भरूपे हुतवान् भवति। तेन होमेन प्रजाः उत्पादयति 'एव'। 'यस्य' यजमानस्य कर्मणि 'एवं' 'जुह्वति', स यजमानो न केवलं प्रजोत्पादकः किन्तु 'अन्नादः' च 'भवति'। 'एताः' एव मन्त्रोक्ताः संवत्सरमासादयः सर्वाः 'देवताः' 'अग्नेः' अपि पूर्वभागिनः। अतः 'ताः' प्रीणयति 'एव'। किञ्च पूर्वकालीनेन होमेन 'अग्नेः' 'चक्षुः' 'एव' सम्पादयति। तदेव* दर्भस्तम्बहोमो देवता कालश्च प्रशस्तः।

अथ वेदनं प्रशंसति,—"अनन्धो भवति य एवं वेद[३]" इति।

अथ चितियोग्या भूमिः बहुधा स्तूयते, तत्र तावत् आदौ भूमिनिष्पत्तिप्रकारं दर्शयति,—"आपो वै इदम् अग्रे सलिलम् आसीत् सः प्रजापतिः पुष्करपर्णे वातः भूतः अलेलायत् सः प्रतिष्ठां न अविन्दत सः एतत् अपां कुलायम् अपश्यत् तस्मिन् अग्निम् अचिनुत तत् इयम् अभवत् ततो वै सः प्रति अतिष्ठत्[४]" इति। यत् 'इदं' जगत् इदानीं दृश्यते, तत्र सर्वम् उत्पत्तेः पूर्वम् 'आपः' एव 'आसीत्,' न तु देव-

* एवमेव सर्वत्र पाठः। 'तदेवं' इत्येवंरूपः कश्चन पाठो भवितुं युक्तः।

मनुष्यादिकम्*। तस्मिन् अप्सु पृथिव्यादिभूतान्तरमेलनं धारयितुं शक्तिमिति विशेष्यते। मृद्बुजलमेव आसीत् इत्यर्थः। इदानीं 'प्रजापतिः' स्वशरीरमवस्थापयितुं मूर्त्तस्य कस्यचित् आधारस्य अभावात् स्वयं वायुरूपः अभूत्। तदुदकमध्यवर्त्तिनि कस्मिंश्चित् पद्मपत्रे समाश्रितः। तस्य चलत्वात्, स्वयं च वायुरूपत्वात्, 'अलेलायत्' इतस्ततो डोलायमानः अभूत्। तादृशः कुत्रापि स्थिरां स्थितिं न अलभत। 'सः' पुनः आधारं पर्यालोचयन् 'अपां' मध्ये कुलाय-शैवालम् 'अपश्यत्'। 'तस्मिन्' शैवाले 'अग्निम्' इष्टकाभिः चितवान्। सोऽयम् इष्टकाचितः अग्निः 'इयं' दृश्यमाना भूमिः 'अभवत्'। 'ततः' ऊर्द्धं 'सः' प्रजापतिः तस्यां भूमौ प्रतिष्ठितः अभूत्।

अथनेन भूम्युत्पत्तिप्रकारं† प्रपञ्चयति,—"यां पुरस्तात् उपादधात् तत् शिरः अभवत् सा प्राची दिक् यां दक्षिणतः उपादधात् स दक्षिणः पक्षः अभवत् सा दक्षिणा दिक् यां पश्चात् उपादधात् तत् पुच्छम् अभवत् सा प्रतीची दिक् याम् उत्तरतः उपादधात् स उत्तरः पक्षः अभवत् सा उदीची दिक् याम् उपरिष्टात् उपादधात् तत् पृष्ठम् अभवत् सा ऊर्द्धा दिक्(१)" इति। स प्रजापतिः 'यां' प्रौढाम् इष्टकां स्वस्य पुरतः§ 'उपादधात्,' 'तत्' इष्टकारूपं चीय-मानस्य अग्नेः शिरस्थानम् 'अभवत्'। लोके तु भूम्येकदेशरूपा 'पूर्वा दिक्' संज्ञा। एवं दक्षिणादिदिङ्मन्त्रेषु योजयितव्यम्।

---

* एवमेव सर्व्वत्र पाठः। 'तासु अप्सु' इत्येवं पाठो भवितुं युक्तः।

† 'प्रकारान्तरं' इति का० श्री० पु० पाठः।

§ 'पुरस्तात्' इति का० श्री० पु० पाठः।

भूमेरग्न्यात्मकत्वं शास्त्रीयलौकिकदृष्टिभ्यां दृढीकरोति,—"इयं वै अग्निः पञ्चेष्टकः तस्मात् यत् अस्यां खनन्ति अभि इष्टकां ह्वन्ह्वन्ति अभि अर्कराः सर्वा वै इयं वयोभ्यः नक्तं दृश्ये दीयते तस्मात् इमां वयाꣳसि नक्तं न अधि आसते[७]" इति। या इयं भूमिः अग्निः, सा 'इयं' पञ्चभिः इष्टकाभिश्चितः 'अग्निः'। 'तस्मात्' अग्नित्वात् यदि अनभिज्ञाः प्राणिनः 'अस्यां' भूमौ क्वचित् 'खनन्ति', तदानीं ते मूर्खाः प्रजापतिना उपहिताम् 'इष्टकाम्' अभितो हिंसन्ति चूर्णीकुर्वन्ति। तथा या इयं अर्करा तेन उपहिता, ताम् अपि 'अभि' 'ह्वन्ह्वन्ति' सर्वतश्चूर्णयन्ति; तथाविधः प्रत्यवायः तेषां भवति इत्यर्थः,—सा इयं शास्त्रीयदृष्टिः। अथ लौकिकदृष्टिः उच्यते,—'वयोभ्यः' 'दृश्ये' पक्षिणां दृष्टौ भूमिः 'सर्वा' अपि रात्रौ अग्निवत् दीप्ता भवति। यस्मात् एवं, 'तस्मात्' रात्रौ पक्षिणः भूमिं 'न' आश्रयन्ति, किन्तु वृक्षाग्राणि आश्रयन्ति। तस्मात् शास्त्रीयलौकिकदृष्टिभ्याम् इयं भूमिः अग्निरेव।

एतत् वेदनं प्रशंसति,—"यः एवं विद्वान् अग्निं चिनुते प्रति एव तिष्ठति अभि द्विषः जयति[८]" इति।

अथ ब्राह्मणद्वारा सर्वदिग्व्यापेनायाः भूमेः अग्नित्वं द्रढयति,—"आग्नेयो वै ब्राह्मणः तस्मात् ब्राह्मणाय सर्वासु दिक्षु अर्धुकꣳ स्रामं एव एतं दिग्रम् अनु एति[९]" इति। अग्निब्राह्मणयोः प्रजापतिमुखजत्वसम्बन्धेन 'ब्राह्मणः' 'आग्नेयः'। यस्मात् अयम् अग्निसम्बन्धः 'तस्मात्' अग्निरूपभूम्यवयवरूपासु 'सर्वासु' अपि 'दिक्षु' ब्राह्मणस्य सद्भिर्जीवनं जीवनं भवति। स्वदेशे एव परदेशेषु अपि देवदत्तः ब्राह्मणभिन्नः

कुर्व्याते। अयं हि स्वकीयां 'दिशम्' 'अनु' गच्छति। तस्मात् पुमान् एतत्।

इदानीं लौकिकजलद्वारा पुनरपि अग्निं द्रढयति,-"अपां वै अग्निः कुलायं तस्मात् आपः अग्निꣳ हारुकाः स्वाम् एव तत् योनिं प्र विशन्ति[९]" इति। योऽयं भूमिरूपः 'अग्निः', सोऽयं नदी-कूपादिगतानाम् 'अपां' 'कुलायं' स्थानम्। भूमौ अवस्थितत्वात् योनिश्च अपां, भूमिरूपः अग्निरेव। यस्मात् अग्निकार्याः आपः, 'तस्मात्' मथतो यज्ञादिदाक्षिनः अग्नेः अपहरणाय मनुष्यैः वेचिताः* 'आपः' अग्निम् अपहरन्† स्वयमपि प्लुष्यन्ति। यस्मात् एव अग्निरूपां स्वयोनिं 'प्र'-'विशन्ति', तस्मात् अवगम्यते जलकारणाग्निरूपा इयं भूमिः इति। अत्रोक्तस्य होमस्य वेदिविमानात् पूर्वभावित्वात् "पुरुषमात्रेण" (५।२।५।१) इत्यनुवाकात् पूर्वमिदं ब्राह्मणं द्रष्टव्यम्॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके चतुर्थोऽनुवाकः॥०॥

संवत्सरमुखं भृत्वा द्वितीयं संवत्सर आग्नेयमष्टा-कपालं निर्वपेदैन्द्रमेकादशकपालं वैश्वदेवं द्वादश-कपालं बार्हस्पत्यं चरुं वैष्णवं त्रिकपाल[१०] तृतीयं संवत्सरेऽभिजिता यजेत[११] यदष्टाकपालो भवत्यष्टाक्षरा

---

* 'वेचिताः' इति का० श्री० पु० पाठः।
† यजमेव सर्वत्र पाठः। 'अपहरन्तः' इत्येवं पाठो भवितुं युक्तः।

गायत्र्याग्नेयं गायत्रं प्रातःसवनं प्रातःसवनमेव तेन दाधार गायत्रीं छन्दो[२] यदेकादशकपालो भवत्येकादशाक्षरा त्रिष्टुगैन्द्रं त्रैष्टुभं माध्यन्दिनꣳ सवनꣳ माध्यन्दिनमेव सवनं तेन दाधार त्रिष्टुभं ॥ १ ॥

छन्दो यद्द्वादशकपालो भवति द्वादशाक्षरा जगती वैश्वदेवं जागतं तृतीयसवनं तृतीयसवनमेव तेन दाधार जगतीं छन्दो यदार्हस्पत्यश्चरुर्भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मैव तेन दाधार यद्वैष्णवस्त्रिकपालो भवति यज्ञो वै विष्णुर्यज्ञमेव तेन दाधार यत्तृतीये संवत्सरेऽभिजिता यजतेऽभिजित्यै[३] यत् संवत्सरमुखं बिभर्तीममेव ॥ २ ॥

तेन लोकꣳ स्पृणोति यद्द्वितीये संवत्सरेऽग्निं चिनुतेऽन्तरिक्षमेव तेन स्पृणोति यत्तृतीये संवत्सरे यजतेऽमुमेव तेन लोकं स्पृणोति[४] एतं वै परं आट्णारः कृष्णीवाꣳ श्रौञ्जिजो वीतहव्यः आयुस्तत्सदस्युः पौरुकुत्स्यः प्रजाकामा अचिन्वत तनो वै ते सहस्रꣳ सहस्रं पुरुषानविन्दन्त[५] प्रथते प्रजया पशुभिस्तां माचामाप्नोति यान्नेऽगच्छन् य एवं, विद्वानेतमग्निं चिनुते[६] ॥ ३ ॥

दाधार त्रिष्टुभम्। इममेव। एवं। चत्वारि च ॥५॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके पञ्चमोऽनुवाकः ॥ ० ॥

क्षेत्रं मातुः* पुरा होमस्तुतुर्थे समुदीरितः।
अथ पञ्चमे कानिचित् हवींषि विधीयन्ते।

पूर्वस्मिन् प्रपाठके संवत्सर-व्यह-षडह-द्वादशाहाग्निधारणपक्षा-स्त्वारोऽभिहिताः। तत्र तापस्तिनाम् अयनाख्यस्य संवत्सरसत्रस्य† अङ्गभूते सत्रे संवत्सरम् उख्याधारणं नियतम्। अत एव सूत्रकार आह,—'तापस्तिनेऽग्नौ संवत्सरं दीक्षाः संवत्सरमुपसदः पुरस्तादुपसदामाग्नेयमष्टाकपालमिति पञ्च' इति।

तदिदं सूत्रोक्तं हविःपञ्चकं विधत्ते,—"संवत्सरम् उख्यं भृत्वा द्वितीये संवत्सरे आग्नेयम् अष्टाकपालं निर्वपेत् ऐन्द्रम् एकादशकपालं वैश्वदेवं द्वादशकपालं बार्हस्पत्यं चरुं वैष्णवं त्रिकपालम्(१)" इति।

यद्यपि उक्तं सूत्रकारेण,—'द्वितीये संवत्सरेऽभिजिता विश्वजिता वा यजेत सर्ववेदसं ददाति' इति।

तत्र आद्यं पक्षं विधत्ते,—"द्वितीये संवत्सरे अभिजिता यजेत(२)" इति। 'अभिजित्' इति सोमयागविशेषः।

तत्र पञ्चसु हविःषु प्रथमहविः प्रशंसति,—"यत् अष्टाकपालः भवति, अष्टाक्षरा गायत्री आग्नेयं गायत्रं प्रातःसवनं प्रातःसवनम् एव तेन द्वारा गायत्रीं छन्दः(३)" इति। गायत्रीपादस्य अष्टाक्षरत्वं प्रसिद्धम्। 'प्रातःसवनं' च गायत्रीछन्दसा निष्पाद्यत्वात् 'गायत्रं'। गायत्र्या सह अग्नेः उत्पन्नत्वात् तत् 'आग्नेयम्' अपि। अतः 'तेन' हविषा प्रातःसवनफलं 'गायत्रीं' 'छन्दः' देवतां च प्राप्नोति।

---

* 'क्षेत्रमातुः' इति च पाठान्तरम्।
† 'संवत्सरत्रयस्य' इति का० को० पु० पाठः।

इतराणि चत्वारि हवींषि, अभिजिदाख्यं सोमयागं च क्रमेण प्रशंसति,—"यत् एकादशकपालः भवति एकादशाक्षरा त्रिष्टुक् ऐन्द्रं त्रैष्टुभं माध्यं दिनम् सवनं माध्यं दिनम् एव सवनं तेन दाधार त्रिष्टुभं छन्दः यत् द्वादशकपालो भवति द्वादशाक्षरा जगती वैश्वदेवं तार्तीयसवनं तृतीयसवनम् एव तेन दाधार जगतीं छन्दः यत् बार्हस्पत्यः चरुः भवति ब्रह्म वै देवानां बृहस्पतिः ब्रह्म एव तेन दाधार यत् वैष्णवः त्रिकपालो भवति यज्ञो वै विष्णुः यज्ञम् एव तेन दाधार यत् तृतीये संवत्सरे अभिजिता यजते अभिजित्यै[७]" इति। अत्र सर्वत्र हविःप्रशंसा देवताप्रशंसा अभिजिद्यागप्रशंसा च विस्पष्टा।

अथ उख्यधारणं, पञ्चहविर्युक्तयजनम्, अभिजिदाख्यम् एकाहञ्च क्रमेण प्रशंसति,—"यत् संवत्सरम् उख्यं बिभर्त्ति इमम् एव तेन लोकम् स्पृणोति यत् द्वितीये संवत्सरे अग्निं चिनुते अन्तरिक्षम् एव तेन स्पृणोति यत् तृतीये संवत्सरे यजते असुम् एव तेन लोकम् स्पृणोति[८]" इति। यद्यपि अयम् अभिजित् एकाहः, न तु संवत्सरसाध्यम् अयनं, तथापि तापस्वितानाम् अयने अङ्गभूतो यः अग्निः, तद्धर्मः संवत्सरोख्यधारणं संवत्सरोपसदश्च; सः अभिजिदङ्गेऽपि अतिदिश्यते। तस्मात् अयम् अङ्गभूतः अग्निः धर्मातिदेशार्थं 'तापस्वितः' इत्युच्यते। पञ्च हवींषि अभिजिदङ्गभूते अग्नौ विग्रियन्ते।

तदिदं पञ्चहविरुपेतं यजनं प्रकारान्तरेण प्रशंसति,—"एतं वै परः भाट्णारः कक्षीवान् औग्रिजः वीतहव्यः आघवः यजदग्नुः

पौरुकुत्सः प्रजाकामाः अचिन्वन्त ततो वै ते सहस्रꣳ सहस्रं पुत्रान् अविन्दन्त[८]"—इति। परब्रह्माभिधेयः कश्चित् ऋषिः, योऽयम् अष्टादशः पुरुषः। 'कक्षीवान्' अन्यः ऋषिः, स च उशिजः पुत्रः। 'दीर्घतमाः' अन्यः ऋषिः, स च अयसः पुत्रः। 'असदस्युः' अन्यः, स च पुरुकुत्सस्य पुत्रः। 'ते' एते 'प्रजाकामाः' सन्तः तम् 'एतं' संवत्सरधारणेन पञ्चहविर्भिश्च उपेतम् अग्निं चित्वा प्रत्येकं 'सहस्रं' 'पुत्रान्' अलभन्त।

अथ एतस्य चयनस्य फलं दर्शयति,—"प्रथते प्रजया पशुभिः तां मात्राम् आप्नोति यां ते अगच्छन् यः एवं विद्वान् एतम् अग्निं चिनुते[९]" इति। पूर्वोक्ताः महर्षयः 'यां' मात्रां सहस्रपुत्ररूपम् ऐश्वर्यप्रमाणम् 'अगच्छन्', 'तां' 'मात्राम्' अयमपि 'एतम्' 'अग्निं' चित्वानः प्राप्नोति॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके पञ्चमोऽनुवाकः॥०॥

प्रजापतिरग्निमचिनुत स क्षुरपविर्भूत्वाऽतिष्ठत्तं देवा विन्यतो नोपायन्ते छन्दोभिरात्मानं छादयित्वोपायन् तच्छन्दसां छन्दस्त्वं ब्रह्म वै छन्दाꣳसि ब्रह्मण एतद्रूपं यत् कृष्णाजिनं काण्डो उपानद्भावुप मुञ्चते

छन्दोभिरेवात्मानं छादयित्वाग्निमुप चरत्यात्मनोऽहिꣳसायै[१] देवनिधिर्वा एष नि धीयते यदग्निः ॥ १ ॥

अन्ये वा वै निधिमगुप्तं विन्दन्ति न वा प्रति प्र जानात्युखामा क्रामत्यात्मानमेवाधिपां कुरुते गुप्त्यै[२] अथो खल्वाहुर्नाक्रम्येति नैर्ऋत्युखा यदाक्रामेन्निर्ऋत्या आत्मानमपि दध्यात् तस्मान्नाक्रम्या पुरुषशीर्षमुप दधाति गुप्त्या अथो यथा ब्रूयादेतन्मे गोपायेति ताडगेव तत्[३] ॥ २ ॥

प्रजापतिर्वा अथर्वाग्निरेव दध्यङ्ङाथर्वणस्तस्येष्टका अस्थान्येतꣳ ह वाव तदृषिरभ्यनूवाचेन्द्रो दधीचो अस्थभिरिति यदिष्टकाभिरग्निं चिनोति सात्मानमेवाग्निं चिनुते[४] सात्मामुष्मिं लोके भवति य एवं वेद[५] शरीरं वा एतदग्नेर्यच्चित्य आत्मा वैश्वानरो यच्चिते वैश्वानरं जुहोति शरीरमेव सꣳस्कृत्य ॥ ३ ॥

अभ्यारोहति[६] शरीरं वा एतत् यजमानः सꣳस्कुरुते यदग्निं चिनुते यच्चिते वैश्वानरं जुहोति शरीरमेव सꣳस्कृत्यात्मनाभ्यारोहति तस्मात्तस्य नाव यन्ति जीवन्नेव देवानप्येति[७] वैश्वानर्यर्चा पुरीषमुप दधातीयं वा अग्निर्वैश्वानरस्तस्यैषा चितिर्यत्पुरीषमग्निमेव वैश्वा-

नूनं चिन्नुत वृषा वा अग्नेः, प्रिया तनूर्यद्वैश्वानरः
प्रियामेवास्य तनुवमव रुन्धे[८] ॥ ४ ॥

अग्निः । तत् । सꣳस्कृत्य । अग्नेः । दश च ॥ ६ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके षष्ठोऽनुवाकः ॥ ० ॥

पञ्चमेऽभिजितोऽङ्गं यत् पचने तत् विशेषितम् ।

अस्य च ब्राह्मणस्य पूर्वशेषत्वाभावाच्च तत्रान्तर्भावः। किन्त्वत्रैव निवेशः।

अथ षष्ठे पूर्वप्रकरणोक्तानेव विधीन् कांश्चित् अनूद्य प्रशंसति। तत्र "अग्नयऽऊर्जस्वतेति परि लिखति"(५।७।४।१) इत्यनुवाके "काष्णीं उपानहावुप मुञ्चते" इति यदिहितं, तस्य प्रशंसां दर्शयति,— "प्रजापतिः अग्निम् अचिनुत सः क्षुरपविः भूत्वा अतिष्ठत् तं देवा विभ्यतः न उपायन् ते छन्दोभिः आत्मानं छादयित्वा उप आयन् तत् छन्दसां छन्दस्त्वं ब्रह्म वै छन्दाꣳसि ब्रह्मणः एतत् रूपं यत् कृष्णाजिनं काष्णीं उपानहौ उप मुञ्चते छन्दोभिः एव आत्मानं छादयित्वा अग्निम् उप चरति आत्मनः अहिꣳसायै(१)" इति। यदा 'प्रजापतिः' 'अग्निं' चितवान्, तदा 'सः' अग्निः 'क्षुरपविः' 'भूत्वा' केनापि अगम्यः 'अतिष्ठत्'। क्षुरधारासमाना धारा यस्य सोऽयं क्षुरपविः; तथाविधस्वरूपवत् अग्नेः

इत्यर्थः। 'तं' तादृशम् अग्निं दृष्ट्वा 'देवाः' भीताः सन्तः तत्-समीपं 'न' प्राप्ताः। ततः प्रतीकारं विचार्य छन्दोयुक्तैर्मन्त्रैः स्वशरीरम् आच्छाद्य मन्त्रजपेन रक्षां कृत्वा वह्निसमीपमागताः। छादयन्ति एभिः—इति व्युत्पत्त्या 'छन्दस्' सम्पन्नम्। तेषां च छन्दसां वेदे अन्तर्भूतत्वात् वेद एव तद्रूपम्। 'कृष्णाजिनं' च वेदस्य स्वरूपम्। "ऋक्सामे वै देवेभ्यो यज्ञायातिष्ठमाने कृष्णो रूपं कृत्वा" (३।१। ३।१) इत्युक्तत्वात् तस्मात् कृष्णाजिननिर्मिते 'उपानहौ' 'उप'—'सृजते'। तथा सति 'छन्दोभिः एव' स्वशरीरमाच्छाद्य अग्नेः उपसरणात् स्वस्य हिंसा न भवति। यद्यपि "मृत्युर्वा एष यदग्निः कृष्ण एतद्रूपं यत् कृष्णाजिनम्" (५।४।४।४) इति प्रशंसापि तत्रैव कृता, तथापि तस्या एवायं प्रपञ्च इत्यविरोधः।

"एषां वा एतल्लोकानाम्" (५।२।८।२) इत्यस्मिन् अनुवाके यद्दिहितं "मध्ये पुरुषशीर्षमुप दधाति सवीर्यत्वायोखायामपि दधाति" इति, तदेतत् पूर्वोत्तरपक्षाभ्यां प्रशंसितुं पूर्वपक्षं तावद्दर्शयति,— "देवनिधिः वै एषः नि धीयते यत् अग्निः अन्ये वा वै निधिम् अगुप्तं विन्दन्ति न वा प्रति प्र जानाति उखाम् आक्रामति आत्मानम् एव अधिपां कुरुते गुप्त्यै(९)" इति। योऽयं चीयमानोऽग्निः, सोऽयं देवानां निधिस्थानीयः। एवं सति लोके यो निधिः अगुप्तो भवति, तं 'निधिम्' 'अन्ये' 'वा' विरोधिनो लभन्ते, स्वयं वा कदाचित्, तदीयस्थानविस्मरणेन तं निधिं 'न' 'प्र'-'जानाति'। अतो दोषद्वयपरिहाराय पूर्वम् उपचितां 'उखां' खंपादेन आक्रामेत्। तथा सति यजमानः स्वात्मानम् 'एव' निधेः 'अधिपां'

पात्रकं करोति। तच्च रक्षणाय भवति। आक्रमणेन खलु दृढीकृतत्वात् न कदाचित् विस्मरति, खेन रक्षितत्वादेव वैरिणोऽपि तं निधिं न लभन्ते।

अथ सिद्धान्तं दर्शयति,—"अथो खलु आहुः न आक्रम्या इति नैर्ऋती उखा, यत् आक्रामेत् निर्ऋत्यै आत्मानम् अपि दध्यात् तस्मात् न आक्रम्या पुरुषशीर्षम् उप दधाति गुप्त्यै अथो यथा ब्रूयात् एतत् मे गोपाय इति तादृक् एव तत्(१)" इति। अभिज्ञाः खलु तं पक्षम् अनादृत्य एवम् 'आहुः',* पादेन सा इयम् उखा 'न आक्रम्या इति'। तत्रायं हेतुः,-इयम् 'उखा' राक्षसदेवताया निर्ऋतेः सम्बन्धिनी। अतः उखायां आक्रमणे 'निर्ऋत्यै' स्वशरीरं समर्पयेत्। 'तस्मात्' सर्वथा 'न' आक्रमणीया। यदि निधेर्गुप्तिः अपेक्षिता, तर्हि 'पुरुषशीर्षम्' उखायाम् उपरि स्थापयेत्। तथा सति, 'यथा' लोके कश्चित् पुरुषं रक्षकं निधिसमीपे अवस्थाप्य मदीयम् 'एतत्' द्रव्यं 'गोपाय' 'इति' स्वामी 'ब्रूयात्', 'तादृक् एव' 'तत्' पुरुषशीर्षस्थापनं द्रष्टव्यम्।

पञ्चमप्रपाठके "य एवं विद्वानग्निं चिनुते ऋध्नोत्येव"(५।५।२।२) इति यजनविधिः उक्तः, तं पुनः प्रशंसति,—"प्रजापतिः वै अथर्वा अग्निः एवं दध्यङ् आथर्वणः तस्य दृष्टकाः अश्वानि एतꣳ ह वाव तत् ऋषिः अभ्यनूवाच दध्यङ् दधीचः अश्वभिः इति यत् दृष्टकाभिः अग्निं चिनोति आत्मानम् एव अग्निं चिनुते(२)" इति। अत्र कश्चित्

---

* 'अनादृत्यैव प्राहुः' इति आदर्शपुस्तके पाठः।

रूपकं* परिकल्प्यते,—अस्ति कश्चित् अथर्वाख्यः ऋषिः। तस्य च पुत्रो दध्यङ्नामा। दधीचः अस्थीनि क्वचित् प्रच्छन्नि आयुधत्वेन† प्राप्तानि। तत् सर्वम् अत्र सम्पाद्यते। योऽयम् अग्नेस्तेता 'प्रजापतिः', स एव 'अथर्वा'। चीयमानस्य 'अग्निः' तत्पुत्रो 'दध्यङ्'। 'इष्टकाः' अस्थीनि। तम् 'एतम्' एव अर्थम् अभिप्रेत्य कश्चित् 'ऋषिः' मन्त्रः 'तत्' सर्वम् अनुवदति। मन्त्रस्य च प्रतीकमिदम्,—'इष्टो दधीचो अस्थभिः' इति। स च मन्त्रोऽन्यत्र एवम् आम्नातः,—"इष्टो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः जघान नवतीर्नव" (१।५।९।१ आ०) इति। तदेवम् इष्टकानाम् अस्थित्वात् ताभिश्चयने सति सम्भरीरोऽग्निः चितो भवति।

वेदनं प्रशंसति,—"आत्मा अमुष्मिन् लोके भवति य एवं वेद[५]" इति।

"प्राचीमनु प्रदिशं प्रेहि विद्वानित्याह" (५।४।७।१) इत्यनुवाके यद्विहितं "द्वादशकपालो वैश्वानरो भवति" इति, तत्प्रशंसति,—"शरीरं वै एतत् अग्नेः यत् चित्यः आत्मा वैश्वानरो यत् चिते वैश्वानरं जुहोति शरीरम् एव संस्कृत्य अभ्यारोहति[६]" इति। यः चितिनिष्पाद्यः अग्निः, तत् इदम् अग्निदेवताकम् 'शरीरम्'। 'वैश्वानरः' च शरीरावस्थितो जीवात्मा। तथा सति, 'चिते'

---

* एवमेव सर्वत्र पाठः। 'क्वचिद्रूपकम्' इत्येवं पाठो भवितुं युक्तः।

† का॰ श्री॰ पुस्तके तु 'क्वचित् प्रच्छन्नं अनायत्यायुधत्वं' इति पाठः, एवं आदर्शपुस्तके '...अनायुधत्वं' इति पाठश्च न साधुः।

अग्नौ वैश्वानरपुरोडाशं 'जुहोति' इति 'यत्', तेन अग्निदेवताया: 'शरीरम् एव' 'संस्कृत्य' पश्चात् आरूढो भवति।

तस्य एतस्य वैश्वानरपुरोडाशस्य पोदकप्राप्तम् अवदानं निषेधति;— "शरीरं वै एतत् यजमानः संस्कुरुते यत् अग्निं चिनुते यत् चिते वैश्वानरं जुहोति शरीरम् एव संस्कृत्य आत्मना अभ्यारोहति तस्मात् तस्य न अव द्यन्ति जीवन् एव देवान् अपि एति(७)" इति। 'यजमानः' 'अग्निं' 'चिनुते' इति 'यत्', तेन अग्नौ स्वशरीरमेव संस्करोति। एवं सति, 'चिते' अग्नौ वैश्वानरपुरोडाशं 'जुहोति' इति 'यत्', तेन स्वशरीरमेव 'संस्कृत्य' तस्मिन् शरीरे जीवरूपेण आरूढो भवति। 'तस्मात्' 'तस्य' जीवात्मस्थानीयस्य पुरोडाशस्य अवदानं 'न' कुर्यात्। तदकरणे च स्वयं 'जीवन् एव' 'देवान्' प्राप्नोतीति।

"यावती वै पृथिवी"(५।२।२।१) इत्यनुवाके "पुरीषेणाभ्यूहति" इति यत् विहितं, तत्* "पृष्ठो दिवि (१।५।१२।१) इत्येताम् ऋचम् अन्यथात्वात् विनियुङ्क्ते, "वैश्वानर्या ऋचा पुरीषम् उप दधाति इयं वै अग्निः वैश्वानरः तस्य एषा चितिः यत् पुरीषम् अग्निम् एवं वैश्वानरं चिनुते एषा वै अग्नेः प्रिया तनूः यत् वैश्वानरः प्रियाम् एव अस्य तनुवम् अव रुन्धे(८)" इति। "पृष्ठो दिवि" इति मन्त्रप्रतिपाद्यो यः 'वैश्वानरः' 'अग्निः', स भूमिस्वरूप एव। 'पुरीषं' च चितिस्वरूपम्। अतः पुरीषोपधानेन भूमिरूपं वैश्वानराग्निमेव चितवान् भवति। किञ्च वैश्वानरशब्दोदितः सर्वपुरुष-

* 'यत्' इति आदर्शपुस्तके, आ० को० पुस्तके च पाठो न समीचीनः।

हितकारी यो विग्रहः, 'एषा' एव 'अग्नेः' 'प्रिया' 'तनूः'। ततो वैश्वानरमन्त्रेण उपधाने सति अग्नेः 'प्रियाम्' 'एव' 'तनुवं' प्राप्नोति। एतानि च ब्राह्मणवाक्यानि विधिशेषत्वात् तद्विधिसमीपे एव द्रष्टव्यानि।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके षष्ठोऽनुवाकः॥ ० ॥

अग्नेर्वै दोक्षया देवा विराजमाप्नुवन्[१] तिस्रो रात्रीर्दीक्षितः स्यात्त्रिपदा विराड्विराजमाप्नोति षड्रात्रीर्दीक्षितः स्यात् षड्वा ऋतवः संवत्सरः संवत्सरो विराड्विराजमाप्नोति दश रात्रीर्दीक्षितः स्यात् दशाक्षरा विराड्विराजमाप्नोति द्वादश रात्रीर्दीक्षितः स्यात् द्वादश मासाः संवत्सरः संवत्सरो विराड्विराजमाप्नोति चयोदश रात्रीर्दीक्षितः स्यात्त्रयोदश॥ १॥

मासाः संवत्सरः संवत्सरो विराड्विराजमाप्नोति पञ्चदश रात्रीर्दीक्षितः स्यात् पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते संवत्सरो विराड्विराजमाप्नोति सप्तदश रात्रीर्दीक्षितः स्यात् द्वादश मासाः पञ्चर्तवः स संवत्सरः संवत्सरो विराड्विराजमाप्नोति चतुर्विꣳशतिꣳ रात्रीर्दीक्षितः स्यात्चतुर्विꣳति-

र्धमासाः संवत्सरः संवत्सरो विराड्विराजमाप्नोति त्रिꣳशत्ꣳ राचीर्दीक्षितः स्यात् ॥ २ ॥

त्रिꣳशदक्षरा विराड्विराजमाप्नोति मासं दीक्षितः स्यात् यो मासः स संवत्सरः संवत्सरो विराड्विराजमाप्नोति चतुरो मासो दीक्षितः स्याच्चतुरो वा एतं मासो वसवोऽबिभरुस्ते पृथिवीमाजयन् गायत्रीं छन्दोऽष्टौ रुद्रास्तेऽन्तरिक्षमाजयन् त्रिष्टुभं छन्दो द्वादशादित्यास्ते दिवमाजयन् जगतीं छन्दस्ततो वै ते, व्याहृतमगच्छन् श्रैष्ठ्यं देवानां[१] तस्माद्द्वादश मासो भूत्वाऽग्निं चिन्वीत द्वादश मासाः संवत्सरः संवत्सरोऽग्निश्चित्यस्तस्याहोरात्राणीष्टका आप्तेष्टकमेनं चिनुतेऽथो व्याहृतमेव गच्छति श्रैष्ठ्यꣳ समानानाम्[२] ॥ ३ ॥

स्याच्चयोदश। त्रिꣳशत्ꣳ राचीर्दीक्षितः स्यात्। वै ते। अष्टाविꣳशतिश्च ॥ ७ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके सप्तमोऽनुवाकः ॥ ० ॥

षष्ठे प्रशंसाः कथितास्तन्निदिध्यनुवादतः।

अथ सप्तमे दीक्षाविकल्पान् विधातुं प्रस्तौति,—"अग्नेः वै दीक्षया देवाः विराजम् आप्नुवन्(१)" इति। मौण्ड्यमौनादिनियमस्वीकाररूपा दीक्षा। क्रीयमानस्य "अग्नेः" सम्बन्धिन्या तादृश्या 'दीक्षया' 'देवाः' 'विराजं' प्राप्नाः। विराट्छन्दः-शब्दः प्रशस्तच्छन्दोविशेषं ब्रूते। तेन च विशिष्टं राज्यम् उपलक्ष्यते। तत् राज्यं प्राप्नाः इत्यर्थः। अतो विधास्यमानेषु दीक्षाकालविकल्पेषु सर्वत्र विराट्प्राप्तिः उपन्यस्यते।

तानेतान् विकल्पितपक्षान् विधत्ते,—"तिस्रो रात्रीः दीक्षितः स्यात् त्रिपदा विराट् विराजम् आप्नोति षट् रात्रीः दीक्षितः स्यात् षट् वै ऋतवः संवत्सरः संवत्सरो विराट् विराजम् आप्नोति दश रात्रीः दीक्षितः स्यात् दशाक्षरा विराट् विराजम् आप्नोति द्वादश रात्रीः दीक्षितः स्यात् द्वादश मासाः संवत्सरः संवत्सरो विराट् विराजम् आप्नोति चयोदश रात्रीः दीक्षितः स्यात् चयोदश मासाः संवत्सरः संवत्सरो विराट् विराजम् आप्नोति पञ्चदश रात्रीः दीक्षितः स्यात् पञ्चदश वै अर्धमासस्य रात्रयः अर्धमासशः संवत्सरः आप्यते संवत्सरो विराट् विराजम् आप्नोति सप्तदश रात्रीः दीक्षितः स्यात् द्वादश मासाः पञ्च ऋतवः सः संवत्सरः संवत्सरो विराट् विराजम् आप्नोति चतुर्विꣳशतिꣳ रात्रीः दीक्षितः स्यात् चतुर्विꣳशतिः अर्धमासाः संवत्सरः संवत्सरो विराट् विराजम् आप्नोति चिꣳशतꣳ रात्रीः दीक्षितः स्यात् चिꣳशदक्षरा विराट् विराजम् आप्नोति मासं दीक्षितः स्यात् षः मासः षः संवत्सरः संवत्सरो विराट् विराजम् आप्नोति चतुरः मासः

दीक्षितः स्यात् चतुरो वै एतं मासः वसवः अभिभरः, ते पृथिवीम् आ अजयन् गायत्रीं छन्दः अष्टौ रुद्राः ते अन्तरिक्षम् आ अजयन् त्रिष्टुभं छन्दः द्वादश आदित्याः ते दिवम् आ अजयन् जगतीं छन्दः ततो वै ते व्यार्धनम् अगच्छन् श्रैष्ठ्यं देवानाम्[१]" इति। विराज-षड्-राज-दशराज-द्वादशराज-त्रयोदशराज-पञ्चदशराज-सप्तदशराज-चतु-र्विंशतिराज-त्रिंशद्राज-मास-चतुर्मासाष्टमास-द्वादशमासरूपास्त्रयोदश पक्षा विकल्पिताः। दशाक्षरैस्त्रिभिः पादैरुपेतं विराडाख्यं छन्दः। अतः त्रिंश-सङ्ख्यया तत्प्राप्तिः। षट्सङ्ख्यानाम् ऋतूनां संवत्सरावयवत्वेन संवत्सरस्वरूपत्वात्, संवत्सरस्य च षट्त्रिंशद्भिर्दिनदशकैः निष्पाद्यत्वात्, दशमसङ्ख्यायाश्च विराट्पदान्तरगतत्वात् संवत्सरद्वारा तत्प्राप्तिः। एवं सर्वत्र योज्यम्। अधिकमासेन* सह 'त्रयोदश मासाः'। सावनमासस्य त्रिंशद्रात्रनियमेऽपि चान्द्रमासस्य तन्नियमाभावात् तदपेक्षया पृथग्-मासोपन्यासः। 'वसवः' मासचतुष्टयम् उख्याग्निं भृत्वा† 'पृथिवीं' गायत्री-छन्दोदेवताश्च वशीकृतवन्तः। 'रुद्राः' तु मासाष्टकं भृत्वा 'अन्तरिक्षं' त्रिष्टुप्छन्दो देवताश्च वशीकृतवन्तः। 'आदित्याः' तु मासद्वादशकं भृत्वा† द्युलोकं जगतीच्छन्दो देवताश्च वशीकृतवन्तः। एतेषु पक्षेषु संवत्सरपक्षस्य अत्यन्तं प्रशस्तत्वात् आदित्याः इतरेभ्यो व्यावृत्तिं प्राप्य 'देवानां' मध्ये 'श्रैष्ठ्यं' प्राप्ताः।

अतः एतमेव पक्षम् आदरेण पुनः प्रशंसति,—"तस्मात् द्वादश मासः भृत्वा अग्निं चिन्वीत द्वादश मासाः संवत्सरः

* एवमेव सर्वत्र पाठः। 'अधिमासेन' इति पाठो भवितुं युक्तः।
† एवमेव सर्वत्र पाठः। 'भृत्वा' इति पाठो भवितुं युक्तः।

संवत्सरः अग्निः चित्यः तस्य अहोरात्राणि इष्टकाः आग्नेष्टकम् एनं चिनुते अथो व्यावृतम् एव गच्छति श्रैष्ठ्यꣳ समानानाम्[१]" इति। द्वादशमासानुपस्थानकाले नैरन्तर्येण उत्थाग्निं 'भृत्वा' 'अग्निं' चिनुयात्। मासद्वादशकस्य संवत्सररूपत्वात् चित्याग्निरपि धारणद्वारा संवत्सरात्मकः। 'तस्य' संवत्सरात्मनः अग्नेः 'इष्टकाः' एव 'अहोरात्राणि'। ततः संवत्सरधारणेन सम्पूर्णत्वेन आग्नेष्टकम् इमम् अग्निं चितवान् भवति। अपिच इतरेभ्यः अग्निचिद्भ्यो व्यावृत्तः 'समानानां' मध्ये 'श्रैष्ठ्यं' प्राप्नोति। यद्यपि "तस्मात् संवत्सरं भार्य्यः" (५।५।२।५) इत्यादौ संवत्सर-चिराव-षड्राव-द्वादशरात्रपक्षाः विहिताः, तथापि अर्थवादसम्बन्धार्थम् अत्र पुनरुपन्यासः।

एतच्च ब्राह्मणं अग्नावैष्णवविधिवत् "षड्भिर्दीक्षयति"(५।२।८ अ०) इत्यनुवाकसमीपे द्रष्टव्यम्।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके सप्तमोऽनुवाकः ॥०॥

सुवर्गाय वा एष लोकाय चीयते यदग्निस्तं यन्नाभ्यारोहेत् सुवर्गाल्लोकाद् यजमानो हीयेत पृथिवीमाऽक्रमिषं प्राणो मा मा हासीदन्तरिक्षमाऽक्रमिषं प्रजा मा मा हासीद्दिवमाऽक्रमिषꣳ सुवरगन्मेत्याहैष वा अग्नेरभ्यारोहस्तेनैवैनमभ्यारोहति सुवर्गस्य लोकस्य समष्ट्यै[१] यत्पुरुषसम्मितं मिनुयात् ॥ १ ॥

कनीयाꣳसं यज्ञक्रतुमुपेयात्पापीयस्यस्यात्मनः प्रजा स्याद्वेदिसंमितां मिनोति ज्यायाꣳसमेव यज्ञक्रतुमुपैति नास्यात्मनः पापीयसी प्रजा भवति[२] साहस्रं चिन्वीत प्रथमं चिन्वानः सहस्रसंमितो वा अयं लोक इममेव लोकमभिजयति द्विषाहस्रं चिन्वीत द्वितीयं चिन्वानो द्विषाहस्रं वा अन्तरिक्षमन्तरिक्षमेवाभि जयति त्रिषाहस्रं चिन्वीत तृतीयं चिन्वानः ॥ २॥

त्रिषाहस्रो वा असौ लोकोऽमुमेव लोकमभि जयति[३] जानुदघ्नं चिन्वीत प्रथमं चिन्वानो गायत्रियेवेमं लोकमभ्यारोहति नाभिदघ्नं चिन्वीत द्वितीयं चिन्वानस्त्रिष्टुभैवान्तरिक्षमभ्यारोहति ग्रीवदघ्नं चिन्वीत तृतीयं चिन्वानो जगत्यैवामुं लोकमभ्यारोहति[४] नाग्निं चित्वा रामामुपेयादयोनौ रेतो धास्यामीति न द्वितीयं चित्वान्यस्य स्त्रियम् ॥ ३ ॥

उपेयान्न तृतीयं चित्वा काञ्चनोपेयाद्रेतो वा एतन्नि धत्ते यदग्निं चिनुते यदुपेयाद्रेतसा व्यृध्येत[५] अथो खल्वाहुरप्रजस्यन्त्यन्नोपेयादिति यद्रेतःसिञ्चावुपदधाति ते एव यजमानस्य रेतो बिभृतस्तस्मादुपेयाद्रेतसोऽस्कन्दाय[६] त्रीणि वाव रेतांꣳसि पिता पुत्रः पौत्रः ॥ ४ ॥

यद्वै रेतःसिचावुपदधाद्रेतोऽस्य वि च्छिन्द्यात् तिस्र उप दधाति रेतसः सन्तत्यै[७] इयं वाव प्रथमा रेतःसिग्वाग्वा इयं तस्मात्पश्यन्तीमां पश्यन्ति वाचं वदन्तीमन्तरिक्षं द्वितीया प्राणो वा अन्तरिक्षं तस्मान्नान्तरिक्षं पश्यन्ति न प्राणमसौ तृतीया चक्षुर्वा असौ तस्मात्पश्यन्त्यमूं पश्यन्ति चक्षुः[८] यजुषेमाश्च॥५॥

अमूश्चोप दधाति मनसा मध्यमामेषां लोकानां कृत्या अथो प्राणानाम्[९] इष्टो यज्ञो भृगुभिराशीर्दा वसुभिस्तस्य त इष्टस्य वीतस्य द्रविणेह भक्षीय[१०] इत्याह स्तुतशस्त्रे एवैतेन दृंहे[११] पिता मातरिश्वाऽच्छिद्रा पदा धा अच्छिद्रा उशिजः पदाऽनु तक्षुः सोमो विश्वविन्नेता नेषद्दुष्टरस्यतिरुक्थामदानि शꣳसिषदित्याहैतद्वै, अग्नेरुक्थन्तेनैवैनमनु शꣳसति[१२]॥६॥

मिनुयात्। तृतीयं चिन्वानः। स्त्रियम्। पौचः। च। वै। सप्त च॥८॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके अष्टमोऽनुवाकः॥०॥

दीक्षाकालविकल्पा ये ते सप्तम उदीरिताः।

अथ अष्टमे अग्नेरोहणादिकमुच्यते। यदुक्तं सूचकारेण 'नमस्ते

इरसे शोचिष इति द्वाभ्यामग्निमधिरोहति पृथिवीमाक्रमिषमित्येते-र्यजमानः' इति। तदिधिमिक्षोन्नयति,—"सुवर्गाय वै एष लोकाय चीयते यत् अग्निः तं यत् न अभ्यारोहेत् सुवर्गात् लोकात् यजमानः चीयेत पृथिवीम् आ अक्रमिषं प्राणः मा मा हासीत् अन्तरिक्षम् आ अक्रमिषं प्रजा मा मा हासीत् दिवम् आ अक्रमिषं सुवः अगन्म इति आह एषः वै अग्नेः अभ्यारोहः तेन एव एनम् अभ्यारोहति सुवर्गस्य लोकस्य समष्ट्यै(१)" इति। योऽयं चीयमानः 'अग्निः', 'एषः' सुवर्ग-लोकार्थं 'चीयते'; अतः तस्य अभ्यारोहाभावे 'सुवर्गात्' 'क्षीयेत', तस्मा भूदिति पृथिवीमित्यादिभिरभ्यारोहविधुक्त्रेयः*। मन्त्रार्थस्तु,—यजमानोऽहं 'पृथिवीं' पादेन 'आ'-'अक्रमिषम्', अतः 'प्राणः' 'मा' माम् परित्यजतु। अन्तरिक्षातिक्रमणेन पुत्रादिप्रजा 'मा' परित्यजतु। दिवः आक्रमणेन स्वर्गं प्राप्नुमः। एतन्मन्त्रपाठ एव अग्नेरभ्यारोहण-हेतुः। अतः 'तेनैव' 'अभ्यारोहति', तत्र स्वर्गप्राप्तौ भवति।

अथ यूपैकादशिन्यां कश्चिदिशेषं विधत्ते,—"यत् पञ्चमिनां मिनुयात् कनीयाःसं यज्ञक्रतुम् उपेयात् पापीयसी अस्य आत्मनः प्रजा स्यात् वेदिमिनां मिनोति ज्यायाःसम् एव यज्ञक्रतुम् उपैति न अस्य आत्मनः पापीयसी प्रजा भवति(२)" इति। पञ्चहस्तपरिमिते एव देशे यदि एकादशिनीम् अवस्थापयेत्, तदानीम् अल्पकं 'यज्ञक्रतुं' प्राप्नुयात्। 'अस्य' यजमानस्य स्वकीया 'प्रजा' 'पापीयसी' च भवेत्। अतः पञ्चपरिमाणादधिके वेदिप्रमाणयुक्तदेशे

* 'एवमेव सर्वत्र पाठः। 'विधिवक्त्रेयः' इति पाठो भवितुं युक्तः।

यूपान्तराणानि विलिख्य एकादशिनीं मिनुयात्। तथा सति प्रभूतम् 'एव' 'यज्ञक्रतुं' प्राप्नोति। 'अस्य' 'प्रजा' च 'पापीयसी' 'न' 'भवति'। पूर्वस्मिन् प्रपाठके "वज्र एकादशिनी"(५।५।७) इत्यत्र प्रकृतिभूते चयने पञ्चैकादशिनीपक्षेऽपि एक एव यूपः न तु यूपैकादशिनीति उक्तम्; इह तु चयनविकृतिषु यूपैकादशिनी अभ्युपगम्यते इत्यविरोधः।

अथ पञ्चसु अपि चितिषु सभूय दृष्टकासङ्ख्यां विधत्ते,—"साहस्रं चिन्वीत प्रथमं चिन्वानः सहस्रसम्मितो वै अयं लोकः इमम् एव लोकम् अभि जयति द्विसाहस्रं चिन्वीत द्वितीयं चिन्वानो द्विसाहस्रं वै अन्तरिक्षम् अन्तरिक्षम् एव अभि जयति त्रिसाहस्रं चिन्वीत तृतीयं चिन्वानः त्रिसाहस्रो वै असौ लोकः अमुम् एव लोकम् अभि जयति(९)"—इति। सहस्रसङ्ख्याकानाम् दृष्टकानां समूहः साहस्रम्। अथ वा सहस्रसङ्ख्याकाभिः दृष्टकाभिः निष्पाद्यः अग्निः साहस्रः। यः प्राथमिकम् अग्निं 'चिन्वीत', स तु 'साहस्रं' कुर्यात्। द्वितीयवारं 'चिन्वानो' द्विगुणम्। तृतीयवारं 'चिन्वानः' त्रिगुणम्। पृथिव्यन्तरिक्षद्युलोकाश्च उत्तरोत्तरभूयस्त्वात् तत्तच्चितिसम्मिताः। अतः तैः चयनैः तत्प्राप्तिः।

पञ्चचयेऽपि क्रमेणोर्ध्वपरिमाणं विधत्ते,—"जानुदघ्नं चिन्वीत प्रथमं चिन्वानो गायत्रियै एव इमं लोकम् अभ्यारोहति नाभिदघ्नं चिन्वीत द्वितीयं चिन्वानः त्रिष्टुभा एव अन्तरिक्षम् अभ्यारोहति शीर्षदघ्नं चिन्वीत तृतीयं चिन्वानो जगत्यै एव अमुं लोकम् अभ्यारोहति(१०)" इति। यथा प्रथम-द्वितीय-तृतीय-चितीनाम्

उत्तरोत्तरम् औज्ज्वल्यम्, अत एव गायत्री-त्रिष्टुब्-जगतीनाम् उत्तरोत्तरम् अक्षराधिक्यम्। अतः क्रमेण गायत्र्यादिद्वारा लोकत्रयम् अधिरोहति।

त्रिविधचयने क्रमेण नियमविशेषान् विधत्ते,—"न अग्निं चित्वा रामाम् उपेयात् अयोनौ रेतो धास्यामि इति न द्वितीयं चित्वा अन्यस्य स्त्रियम् उपेयात् न तृतीयं चित्वा कामन उपेयात् रेतो वै एतत् नि धत्ते यत् अग्निं चिनुते यत् उपेयात् रेतसा वृञ्चेत[५]" इति। यः प्राथमिकम् अग्निचयनं करोति, सः 'रामां' 'न' 'उपेयात्',—स्वकीयासु भार्यासु मध्ये रमणीया इयम् इति मत्वा कामुको न प्रवर्तेत, पुत्रार्थं तस्याम् ईप्सिता अनुज्ञा। रामोपगमनाभावे अयं हेतुः,—'अयोनौ' पुत्रोत्पत्त्यनुपयुक्तायां वृथैव 'रेतः' स्थापयिष्यामीति तस्मा भूदित्यनुपगमनम्। द्वितीयचयनानुष्ठायी सावर्ण्यर्णिकविवाहेप्सेत: 'अन्यस्य' वर्णान्तरस्य दुहितरं 'न' 'उपेयात्' सवर्णायाम् ईप्सितस्यानुज्ञा*। तृतीयचयनानुष्ठायी सवर्णाम् असवर्णां रमणीयां पुत्रार्थिनीं वा कामपि 'न' 'उपेयात्'। तत्रायं हेतुः,—'अग्निं चिनुते' इति 'यत्', तद्धेतमो गुप्तत्वेन स्थापनम्; तथा सति उपगमने 'रेतसा' वियुक्तो भवति।

तेमिमम् अगमनपक्षं दूषयित्वा सर्वत्र गमनमभ्यनुजानाति,—"अथो खलु आहुः अप्रजस्यं तत् यत् न उपेयात् इति यत् रेतःसिचौ उपदधाति ते एव यजमानस्य रेतो बिभृतः तस्मात्

* पूर्वत्र 'ईप्सितानुज्ञा' अत्र च 'ईप्सितस्यानुज्ञा' इति विभिन्नपाठो न समीचीन इव प्रतिभाति।

उपेयात् रेतसः अस्कन्दाय(१)" इति। अभिज्ञाः 'खलु' एवम् 'आहुः'। अनुपगमनम् 'अप्रजस्त्वं' प्रजोत्पादनहेतुर्न भवति। न च उपगमने रेतोहानिः शङ्कनीया। "विराट् ज्योतिः"(४।२।९।४) इत्यादिमन्त्राभ्यां 'रेतःसिचौ' दृष्टके अनेन उपहिते। तस्मात् 'ते एव' अस्य 'यजमानस्य' 'रेतः' पालयतः। अतो 'रेतसः' विनाशाभावाय प्रजोत्पत्त्यर्थम् 'उपेयात्'। साहस्रादिविधीनाम् आम्नातब्राह्मणोक्तावपि(?) अवकाशाभावात् सर्वान्ते निवेशः*। पूर्वस्य तु अग्न्यारोहणविधेः "नमस्ते हरसे" इत्याद्यधिरोहणादूर्ध्वभावित्वात् 'अग्नमूर्ध्नमिति परिशिष्यति"(५।४।४।१) इत्यनुवाकान्ते निवेशः।

पूर्वस्मिन् प्रपाठके "यद्विराजावुपदधाति"(५।५।४।१) इत्यादिना रेतःसिचो विधानमुक्तं, तत्रैव कश्चिद्विशेषं विधत्ते,—"त्रीणि वाव रेतांसि पिता पुत्रः पौत्रः यत् द्वे रेतःसिचौ उपदध्यात् रेतः अस्य वि च्छिन्द्यात् तिस्रः उप दधाति रेतसः सन्त्यै(२)" इति। योऽयं 'पिता' इदानीं वर्त्तते, सः अतीतस्य कस्यचित् रेतः। अस्य पितुः 'पुत्रः' रेतः। 'पौत्रः' तु पुत्रस्य रेतः। एवं पितृपुत्रपौत्राणां 'त्रीणि' 'रेतांसि'। तथा सति द्वयोरेव रेतःसिचोः उपधाने सति अवशिष्टं 'रेतः' 'वि'-'च्छिन्द्यात्' तस्मात् 'तिस्रः' रेतःसिचः उपदध्यात्। तच्च रेतः 'सन्त्यै' सम्पद्यते।

तिस्रोऽपि रेतःसिचः क्रमेण प्रशंसति,—"इयं वाव प्रथमा रेतःसिक् वाक् वै इयं तस्मात् पश्यन्ति इमां पश्यन्ति वाचं वदन्तीम् अन्तरिक्षं द्वितीया प्राणो वै अन्तरिक्षं तस्मात् न अन्तरिक्षं

* 'आम्नातः ब्राह्मणोक्तावपि' इत्येवं सर्वत्र पाठः न समीचीनः।

पश्यन्ति न प्राणम् असौ तृतीया चक्षुः वै असौ तस्मात् पश्यन्ति अमूं पश्यन्ति चक्षुः(८)" इति। या 'प्रथमा' 'रेतःसिक्' सा भूमिरेव प्राथम्यसाम्यात्। भूमिश्च वायूपैव अधोवृत्तित्वसाम्यात्। आस्ये हि वाग्वृत्तित्वम्, नासिकायां प्राणः, तत उपरि चक्षुः; ततो वाचः अधोवृत्तित्वम्। यस्मात् भूमिवाचौ अधोवृत्तित्वेन समानरूपे, 'तस्मात्' न केऽपि नानाविधशस्यादिपूर्णाम् 'इमां' भूमिं मातृरूपेण 'पश्यन्ति'। तथा विद्वत्सभायां सम्यक् 'वदन्तीं' 'वाचं' 'पश्यन्ति' आद्रियन्ते। येयं 'द्वितीया' रेतःसिक्, सा च अन्तरिक्षरूपा मध्यमत्वसाम्यात्। तच्च 'अन्तरिक्षं' प्राणस्वरूपम् प्राणस्यापि वाक्चक्षुषोः मध्यवर्तित्वात्। यस्मात् अन्तरिक्षप्राणयोः साम्यं, 'तस्मात्' अमूर्त्तम् 'अन्तरिक्षं' चक्षुषा न 'पश्यन्ति'। 'प्राणं' च नासिकासञ्चारिणं चक्षुषा न पश्यन्ति। येयं 'तृतीया' रेतःसिक् दृष्टका, सा द्युलोकस्वरूपा उपरिवर्तित्वसाम्यात्। सा च द्यौः चक्षुःस्वरूपा, चक्षुरपि हि वाक्प्राणाभ्यामूर्ध्वं वर्त्तते। यस्माद्धि चक्षुषा साम्यं, 'तस्मात्' लोके जनाः सूर्यचन्द्रनक्षत्राद्यङ्कितां 'अमूं' दिवं प्रत्यक्षेण 'पश्यन्ति'। 'चक्षुः' अपि शुक्लकृष्णाकनीनिकोपेतं परकीयमुखस्थं न प्रत्यक्षतः 'पश्यन्ति'।

तदेवं तिस्रः प्रशस्य तासु कञ्चिद्विशेषं विधत्ते,—"यजुषा इमां च अमूं च उपदधाति मनसा मध्यमाम् एषां लोकानां कृत्यै अथो प्राणानाम्(९)" इति। "विराड् ज्योतिरधारयत्"(४।२।८।४) इति 'यजुषा' उच्चारितेन 'इमां' प्रथमां रेतःसिचम् उपदधात्। तथा "सम्राड् ज्योतिरधारयत्"(४।२।८।५) इति यजुषा उच्चारितेन

'अमू' द्वतीयां रेतःसिचम् उपदध्यात्। "स्वराड् ज्योतिरधारयत्" (४।२।८।५) इत्येतत् यजुः अनुवाक्यं 'मनसा' स्तुत्वा 'मध्यमां' रेतःसिचम् उपदध्यात्। अयं च प्रकारः 'एषां' पृथिव्यादिलोकानां स्वस्वव्यापारसामर्थ्याय सम्पद्यते। अपि च वाक्प्राणचक्षुराख्यानां 'प्राणानाम्' अपि स्वस्वव्यापारसामर्थ्याय सम्पद्यते। तदिदं रेतःसिचां ब्राह्मणं "यद्विराजावुपदधाति" इत्यनेन सह "स्वयमातृण्णामुप दधाति" (५।२।८) इत्यनुवाके द्रष्टव्यम्।

यदुक्तं सूत्रकारेण "एकादश सभिष्टयजूंषि जुहोति न वाध्वरिकाणि ऋतेष्टो यज्ञो भृगुभिरिति दशमैकादशे जुहोति" इति। तत्रेतम् विधातुं मन्त्रावुत्पादयति,—"दृष्टो यज्ञो भृगुभिः आशीर्दाः वसुभिः तस्य ते दृष्टस्य वीतस्य द्रविणा इह भक्षीय[१०]" इति। 'भृगुभिः' भृगुममानैः ऋत्विग्भिः, 'वसुभिः' निवासहेतुभिः देवैश्च 'दृष्टः' अयं 'यज्ञः' 'आशीर्दाः' यजमानस्य फलप्रदः अस्तु। सोऽयम् एको मन्त्रः। हे यज्ञ, 'तस्य' तादृशस्य भृगुभिरिष्टस्य 'ते' तव 'द्रविणा' फलभूतानि धनानि 'इह' कर्मणि 'भक्षीय' भजे यथा प्राप्नुयाम्। सोऽयं द्वितीयो मन्त्रः।

एतन्मन्त्रमाध्यं होमविधिमुत्पादयति,—"इत्याह स्रुतशस्त्रे एव एतेन दुहे[११]" इति। इत्युक्तमन्त्रद्वयं होमकाले पठेत्। तेन स्रुतशस्त्रे* उभे अपि दुग्धवान् भवति। तदिदं ब्राह्मणम् अन्ते द्रष्टव्यम्।

यदुक्तं सूत्रकारेण "पिता मातरिश्वेति मञ्जिनोक्थेन होतानुब्रूयति होतर्यक्षमयमानेऽध्वर्युः" इति। तत्र मन्त्रमुत्पाद्य विधत्ते,—"पिता मातरिश्वा अच्छिद्रा पदा धाः अच्छिद्राः उन्निजः

* 'स्रुते शस्त्रे' इति आदर्शपुस्तके पाठः।

पदा अनु तनुः सोमो विश्ववित् नेता नेषत् बृहस्पतिः उक्थामदानि शंसिषत् इति आह एतत् वै अग्नेः उक्थं तेनैव एनम् अनु शंसति(१२) इति। 'पिता' पालकः 'मातरिश्वा' वायुः 'अच्छिद्रा पदा' विनाशरहितानि स्थानानि 'धाः' दधातु सम्पादयतु। तथा 'उग्निजः' कर्मनीया महर्षयः 'अच्छिद्राः' स्वयं विनाशरहिताः सन्तः पदानि स्थानानि 'अनु'-'तनुः' सम्यक् सम्पादयन्तु। 'विश्ववित्' सर्वज्ञः 'नेता' जगतः प्रवर्त्तकः 'सोमः' 'नेषत्' नयतु, कामानि प्रापयतु। बृहस्पतिः' च 'उक्थामदानि' शस्त्राणि हर्षकारणानि 'शंसिषत्' शंसतु। 'इति' एतादृशं मन्त्रं पठेत्। 'एतत्' एव मन्त्रस्वरूपम् 'अग्नेः' प्रियम् 'उक्थं' शस्त्रम्। 'तेनैव' मन्त्रपाठेन 'एनम्' अग्निम् अनुक्रमेण 'शंसति'। एतच्च ब्राह्मणं गायत्रादिसामोपन्यासेन सह विकर्षणादूर्ध्वं द्रष्टव्यम्।

इति मायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठकेऽष्टमोऽनुवाकः॥ ० ॥

सूयते वा एषोग्नीनां य उखायां म्रियते यदुधः सादयेन्नर्भाः प्रपादुकाः स्युरथो यथा सुवात् प्रत्यवरोहति तादृगेव तदासन्दी सादयति गर्भाणां धृत्या अप्रपादायाथो सुवमेवैनं करोति(१) गर्भो वा एष यदुखो योनिः शिक्यं यच्छिक्यादुखां निरूहेद्योनेर्गर्भं निर्हण्यात् षड्युग्मꣳ शिक्यं भवति षोढाविहितो वै ॥ १ ॥

पुरुष आत्मा च शिरश्च चत्वार्यङ्गान्यात्मन्नेवैनं बिभर्ति[२] प्रजापतिर्वा एष यदग्निस्तस्योखा चोलूखलञ्च स्तनौ तावस्य प्रजा उप जीवन्ति यदुखाञ्चोलूखलञ्चोपदधाति ताभ्यामेव यजमानोऽमुष्मिन् लोकेऽग्निं दुहे[३] संवत्सरो वा एष यदग्निस्तस्य चेधाविहिता इष्टकाः प्राजापत्या वैष्णवीः ॥ २ ॥

वैश्वकर्मणीरहोरात्राण्येवास्य प्राजापत्या यदुखं बिभर्ति प्राजापत्या एव तदुप धत्ते यत् समिध आदधाति वैष्णवा वै वनस्पतयो वैष्णवीरेव तदुप धत्ते यदिष्टकाभिरग्निं चिनोतीयं वै विश्वकर्मा वैश्वकर्मणीरेव तदुप धत्ते तस्मादाहुस्त्रिवृदग्निरिति[४] तं वा एतं यजमान एव चिन्वीत यदस्यान्यः, चिनुयाद्यत्तं दक्षिणाभिर्न राधयेदग्निमस्य वृञ्जीत योऽस्याग्निं चिनुयात्तं दक्षिणाभीराधयेदग्निमेव तत् स्पृणोति ॥ ३ ॥

षोढाविहितो वै। वैष्णवीः। अन्यः। विंशतिश्च ॥ ९ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके नवमोऽनुवाकः ॥ ० ॥

अन्वारोहादिविधयो ह्यष्टमे समुदीरिताः।

अथ नवमे आसन्द्यादिकमभिधीयते। "विष्णुमुखा वै देवाः" (५।२।१) इत्यस्मिन् अनुवाके 'चतसृभिः मादयति' इति यद्विहितं, तच्च मादनाधारं विधत्ते,—"सूयते वै एषः अग्नीनां यः उखायां भियते यत् अधः मादयेद् गर्भाः प्रपादुकाः स्युः अथो यथा मत्वात् प्रत्यवरोहति तादृक् एव तत् आसन्दीं मादयति गर्भाणां धृत्यै अप्रपादाय अथो मत्वम् एव एनं करोति[१]" इति। 'यः' अयम् अग्निः 'उखायां धार्यते', 'एषः' अग्निः अन्येषाम् 'अग्नीनां' मध्ये 'सूयते' अभिषिच्यते, ईश्वरत्वं प्राप्नोतीत्यर्थः। यदि एतादृशम् अग्निम् 'अधः' भूमौ 'मादयेत्', तदानीं प्राणिनां 'गर्भाः' भूमौ 'प्रपादुकाः' पतिताः 'स्युः'। अपि च 'यथा' लोके 'मत्वात्' ऐश्वर्यपदात् 'प्रत्यवरोहति' भ्रश्यति। 'तादृक् एव' 'तत्' अधः-मादनम्। तस्मात् आसन्दीम् आमादयति, मह्यां आसन्द्यां उख्यं स्थापयेत्। तच्च स्थापनं प्राणिगर्भधारणाय पतनराहित्याय च भवति। अपि च 'एनं' 'मत्वम्' अभिषिक्तम् ईश्वरमेव 'करोति'। एतच्च मादनविधिसमीपे एव द्रष्टव्यम्।

"न ह स्म वै पुराग्निः" (५।२।१०) इत्यनुवाके यद्विहितं 'षड्ढामं शिक्यं भवति इति', तदेतदनूद्य प्रशंसति,—"गर्भो वै एषः यत् उखो योनिः शिक्यं यत् शिक्यात् उखां निरूहेत् योनेः गर्भं निर्हण्यात् षड्ढामꣳ शिक्यं भवति षोढाविहितो वै पुरुषः आत्मा च शिरश्च चत्वारि अङ्गानि आत्मन् एव एनं बिभर्त्ति[२]" इति। योऽयम् 'उख्यः' अग्निः, स गर्भस्थानीयः। 'शिक्यं' च योनिस्थानीयम्।

यदि 'शिक्यात्' 'उखां' 'निरूहेत्' निर्गमयेत् विस्तृतेन उद्यामरज्ज्वा-त्येन अधः पातयेत् इत्यर्थः, तदा 'योनेः' सकाशात् 'गर्भं' निःशेषेण हतवान् भवति। अतस्तत्परिहारार्थं "शिक्यं" षड्भिः उद्यामैः ऊर्ध्व-प्रसृतरज्जुविशेषैर्युक्तं कर्त्तव्यम्। लोके 'पुरुषः' 'षोढाविहितः' षड्भिः अवयवैरुपेतः। 'आत्मा' मध्यशरीरम् एकोऽवयवः, 'शिरः' द्वितीयावयवः, द्वौ हस्तौ, द्वौ पादौ इति 'चत्वारि' 'अङ्गानि'। अतः षडुद्यामे सति षडवयवयुक्तस्वशरीरे 'एव' 'एनम्' अग्निं धार-यति। एतच्च वाक्यं षडुद्यामविधिसमीपे द्रष्टव्यम्।

"एषां वा एतल्लोकानाम्" (५।२।८) इत्यनुवाके यत् 'उखामुप-दधाति' इति विहितं यच्च "स्वयमातृण्णाम्" (५।२।८) इत्यनुवाके 'उलूखलमुपदधाति' इति विहितं, तदुभयमत्र सह प्रशंसति,—"प्रजापतिः वै एष यत् अग्निः तस्य उखा च उलूखलं स्तनौ तौ अस्य प्रजाः उप जीवन्ति यत् उखां च उलूखलं च उपदधाति ताभ्याम् एव यजमानः अमुष्मिन् लोके अग्निं दुहे[१]" इति। यज्ञीयमानः 'अग्निः', 'एषः' प्रजापतिस्वरूपः। तेन चितत्वात् उखोलूखलयोः फलसाधनत्वात् स्तनसादृश्यम्। एतदनुष्ठानजन्यं फलं 'प्रजाः' 'उप'-'जीवन्ति'। एतदुपधानेन 'यजमानः' अपि स्वर्गे तत् फलं 'दुहे'। एतच्च उदाहृतयोः अनुवाकयोः एकत्र द्रष्टव्यम्।

अथ उख्यधारण-समिदाधानेष्टकोपधानानि प्रशंसति,—"सं-वत्सरो वै एषः यत् अग्निः तस्य त्रेधाविहिताः इष्टकाः प्राजापत्याः वैष्णवीः वैश्वकर्मणीः अहोरात्राणि एव अस्य प्राजापत्याः यत् उखां बिभर्त्ति प्राजापत्याः एव तत् उप धत्ते यत् समिधः आदधाति

वैश्वदेवा: वै पशवस्तस्य: वैश्वदेवी: एव तत् उप धत्ते यत् इष्टकाभि: अग्निं चिनोति इयं वै विश्वकर्मा वैश्वकर्मणी: एव तत् उप धत्ते तस्मात् आङ्ग: चिदत् अग्नि: इति[४]" इति। योऽयं चीयमान: 'अग्नि:' स एव संवत्सरधारणात् संवत्सरात्मक:। 'तस्य' च संवत्सररूपस्य अग्ने: सम्बन्धिन्य: 'इष्टका:' 'चेधा विहिता:' त्रिप्रकारा: सम्पादिता:। काश्चा:? इति, ता: उच्यन्ते—'प्राजापत्या:' वैराज्यो वैश्वकर्मण्यश्च। यानि एतानि 'अहोरात्राणि,' तानि 'एव' 'अस्य' संवत्सररूपस्य अग्ने: प्रजापतिनिर्मितत्वात् 'प्राजापत्या:' द्रष्टव्या:। अथ उक्तधारणेन प्राजापत्या: उपहिता भवन्ति। तद्देवं प्राजापत्यादिभि: तिसृभि: निष्पादितत्वात् 'अग्नि:' त्रिगुण: इति अभिप्राय: 'आङ्ग:'।

अथ उपधानकर्त्तारं विधत्ते,—"तं वै एतं यजमान: एव चिन्वीत यत् अस्य अन्य: चिनुयात् तं दक्षिणाभि: न राधयेत् अग्निम् अस्य वृञ्जीत य: अस्य अग्निं चिनुयात् तं दक्षिणाभि: राधयेत् अग्निम् एव तत् स्तृणोति[५]" इति। यजमान एव चयनस्य कर्त्ता, न अध्वर्यु:। यदि अध्वर्यु: कुर्यात्, तदानीम् अध्वर्यो: दक्षिणाभि: परितोषाभावे सति अग्निं नाशयेत्। अथ स्वयमशक्त: अध्वर्युणा कारयेत्, तदा 'तं' 'दक्षिणाभि:' तोषयेत्। तत 'अग्निम्' 'एव' तोषयति। तदिदं ब्राह्मणद्वयं मन्त्रव्याख्यानमध्ये श्रवकाशाभावेन निवेशनीयम्।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजु:-संहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके नवमोऽनुवाक: ॥०॥

प्रजापतिरग्निमचिनुतर्तुभिः संवत्सरं वसन्तेनैवास्य पूर्वार्धमचिनुत ग्रीष्मेण दक्षिणं पक्षं वर्षाभिः पुच्छꣳ शरदोत्तरं पक्षꣳ हेमन्तेन मध्यं[१] ब्रह्मणा वा अस्य तत् पूर्वार्द्धमचिनुत क्षत्रेण दक्षिणं पक्षं पशुभिः पुच्छं विशोत्तरं पक्षमाशया मध्यं[२] य एवं विद्वानेग्निं चिनुत ऋतुभिरेवैनं चिनुतेऽथो एतदेव सर्वमव ॥ १ ॥

रुन्धे शृण्वन्त्येनमग्निं चिक्यानमत्यन्नꣳ रोचते[३] द्रुयं वाव प्रथमा चितिरोषधयो वनस्पतयः पुरीषमन्तरिक्षं द्वितीया वयाꣳसि पुरीषमसौ तृतीया नक्षत्राणि पुरीषं यन्नश्चतुर्थी दक्षिणा पुरीषं यजमानः पञ्चमी प्रजा पुरीषं[४] यन्निचितीकं चिन्वीत यन्नं दक्षिणामात्मानं प्रजामन्तरियात्तस्मात्यञ्चचितीकश्चेतव्य एतदेव सर्वꣳ स्पृणोति[५] यत्तिस्रश्चितयः ॥ २ ॥

चितङ्ग्निर्यद्वै द्विपाद्यजमानः प्रतिष्ठित्यै[६] पञ्च चितयो भवन्ति पाङ्क्तः पुरुष आत्मानमेव स्पृणोति पञ्च चितयो भवन्ति पञ्चभिः पुरोषैरभ्यूहति दश सम्पद्यन्ते दशाक्षरो वै पुरुषो यावानेव पुरुषस्तꣳ स्पृणोत्यथो दशाक्षरा विराडन्नं विराड् विराज्येवान्नाद्ये प्रति तिष्ठति[७] संवत्सरो वै षष्ठी चितिः क्रतवः पुरीषꣳ[८] षट् चितयो भवन्ति षट् पुरीषाणि द्वादश

सम्पद्यन्ते द्वादश मासाः संवत्सरः संवत्सर एव प्रति तिष्ठति[८] ॥ ३ ॥

अव। चितयः। पुरीषं। पञ्चदश च ॥ १० ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके दशमोऽनुवाकः ॥०॥

आमन्त्र्याममुख्यानि नवमे वर्णितानि हि।

अथ दशमे चयनं बहुधा प्रशस्यते। तत्र वसन्ताद्यृतुद्वारा प्रशंसामाह,—"प्रजापतिः अग्निम् अचिनुत ऋतुभिः संवत्सरं वसन्तेनैव अस्य पूर्वार्धम् अचिनुत गायत्रेण दक्षिणं पक्षं वर्षाभिः पुच्छं शरदा उत्तरं पक्षं हेमन्तेन मध्यम्[१]" इति। अत्र संवत्सरो दृष्टान्तः। ऋतुभिर्यथा संवत्सरो निष्पाद्यते, तथा 'अग्निम्' अपि 'ऋतुभिः' 'प्रजापतिः' 'अचिनुत'। ऋतुमयोऽयं यज्ञः इति सङ्कल्प एव चयनं, तत्र वसन्तः शिरोभागः। एवं दक्षिणपक्षादयो योज्याः।

अथ ब्राह्मणादिरूपत्वं सङ्कल्पेन प्रशंसति,—"ब्रह्मणा वै अस्य तत् पूर्वार्धम् अचिनुत क्षत्रेण दक्षिणं पक्षं पशुभिः पुच्छं विशा उत्तरं पक्षम् आशया मध्यम्[२]" इति। आशा मानसी तृष्णादिः।

अथ वेदनं प्रशंसति,—"य एवं विद्वान् अग्निं चिनुते ऋतुभिः एव एनं चिनुते अथो एतत् एव सर्वम् अव रुन्धे गुप्त्यै एनम् अग्निं चिक्यानम् अत्ति अन्नं रोचते[३]" इति। 'यः' यजमानः 'एवं' वसन्ताद्यात्मकत्वं ब्राह्मणाद्यात्मकत्वं च 'विद्वान्' तथैव सर्वदा

भावयन् 'अग्निं' 'चिनुते', यः प्रजापतिवत् 'ऋतुभिः' ब्राह्मणादिभिश्च चितवान् भवति। अपि च 'एतत्' ऋतूनां ब्राह्मणादीनां च स्वरूपं 'सर्वम्' अधीनं करोति। किञ्च 'अग्निं' चितवन्तम् 'एनं' यजमानं सर्वे जनाः 'शृण्वन्ति', "अग्निचित् कपिला सची" इत्यादिस्तुतिविषयत्वेन सर्वत्र प्रसिद्धो भवतीत्यर्थः। किञ्च 'अन्नं' सस्यादिं खादु च सर्वदा 'अत्ति'। अपि च सर्वेभ्यः 'रोचते' प्रीतिविषयो भवति।

अथ चितिपञ्चकं पुरीषपञ्चकं च भूम्यादिरूपेण प्रशंसति,—"इयं वाव प्रथमा चितिः ओषधयो वनस्पतयः पुरीषम् अन्तरिक्षं द्वितीया वयाꣳसि पुरीषम् असौ तृतीया नक्षत्राणि पुरीषं यज्ञः चतुर्थी दक्षिणा पुरीषं यजमानः पञ्चमी प्रजा पुरीषम्[७]" इति। या 'इयं' 'प्रथमा चितिः', सा भूमिरेव। यच्च तस्या उपरि प्रसारितं 'पुरीषं', तत् ओषधि-वनस्पतिस्वरूपम्। एवमुत्तरत्रापि द्रष्टव्यम्।

अथ शाखान्तरगतं चितित्रयपक्षं निराकृत्य स्वकीयं चितिपञ्चकपक्षं स्थापयति,—"यत् चिचितीकं चिन्वीत यज्ञं दक्षिणाम् आत्मानं प्रजाम् अन्नः दृयात् तस्मात् पञ्चचितीकः चेतव्यः एतदेव सर्वꣳ स्पृणोति[८]" इति। चतुर्थचिति-तत्पुरीषयोर्यज्ञ-दक्षिणारूपत्वमुक्तम्, पञ्चमचिति-तत्पुरीषयोर्यजमान-प्रजारूपत्वम्। एवं सति चिचितिपक्षे यज्ञादीनाम् अन्तरायः स्यात्। 'तस्मात्' पञ्चचितियुक्त एव अग्निः 'चेतव्यः'। तथा सति 'एतत्' भूम्यादिकं 'सर्वम्' अपि प्रीणयत्येव।

आद्यं चितित्रयम् उत्तरद्वयस्य विभज्य प्रशंसति,—"यत् तिस्रः चितयः चिनुत हि अग्निः यद् द्वे द्विपाद् यजमानः प्रतिष्ठित्यै[६]" इति। या एता आद्याः 'तिस्रः' 'चितयः', ताभिः अग्नेस्त्रैगुण्यं सम्पादितं भवति। त्रैगुण्यञ्च प्राजापत्यादिभिरिष्टकाभिः पूर्वमुक्तम्। ये च उत्तरे 'द्वे' चिती, ताभ्यां 'द्विपाद् यजमानः' प्रतिष्ठितो भवति।

अथ समूहरूपेण प्रशंसति,—"पञ्च चितयो भवन्ति पाङ्क्तः पुरुषः आत्मानम् एव स्पृणोति पञ्च चितयो भवन्ति पञ्चभिः पुरीषैः अभ्यूहति दश सम्पद्यन्ते दशाक्षरो वै पुरुषः यावान् एव पुरुषः तं स्पृणोति अथो दशाक्षरा विराट् अन्नं विराड् विराजि एव अन्नाद्ये प्रति तिष्ठति[७]" इति। पुरुषस्य दशाक्षरत्वं छिद्राभिप्रायेण द्रष्टव्यम्। यानि शिरसि सप्त छिद्राणि, ये च अधो द्वे छिद्रे, या च नाभिः, तानि सर्वाणि यावज्जीवम् अविनाशात् अक्षराणीत्युच्यन्ते। एतदेवाभिप्रेत्य तत्र तत्र आम्नायते,—"सप्त वै शीर्षण्याः प्राणा द्वावधस्तौ। नव वै पुरुषे प्राणा नाभिर्दशमी" इति। अतो दशसङ्ख्यया पुरुषं साकल्येन प्रीणयति। किं च विराड्द्वारा अन्नं 'प्रति'-'तिष्ठति'।

अथ षष्ठचितिं तत्पुरीषञ्च प्रशंसति,—"संवत्सरो वै षष्ठी चितिः ऋतवः पुरीषम्[८]" इति। अत्र सर्वत्र प्रशंसारूपत्वात् संवत्सरादि-रूपतायां न विप्रेतव्यम्।

अथ सर्वं मिलित्वा(?) प्रशंसति,—"षट् चितयो भवन्ति षट् पुरीषाणि द्वादश सम्पद्यन्ते द्वादश मासाः संवत्सरः संवत्सरे एव प्रति तिष्ठति[९]" इति। तदेतद् ब्राह्मणं सर्वान्ते द्रष्टव्यम्।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके दशमोऽनुवाकः ॥ ० ॥

रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते प्राजापत्या बभ्रुरुणबभ्रुः शुकबभ्रुस्ते रौद्राः श्येतः श्येताक्षः श्येतग्रीवस्ते पितृदेवत्यास्तिस्रः कृष्णा वृशा वारुण्यस्तिस्रः श्वेता वृशाः सौर्यो मैत्राबार्हस्पत्या धूम्रललामास्तूपराः ॥ ११ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके एकादशोऽनुवाकः ॥ ० ॥

चयनस्य प्रशंसात्र दशमे बहुधेरिता ।
अथाष्टादशिनामानः पशवो ह्यश्वमेधिकाः ॥

अष्टादशमन्त्राकानां पशूनाम् एकैकः मन्त्रातः। तत्र अस्मिन् एकादशे अनुवाके प्रथमं मन्त्रमाह,—"रोहितो धूम्ररोहितः कर्कन्धुरोहितः ते प्राजापत्याः बभ्रुः अरुणबभ्रुः शुकबभ्रुः ते रौद्राः श्येतः श्येताक्षः श्येतग्रीवः ते पितृदेवत्याः तिस्रः कृष्णाः वृशाः वारुण्यः तिस्रः श्वेताः वृशाः सौर्यः मैत्राबार्हस्पत्याः धूम्रललामाः तूपराः[1]" इति। पूर्वप्रपाठके "इन्द्राय राज्ञे सुकरः"(५।५।११) इत्यादौ जातिभेदा उक्ताः, इह तु वर्णभेदा उच्यन्ते। 'रोहितः' लोहितवर्णः' 'धूम्ररोहितः' अल्पलोहितः। 'कर्कन्धुरोहितः' सौवीर-

वर्णः। 'ते' एते त्रयः 'प्राजापत्याः' प्रजापतिदेवताकाः। एवमुत्तरत्रापि एकैकस्य देवस्य त्रयस्त्रयो विज्ञेयाः। 'बभ्रुः' पाण्डुरकपिलः। 'अरुणबभ्रुः' रक्तकपिलः। 'शुकबभ्रुः' हरितशुकसमानवर्णः। 'श्वेतः' श्वेतकवर्णः, शुक्लरक्त इत्येके। 'श्वेताक्षः' रक्तदृष्टिः। 'श्वेतग्रीवः' प्रसिद्धः। 'त्रिवत्सः' इत्यादिकं स्पष्टम्। 'धूम्रललामाः' धूम्रवर्णपुण्ड्राः। 'तूपराः' पुच्छहीनाः।

इति मायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्संहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके एकादशोऽनुवाकः ॥०॥

पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गू लोहितोर्णा बलक्षी ताः सारस्वत्यः पृषती स्थूलपृषती क्षुद्रपृषती ता वैश्वदेव्यस्तिस्रः श्यामा वशाः पौष्णियस्तिस्रो रोहिणीर्वशा मैत्रियं ऐन्द्राबार्हस्पत्या अरुणललामास्तूपराः ॥ १ ॥

रोहितः पृश्निः षड्विंशतिः षड्विंशतिः ॥ १२ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके द्वादशोऽनुवाकः ॥ ० ॥

अथ द्वितीयं मन्त्रमाह, -

"पृश्निः तिरश्चीनपृश्निः ऊर्ध्वपृश्निः ते मारुताः फल्गूः लोहितोर्णा बलक्षी ताः सारस्वत्यः पृषती स्थूलपृषती क्षुद्रपृषती ताः वैश्वदेव्यः

तिस्रः श्यामाः वशाः पौष्णियः तिस्रो रोहिणीः वशाः मैत्रियः ऐन्द्राबार्हस्पत्याः अरुणलोमाः तूपराः" इति। 'पृश्निः' शुक्लबिन्दुचितश्चित्रवर्णः। तिर्यक्प्रवृत्तपृश्निवर्णः*। एतेन 'ऊर्द्धपृश्निः' व्याख्यातः। 'फल्गूः' लवणवर्णः। 'लोहितोर्णी' लोहितलोमा। 'बलत्री' शुक्लावयवा। 'पृषती' शुक्लबिन्दुभिश्चिता। 'स्थूलपृषती' स्थूलशुक्लबिन्दुभिश्चिता। 'क्षुद्रपृषती' सूक्ष्मशुक्लबिन्दुभिरुपेता। 'श्यामाः' श्यामवर्णाः। 'रोहिणीः' रोहितवर्णाः। 'अरुणलोमाः' मन्ध्यावर्णपुच्छाः।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये षष्ठप्रपाठके द्वादशोऽनुवाकः ॥०॥

शितिबाहुरन्यतःशितिबाहुः समन्तशितिबाहुस्त ऐन्द्रवायवाः शितिरन्ध्रोऽन्यतःशितिरन्ध्रः समन्तशितिरन्ध्रस्ते मैत्रावरुणाः शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनास्तिस्रः शिल्पा वशा वैश्वदेव्यस्तिस्रः श्येनीः परमेष्ठिने सोमापौष्णाः श्यामलोमा मन्तूपराः ॥ १३ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके त्रयोदशोऽनुवाकः ॥०॥

---

* एवमेव सर्वत्र पाठः। 'तिरश्चीनपृश्निः' तिर्यक्प्रवृत्तपृश्निवर्णः—इत्येवं पाठो भवितुं युक्तः।

तृतीयं यज्ञमाह,—

"श्रितिबाङ्: अन्यत:श्रितिबाङ्: सर्वतश्रितिबाङ्: ते ऐन्द्रावरुणा: श्रितिरन्ध्र: अन्यत:श्रितिरन्ध्र: सर्वतश्रितिरन्ध्र: ते मैत्रावरुणा: शुद्धवाल: सर्वशुद्धवाल: मणिवाल: ते आश्विना: तिस्र: श्रिण्या: वशा: वैश्वदेव्य: तिस्र: श्येनी: परमेष्ठिने सोमापौष्णा: श्यामशबलामात्मपरा:" इति। श्रिति: शुक्लो बाह्वैकदेशो यस्य असौ 'श्रितिबाङ्:'। 'अन्यत:श्रितिबाङ्:' यत् प्रथमस्य श्रितित्वं, ततोऽन्यचैकदेशे श्रितित्वं यस्य स: अन्यत:श्रिति:, तादृशो बाहुर्यस्य स तथोक्त:। 'सर्वतश्रितिबाङ्:' सर्वशुक्लबाङ्:। 'श्रितिरन्ध्र:' शुक्लच्छिद्र:। अन्यत:श्रितिरन्ध्र-सर्वतश्रितिरन्ध्रौ च पूर्ववत्। 'शुद्धवाल:' शुक्लपुच्छावयव:। 'सर्वशुद्धवाल:' शुक्लसर्वपुच्छ:। 'मणिवाल:' शुक्लाशुक्लचितवाल:। 'श्रिण्या:' नानावर्णा:। श्येन्य: शुक्लवर्णा:। 'श्यामशबलामा:' श्यामवर्णपुच्छा:।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्संहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके चतुर्दशोऽनुवाक: ॥ ० ॥

उन्नत ऋषभो वामनस्त ऐन्द्रावरुणाः श्रितिककुच्छितिपृष्ठः श्रितिभसत्त ऐन्द्रा बार्हस्पत्याः श्रितिपाच्छित्योष्ठः श्रितिभ्रुस्त ऐन्द्रावैष्णवास्तिस्रः सिध्मा वशा वैश्वकर्मण्यस्तिस्रो धाये पृषोदरा ऐन्द्रापौष्णाः

श्वेतललामास्तूपराः। १।२। शितिबाहुरुन्नतः पञ्च-विंशतिः पञ्चविंशतिः ॥ १४ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके चतुर्दशोऽनुवाकः ॥ ० ॥

अथ चतुर्थं मन्त्रमाह,—

"उन्नतः ऋषभो वामनः ते ऐन्द्रावरुणाः शितिककुत् शितिपृष्ठः शितिभसत् ते ऐन्द्राबार्हस्पत्याः शितिपात् शित्योष्ठः शितिभ्रुः ते ऐन्द्रावैष्णवाः तिस्रः सिध्माः वशाः वैश्वकर्मण्यः तिस्रो धात्रे पृषोदराः ऐन्द्रापौष्णाः श्वेतललामास्तूपराः" इति। 'उन्नतः' उन्नतपृष्ठः 'ऋषभः' युवा। 'वामनः' ह्रस्वाङ्गः। शितिः शुक्लः ककुत् यस्य स तथोक्तः। 'शितिपृष्ठः' श्वेतपृष्ठः। 'शितिभसत्' शुक्लजघनः। 'शितिपात्' स्पष्टम्। 'शित्योष्ठः' श्वेतोष्ठः। 'शितिभ्रुः' श्वेतभ्रुः। 'सिध्माः' सिध्मलाङ्गाः, पादे शिताः श्वेत्याङ्कितदेहाः। 'पृषोदराः' पृषन्ति उदरे यासां ताः पृषोदराः। 'श्वेतललामाः' स्पष्टाः।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके चतुर्दशोऽनुवाकः ॥ ० ॥

कर्णास्त्रयो यामाः सौम्यास्त्रयः श्वितिङ्गा अग्नये यविष्ठाय त्रयो नकुलास्तिस्रो रोहिणीस्त्र्यव्यस्ता वस्तूनां तिस्रोऽरुणा दित्यौह्यस्ता रुद्राणाꣳ सोमैन्द्रा बभ्रुललामास्तूपराः। १। कर्णाः त्रयो विꣳशतिः॥ १५॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके पञ्चदशोऽनुवाकः॥ ०॥

पञ्चमं षष्ठमाह,—

"कर्णाः त्रयो यामाः सौम्याः त्रयः श्वितिङ्गाः अग्नये यविष्ठाय त्रयो नकुलाः तिस्रः रोहिणीः त्र्यव्यः वस्तूनां तिस्रः अरुणाः दित्यौह्यः ताः रुद्राणाꣳ सोमैन्द्राः बभ्रुललामाः तूपराः" इति। 'कर्णाः' छिन्नकर्णाः। 'यामाः' यमदेवत्याः। 'श्वितिङ्गाः' श्वेतपादाः। 'यविष्ठाय' युवतमाय। 'नकुलाः' नकुलवर्णाः। 'त्र्यव्यः' माङ्कुवर्णाः। 'रोहिणीः' लोहितवर्णाः। 'दित्यौह्यः' द्विवर्षाः। 'अरुणाः' अरुणवर्णाः। 'बभ्रुललामाः' पिङ्गलपुच्छाः।

इति मायुनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके पञ्चदशोऽनुवाकः॥ ०॥

प्रष्ठास्त्रयो वैष्णवा अधीलोधकर्णास्त्रयो विष्णव उरुक्रमाय लघुदिनस्त्रयो विष्णव उरुगायाय पञ्चावी-

तिस्र आदित्यानां चिवत्सास्तिस्रोऽङ्गिरसामैन्द्रावैष्णवा गौरसलामास्तूपराः। १।

गुण्ठाः विश्वेभ्यः॥ १६॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके षोडशोऽनुवाकः॥ ०॥

षष्ठं षड्वमाह,—

"गुण्ठाः त्रयो वैष्णवाः अधोलोधकर्णाः त्रयो विष्णवे उरुक्रमाय लम्बुदिनः त्रयो विष्णवे उरुगायाय पञ्चावाः तिस्रः आदित्यानां चिवत्साः तिस्रः अङ्गिरसाम् ऐन्द्रावैष्णवाः गौरसलामाः तूपराः" इति। 'गुण्ठाः' अवेष्टितकर्णाः, अल्पकायाः इत्येके। 'अधोलोधकर्णाः' कर्णोपरिप्रच्छदकर्णाः। 'उरुक्रमाय' विस्तीर्णपादाय। 'लम्बुदिनः' लम्बमानपुच्छाः। 'उरुगायाय' उरुभिर्महर्षिभिर्गीतत्वाय। पञ्चाव्याः अर्धतृतीयवर्षाः चिवत्सराः। 'गौरसलामाः' स्पष्टाः।

इति मायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके षोडशोऽनुवाकः॥ ०॥

इन्द्राय राज्ञे त्रयः शितिपृष्ठा इन्द्रायाधिराजाय त्रयः शितिकक्षदा इन्द्राय स्वराज्ञे त्रयः शितिभसदस्तिस्रस्तुर्याणाः साध्यानान्तिस्रः पञ्चौदना विश्वेषां देवाना-

माग्नेन्द्राः कृष्णललामास्तूपराः। १। इन्द्राय त्वा विष्टुतिः ॥ १७ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके सप्तदशोऽनुवाकः ॥ ० ॥

सप्तमं मन्त्रमाह,—

"इन्द्राय राज्ञे चयः शितिपृष्ठाः इन्द्राय अधिराजाय चयः शितिककुदः इन्द्राय स्वराज्ञे चयः शितिभसदः तिस्रः तुर्यौह्याः माध्यानाम् तिस्रः पञ्चयौह्याः विश्वेषां देवानाम् आग्नेन्द्राः कृष्णललामाः तूपराः" इति। शितिपृष्ठशितिककुच्छितिभसच्छब्दा व्याख्याताः। 'तुर्यौह्याः' सार्धचतुर्वर्षाः। 'माध्यानां' देवविशेषाणाम्। 'पञ्चयौह्याः' चतुर्वर्षाः।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके सप्तदशोऽनुवाकः ॥ ० ॥

अदित्यै चयो रोहितैता इन्द्राण्यै चयः कृष्णैताः कृष्णै चयो ऽरुणैतास्तिस्रो धेनवो राकायै चयो ऽनड्वाहः सिनीवाल्या आग्नावैष्णवा रोहितललामास्तूपराः। १। अदित्यै अष्टादश ॥ १८ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके अष्टादशोऽनुवाकः ॥ ० ॥

अष्टमं मन्त्रमाह,—

"अदित्यै चयः रोहितेताः इन्द्राग्न्यै चयः कृष्णेताः कुक्कै चयः अरुणेताः तिस्रो धेनवः राकायै चयः अनड्वाहः सिनीवाल्यै आग्नावैष्णवाः रोहितलला[1]माः तूपराः" इति। 'एताः' हरिताः हरितवर्णाः; ते च रोहितेन अत्यन्तरक्तेन युक्ताः 'रोहितेताः'। कृष्णेन युक्ताः 'कृष्णेताः'। ईषद्रक्तेन युक्ताः 'अरुणेताः'। धेन्वादयः प्रसिद्धाः*।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके अष्टादशोऽनुवाकः॥ ०॥

सौम्यास्चयः पिशङ्गाः सोमाय राज्ञे चयः सारङ्गाः पार्जन्या नभोरूपास्तिस्रोऽजा मल्हा इन्द्राग्न्यै तिस्रो मेष्य आदित्या द्यावापृथिव्या मालङ्गास्तूपराः। १। सौम्याः एकान्नविंशतिः॥ १९॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके ऊनविंशोऽनुवाकः॥ ०॥

नवमं मन्त्रमाह,—

"सौम्यास्चयः पिशङ्गाः सोमाय राज्ञे चयः सारङ्गाः पार्जन्याः

* अत्र 'ते च' इत्यत्र 'स च' इति, एवं 'कृष्णेन युक्ताः' इत्यत्र 'कृष्णान युक्ताः' इति सर्वत्र पाठः प्रामादिक इव प्रतिभाति।

नभोरूपाः तिस्रः अजाः मरुद्भ्यः दुग्धाय तिस्रो मेष्यः आदित्याः द्यावापृथिव्याः मालक्ष्याः तूपराः" इति। 'पिङ्गलाः' गोरोचनवर्णाः। 'सारङ्गाः' सारङ्गवर्णाः। 'पार्जन्याः' पर्जन्यदेवत्याः। 'नभोरूपाः' अभ्रवर्णाः। 'मरुद्भ्यः' गणस्थाः। 'मालक्ष्याः' महाकायाः।

इति मध्यनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके ऊनविंशोऽनुवाकः॥ ० ॥

वारुणास्त्रयः कृष्णललामा वरुणाय राज्ञे त्रयो रोहितललामा वरुणाय रिशादसे त्रयोऽरुणललामाः शिल्पास्त्रयो वैश्वदेवास्त्रयः पृश्नयः सर्वदेवत्या ऐन्द्रासूराः श्येतललामास्तूपराः। १। वारुणा विंशतिः॥ २०॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके विंशोऽनुवाकः॥ ० ॥

दशमं मन्त्रमाह,—

"वारुणास्त्रयः कृष्णललामाः वरुणाय राज्ञे त्रयो रोहितललामाः वरुणाय रिशादसे त्रयः अरुणललामाः शिल्पाः त्रयः वैश्वदेवाः त्रयः पृश्नयः सर्वदेवत्याः ऐन्द्रासूराः श्येतललामाः तूपराः" इति। रिशानां लोकहिंसकानां नाशयित्रे।

इति मायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके विंशोऽनुवाकः॥ ० ॥

सोमाय स्वराज्ञेऽनोवाहावनड्वाहाविन्द्राग्निभ्यामोजोदाभ्यामुष्टाराविन्द्राग्निभ्यां बलदाभ्यां सौरवाहावव्वी द्वे धेनू भौमी दिग्भ्यो वडबे द्वे धेनू भौमी वैराजी पुरुषी द्वे धेनू भौमी वायव आरोहणवाहावनड्वाहौ वारुणी कृष्णे वशे अराज्यौ दिव्यावृषभौ परिमरौ। १। सोमाय चतुस्त्रिꣳशत्॥ २१॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके एकविंशोऽनुवाकः॥ ०॥

एवमेतैर्दशभिरनुवाकैः अष्टादशिनः पशवः आम्नाताः। अथैकेनानुवाकेन द्वन्द्विनः पशूनाह,—

"सोमाय स्वराज्ञे अनोवाहौ अनड्वाहौ इन्द्राग्निभ्याम् ओजोदाभ्याम् उष्टारौ इन्द्राग्निभ्यां बलदाभ्याꣳ सौरवाहौ अव्वी द्वे धेनू भौमी दिग्भ्यो वडबे द्वे धेनू भौमी वैराजी पुरुषी द्वे धेनू भौमी वायवे आरोहणवाहौ अनड्वाहौ वारुणी कृष्णे वशे अराज्यौ दिव्यौ ऋषभौ परिमरौ" इति। 'अनोवाहौ' शकटवहनसमर्थौ। 'अनड्वाहौ' बलीवर्दौ। 'ओजोदाभ्याम्' अष्टमधातुप्रदाभ्यां*। 'उष्टारौ' शकटवाहिनोः महकारित्वेन पुरोगामियुगधोढारौ। 'सौरवाहौ' लाङ्गलवाहिनौ। 'अवी' अविषदृशौ दुग्धौ अनड्वाहौ इत्यर्थः। भूमेर्धेनुद्वयम्। दिशां वड़वाद्वयम्। पुन-

* 'पदातारौ' इति सर्वत्र पाठः।

र्भूभेर्धेनुद्वयम्। विराट्-देवतायाः 'पुरुषौ' मनुष्यस्त्रियौ। पुनर्भूमेर्धेनुद्वयम्। 'आरोहणवाहौ' मनुष्यारोहणार्थं निर्मितं शकटं वहन्तौ बलीवर्दौ। पूर्वन्तु धान्यादिवाहिकशकटार्थावुक्षौ; अत्र तु रजकुमारादिविनोदार्थं शकटवाहिनावित्यर्थः। वरुणस्य तु लक्ष्मामृगजातीये स्त्रियौ बन्ध्ये। द्युदेवतायास्तु 'अराड्यौ' उच्छ्रितशृङ्गौ; 'ऋषभौ' सेचकौ; 'परिमरौ' उभयतो मरणयुक्तौ, यस्य पशोः अग्रजोऽपि मृतः अनुजोऽपि मृतः तादृशौ।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके एकविंशोऽनुवाकः ॥०॥

एकादश प्रातर्गव्याः पशव आ लभ्यन्ते छगलः कल्माषः किकिदीविर्विदीगयस्ते त्वाष्ट्राः सौरीर्नव श्वेता वशा अनूबन्ध्या भवन्त्याग्नेय ऐन्द्राग्न आश्विनस्ते विशालयूप आ लभ्यन्ते ॥ १ ॥

एकादश पञ्चविंशतिः ॥ २२ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके द्वाविंशोऽनुवाकः ॥०॥

अथ उत्तमेऽह्नि तिरात्रेऽनुष्ठेयान् कांश्चित्पशूनाह,—

"एकादश प्रातर्गव्याः पशवः आ लभ्यन्ते छगलः कल्माषः किकिदीविः विदीगयः ते त्वाष्ट्राः सौरीः नव श्वेताः वशाः अनूबन्ध्याः

भवन्ति आग्नेयः ऐन्द्राग्नः आश्विनस्ते विशालयूपे आ-लभ्यन्ते" इति। द्वितीयेऽह्नि प्रातःकाले गोजातीया एकादश पशवः। ते च देवता-विशेषस्य अनुक्तत्वात् प्राजापत्याः। क्रगलादयस्त्रयः 'त्वाष्ट्राः'। 'क्रगलः' छागार्भकः, स च 'कल्माषः' कृष्णवर्णमिश्रः। 'किकिदीविः' तित्तिरिः। 'विदीगयः' कुक्कुटविशेषः। एते च तस्मिन्नेवाहनि आलभ्याः। 'मौरीः' सूर्यदेवताकाः। 'अनूबन्ध्याः' चरमकालीनाः पशवः। ताश्च 'वशाः' बन्ध्याः, 'श्वेताः' श्वेतवर्णाः, नवमङ्क्त्याकाश्च 'भवन्ति'। पुनरपि आग्नेयादयस्त्रयः पशवः आलभ्यन्ते। 'ते' च त्रयो मध्यमे यूपे अतिविस्तृताग्निष्ठाख्ये यूपे 'आ'-'लभ्यन्ते'।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके द्वाविंशोऽनुवाकः ॥ ० ॥

पिशङ्गास्त्रयो वासन्ताः सारङ्गास्त्रयो ग्रैष्माः पृषन्तस्त्रयो वार्षिकाः पृश्नयस्त्रयः शारदाः पृश्नि-सक्थास्त्रयो हैमन्तिका अवलिप्तास्त्रयः शैशिराः संवत्सराय निवक्षसः ॥ १ ॥

पिशङ्गाः विंशतिः ॥ २३ ॥

हिरण्यवर्णाः। अपां ग्रहान्। भूतेष्टकाः। मजूः। संवत्सरमुखं। प्रजापतिः,-स क्षुरपविः। अग्नेव दीक्षया। सुवर्गाय,-नं यत। सूयते। प्रजापतिः,-ऋतुभिः

रोहितः। पृश्निः। शितिबाहुः। उन्नतः। कृष्णाः। शृष्ठाः। इन्द्राय। अदित्यै। सौम्याः। वारुणाः। सोमाय। एकादश। पिशङ्गाः। त्रयोविंशतिः ॥ २३ ॥

हिरण्यवर्णाः (१।१)। भूतेष्टकाः (३।१)। छन्दो यत् (५।२)। कनीयाꣳसम् (८।२)। चित्तद्भिः (१०।३)। वारुणाः (२०।१)। चतुःपञ्चाशत् ॥ ५४ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे षष्ठप्रपाठके त्रयोविंशोऽनुवाकः ॥०॥

इति संहितापञ्चमाष्टके षष्ठप्रपाठकप्रश्नः समाप्तः ॥

॥०॥ हरिः ओम ॥०॥

अथ ऋतुपशूनाह,—

"पिशङ्गास्त्रयो वामन्ताः सारङ्गास्त्रयो ग्रैष्माः पृषन्तस्त्रयो वार्षिकाः पृश्नयस्त्रयः शारदाः पृश्निमक्ष्यास्त्रयो हैमन्तिकाः अवलिप्तास्त्रयः शैशिराः संवत्सराय निवत्सः" इति। 'पिशङ्गाः' गोरोचनवर्णाः। 'सारङ्गाः' मारङ्गवर्णाः। 'पृषन्तः' विजातीयबिन्दुयुक्ताः। 'पृश्नयः' श्वेताः। 'पृश्निमक्ष्याः' कटिभागे श्वेतवर्णाः। 'अवलिप्ताः' सङ्कीर्णवर्णाः। वसन्ताद्यृतवः तेषाम्। संवत्सरदेवतायास्तु 'निवत्सः' निष्क्रान्तेन वत्सेन युक्तः।

अत्रास्य प्रपाठकस्य विनियोगमङ्गीकृत्य,—

कुम्भेष्टकामन्त्रणार्था 'हिरण्य' (१) इति त्रयोदश।

'दिवि' (१।४) इति चरमाद्ध्याद् देवस्य' (३।२) इत्यभिषेचनम्।
'मजूः' (४।१) आकृतयः पञ्च 'घृतेन' (४।१) इत्यनुषज्यते॥
'पृष्टो' (६।४) वैश्वानरो याज्ञे पुरीषं न्यापयेत्तया।
अन्वारोहेचितिं स्वामी 'पृथिवीमाक्रमि'(८।१) इत्यतः॥
'इष्टो यज्ञः' 'तस्य ते' (८।६) द्वे समिष्टयजुषी मते।
'पिता मात' (८।६) इति मन्त्रेण चित्यग्निमनुशंसति॥
अश्वमेधस्य पशवो रोहिताद्या (१२-२३) उदीरिताः॥
वेदार्थस्य प्रकाशेन तमो हार्दं विनाशयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठके त्रयोविंशोऽनुवाकः॥०॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्क-भूपालसाम्राज्यधुरन्धरेण सायनाचार्येण विरचिते माधवीये वेदार्थ-प्रकाशनामकतैत्तिरीययजुःसंहिताभाष्ये पञ्चमकाण्डे षष्ठप्रपाठकः सम्पूर्णः॥०॥

समाप्तश्च षष्ठः प्रपाठकः॥

॥०॥ ॐतत्सत्॥०॥

॥ ० ॥ श्रीगणेशाय नमः ॥ ० ॥

तैत्तिरीयसंहिताभाष्ये ।

पञ्चमकाण्डे सप्तमप्रपाठके

प्रथमोऽनुवाकः ।

हरिः ओम् ॥

यो वा अयथादेवतमग्निं चिनुत आ देवताभ्यो दृश्यते पापीयान् भवति यो यथादेवतं न देवताभ्य आ दृश्यते वसीयान् भवत्याग्नेय्या गायत्र्या प्रथमाञ्चितिमभि मृशेत् त्रिष्टुभा द्वितीयां जगत्या तृतीयामनुष्टुभा चतुर्थीं पङ्क्त्या पञ्चमीं यथादेवतमेवाग्निं चिनुते न देवताभ्य आ दृश्यते वसीयान् भवति दृडायै वा एषा विभक्तिः पशव दृडा पशुभिरेनम् ॥ १ ॥

चिनुते० यो वै प्रजापतये प्रतिप्रोच्याग्निं चिनोति

नार्तिमार्च्छत्यश्वावभितस्तिष्ठेतां कृष्ण उत्तरतः श्वेतो दक्षिणस्तावालभ्येष्टका उप दध्यादेतद्वै प्रजापते रूपं प्राजापत्योऽश्वः साक्षादेव प्रजापतये प्रतिप्रोच्याग्निं चिनोति नार्तिमार्च्छति[३] एतद्वा अहो रूपं यच्छ्वेतोऽश्वो राचियै कृष्ण एतदहः ॥ २ ॥

रूपं यदिष्टका राचियै पुरीषमिष्टका उपधास्यन् श्वेतमश्वमभिमृशेत् पुरीषमुपधास्यन् कृष्णमहोरात्राभ्यामेवैनं चिनुते[४] हिरण्यपात्रं मधोः पूर्णं ददाति मधव्योऽसानीति[५] सौर्या चित्रवत्यावेक्षते चित्रमेव भवति मध्यन्दिनेऽश्वमव घ्रापयत्यसौ वा आदित्य इन्द्र एष प्रजापतिः प्राजापत्योऽश्वस्तमेव साक्षात् करोति[६] ॥ ३ ॥

एनम् । एतदहः । अष्टाचत्वारिꣳशच्च ॥ १ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके प्रथमोऽनुवाकः ॥०॥

श्रीगणेशाय नमः ।

हरिः ओम् ।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
उपानुवाक्यं यत्प्रोक्तं द्वयोः पञ्चमषष्ठयोः ।
ततोऽवशिष्टं तत्सर्वं सप्तमेऽत्राभिधीयते ॥

तत्रादौ तावत् मन्त्रविशेषैश्चितीनामभिमर्शनं विधत्ते,—"यो वै अयथादेवतम् अग्निं चिनुते आ देवताभ्यो वृश्चते पापीयान् भवति यो यथादेवतं न देवताभ्यः आ वृश्चते वसीयान् भवति आग्नेय्या गायत्र्या प्रथमां चितिम् अभि मृशेत् त्रिष्टुभा द्वितीयां जगत्या तृतीयाम् अनुष्टुभा चतुर्थीं पङ्क्त्या पञ्चमीं यथादेवतमेवाग्निं चिनुते न देवताभ्यः आ वृश्चते वसीयान् भवति" इति। यस्याग्नेर्या देवता, तामतिक्रम्य चयनम् 'अयथादेवतं'; अनतिक्रमणं यथादेवतं। अतो यथादेवतम् अनुष्ठानाय आग्नेयगायत्र्यादिभिर्मन्त्रैः तां 'चितिम्' 'अभि'-'मृशेत्'। "अग्ने देवाँ इहावह" (ब्रा०३।११।६।२) इत्याग्नेयी गायत्री। "अगन्म महा मनसा यविष्ठम्" (ब्रा०३।११।६।३) इति त्रिष्टुप्। "मंधाकारम्" (ब्रा०३।११।६।३) इति जगती। "मनुष्वत्त्वानि धीमहि"(ब्रा०३।११।६।३) इति अनुष्टुप्। "अग्निर्हि वाजिनम्"(ब्रा०३।११।६।४) इति पङ्क्तिः। ता एताः नाचिकेत-चयनप्रकरणे "यत्ते चितम्" (ब्रा०३।११।६।१) इत्यनुवाके मया-

व्याख्यमानत्वात् तत्रैव व्याख्यास्यन्ते। एवमभिमर्शने सति न उक्तदोषः कश्चिदप्यस्ति।

एकैकचितिस्पर्शने योऽयं मन्त्रविभागः, तमिमं प्रशंसति,—

"दडाये वै एषा विभक्तिः पशवः दडा पशुभिः एनं चिनुते[२]" इति। 'विभक्तिः' गायत्र्यादिमन्त्रविभागः, स च अत्र दडार्थं क्रियते। 'दडा' हि नाम 'पशवः', "पशवो वा दडा" इति श्रुत्यन्तरात्। गायत्र्यादिच्छन्दांसि च पशुस्वरूपाणि "पशवो वै छन्दांसि" इति श्रुत्यन्तरात्। अतो गायत्र्यादिरूपैः 'पशुभिः' 'एनम्' अग्निं चितवान् भवति। एतच्च ब्राह्मणं "पशुर्वा एष यदग्निः"(५।२।१०।१) इत्यनुवाके प्रथमचित्यवमाने द्रष्टव्यम्।

अथोपधाने अश्वस्पर्शनं विधत्ते,—"यो वै प्रजापतये प्रतिप्रोच्य अग्निं चिनोति न आर्तिमार्च्छति अश्वौ अभितः तिष्ठेतां कृष्णः उत्तरतः श्वेतो दक्षिणः तौ आलभ्य दृष्टकाः उप दध्यात् एतत् वै प्रजापतेः रूपं प्राजापत्यः अश्वः मात्रादेव प्रजापतये प्रतिप्रोच्य अग्निं चिनोति नार्तिमार्च्छति[३]" इति। प्रजापतिः, अग्निं प्रति स्रष्टृत्वात् प्रथमं चेतृत्वाच्च अग्नेः स्वामी; अतस्तस्मै कथयित्वा तदनुज्ञया चयने कृते सति न विनाशं प्राप्नोति, अतः कथनीयं। पार्श्वयोर्द्वौ अश्वौ अवस्थाप्य तौ स्पृष्ट्वा पश्चात् 'उप'-'दध्यात्'। 'एतत्' अश्वाख्यं शरीरं 'प्रजापतेः' स्वरूपं, प्रजापत्यचिजन्यत्वेन तस्य प्राजापत्यत्वात्। अतः अश्वस्य स्पर्शनमेव प्रजापतये कथनं। तेनासौ न विनश्यति।

तच्च स्वर्गाग्नेः विषयव्यवस्थां विधत्ते,—"एतद्वै अक्ष्णो रूपं यत् श्वेतः अश्वः रात्रियै कृष्णः एतत् अक्ष्णो रूपं यत् इष्टकाः रात्रियै पुरीषम् इष्टकाः उपधास्यन् श्वेतम् अश्वम् अभि मृशेत् पुरीषम् उपधास्यन् कृष्णम् अहोरात्राभ्याम् एव एनं चिनुते[४]" इति। 'श्वेतः' 'अश्वः' 'इष्टकाः' च इत्युभयम् 'अक्ष्णो रूपम्'। अतः 'इष्टकाः' 'उपधास्यन्' 'श्वेतम्' 'अभि-मृशेत्'। 'कृष्णः' 'अश्वः' 'पुरीषं' चेत्युभयं रात्रेः स्वरूपम्। तत्स्वरूपे वर्णसाम्यं हेतुः। यदा 'पुरीषम्' उपधास्यति, तदा 'कृष्णम्' अभिमृशेत्। एवं सति 'अहोरात्राभ्यामेव' 'एनम्' अग्निं चितवान् भवति। एतच्च ब्राह्मणम् "अग्ने तव श्रवो वयः (५।२।६।२)" इत्यनुवाके द्रष्टव्यम्।

यदुक्तं सूत्रकारेण 'दक्षिणाकाले हिरण्यपात्रं मधोः पूर्णं ऋतमानस्य ऋतं चित्रं देवानामित्यवेक्ष्याग्नेनावघ्राप्य ब्रह्मणे ददाति' इति।

तच्च दानं विधत्ते,—"हिरण्यपात्रं मधोः पूर्णं ददाति मधव्यः अमानि[५]" इति। परलोके मधुभोग्यद्रव्ययुक्तो भविष्यामीत्यभिप्रेत्य मधुना 'पूर्णं' सुवर्णपात्रं दद्यात्।

दात्रा च दानात् पूर्वकालीनमवेक्षणं विधत्ते,—"मौर्या चित्रवत्या अवेक्षते चित्रमेव भवति मध्यन्दिने[६]" इति। मध्याह्नस्य दक्षिणाकालत्वात् तदानीं दातुम् आदौ मधुपूर्णं पात्रं मन्त्रेण 'अवेक्षते'। "चित्रं देवानाम् (१।४।१४।४)" इत्येषा मौरी चित्रशब्दयुक्ता च; तया अवेक्षणे सति 'चित्रमेव' ऐश्वर्यं प्राप्नोति।

अवेक्षणादूर्ध्वं घ्रापणं विधत्ते,—"अश्वमेव घ्रापयति असौ वै आदित्यः इन्द्रः एषः प्रजापतिः प्राजापत्यः अश्वः तमेव साक्षात्

क्षुध्नोति[७]" इति। योऽयं चित्रवत्या प्रतिपाद्यः 'आदित्यः', स एव परमैश्वर्योपेतत्वात् 'इन्द्रः'; प्रजानां परिपालकत्वात् 'प्रजापतिः'। अवघ्रातार्थः 'प्राजापत्यः'। अतः अश्वावघ्राणेन तं प्रजापतिम् इन्द्रम् आदित्यमेव 'भाक्तात्' सम्बन्धं करोति। तदिदं ब्राह्मणम् अत्रे द्रष्टव्यम् ॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके प्रथमोऽनुवाकः ॥०॥

त्वामग्ने वृषभं चेकितानं पुनर्युवानं जनयन्नुपागां। अस्थूरि णो गार्हपत्यानि सन्तु तिग्मेन नो ब्रह्मणा सꣳ शिशाधि[१]। पशवो वा एते यदिष्टकास्त्यांचित्यामृषभमुप दधाति मिथुनमेवास्य तद्यज्ञे करोति प्रजननाय तस्माद्यूथेयूथ ऋषभः[२]। संवत्सरस्य प्रतिमां यां त्वा रात्र्युपासते। प्रजाꣳ सुवीरां कृत्वा विश्वमायुर्व्यश्नवत्[३]। प्राजापत्यां ॥ १ ॥

एतामुप दधातीयं वावैषैकाष्टका यदेवैकाष्टकायामन्नं क्रियते तदेवैतयावरुन्ध एषा वै प्रजापतेः कामदुघा तयैव यजमानोमुष्मिं लोकमिन्दुहे[४] येन देवा ज्योतिषोर्ध्वा उदायन् येनादित्या वसवो येन रुद्राः। येनाङ्गिरसो महिमानमानशुस्तेनैतु यजमानः स्वस्ति[५]। सुवर्गाय वा एष लोकाय ॥ २ ॥

धीयते यद्ग्नियेन देवा ज्योतिषोर्ध्वा उदायन्नित्युखꣳ समिन्ध इष्टका एवैता उप धत्ते वानस्पत्याः सुवर्गस्य लोकस्य समष्ट्यै[९] शतायुधाय शतवीर्याय शतोतयेभिमातिषाहे। शतं यो नः शरदो अजीतान्निन्द्रो नेषदति दुरितानि विश्वा[१०]। ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति। तेषां यो अज्यानिमजीतिमावहात्तस्मै नो देवाः ॥ ३ ॥

परिदत्तेह सर्वे[८]। ग्रीष्मो हेमन्त उत नो वसन्तः शरद्वर्षाः सुवितन्नो अस्तु। तेषामृतूनाꣳ शतशारदानां निवात एषामभये स्याम[९]। इदावत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः। तेषां वयꣳ सुमतौ यज्ञियानां ज्यागजीता अहतः स्याम[१०]। भद्रान्नः श्रेयः समनैष्ट देवास्त्वया वसेन ममशीमहि त्वा। स नो मयोभूः पितो ॥ ४ ॥

आ विशस्व शन्तोकाय तनुवे स्योनः[११]। अज्यानीरेता उप दधात्येता वै देवता अपराजितास्ता एव प्रविशति नैव जीयते[१०] ब्रह्मवादिनो वदन्ति यदर्धमासा मासा ऋतवः संवत्सर ओषधीः पच्यत्यथ कस्मादन्याभ्यो देवताभ्य आग्रयणं निरुप्यत इत्येता हि तद्देवता उदजयन् यद्वृतुभ्यो निर्वपेद्देवताभ्यः समदन्दध्यादाग्र-

यृणं, निरुप्यैता आहुतीर्जुहोत्यर्धमासानेव मासानृतून्त् संवत्सरं प्रीणाति न देवताभ्यः समदन्दधाति[१२] भद्रान्नः श्रेयः समनैष्ट देवा इत्याह हुताद्याय यजमानस्यापराभावाय[१३] ॥ ५ ॥

प्राजापत्यां । लोकाय । देवाः । पितो । दध्यादाग्नयणं । पञ्चविꣳशतिश्च ॥ २ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके द्वितीयोऽनुवाकः ॥०॥

चितिस्थगादिकत्वाद्येऽनुवाकेऽत्र समीरितम् ।

अथ द्वितीये ऋषभेष्टकादिकमभिधीयते । यदुक्तं सूत्रकारेण,—'त्वामग्ने वृषभमित्यृषभमुपधाय' इति । तदिदं विधातुं मन्त्रमुत्पादयति,—"त्वामग्ने वृषभं चेकितानं पुनर्युवानं जनयन् उपागां अस्थूरि णो गार्हपत्यानि मन्तु तिग्मेन नो ब्रह्मणा सꣳ शिशाधि[१] इति। हे 'अग्ने', 'वृषभं' कामानां वर्षितारं, 'चेकितानं' सर्वज्ञं, 'युवानं' नित्यतरुणं 'त्वां' 'जनयन्' प्रजोत्पादकं कुर्वन् अहं 'पुनः' 'उपागां' भूयोभूयः प्राप्नोति*। 'नः' अस्माकं 'गार्हपत्यानि' गृहपतिकर्माणि 'अस्थूरि' 'मन्तु'। स्थूरशब्दः सारवाची अस्थूरिणः सारररहिताः† सन्तु। 'तिग्मेन' 'उज्ज्वलेन' 'ब्रह्मणा' ब्रह्मवर्चसेन 'नः' अस्मान् 'सं शिशाधि' सम्यगनुशिष्टान् कुरु ।

* एवमेव सर्व्वत्र पाठः। 'भूयः प्राप्नोमि' इति पाठो भवितुं युक्तः।

† 'अस्थूरि' (अस्थूरीणि) सारररहितानि इत्येवंविधः कश्चित् पाठो भवितुं युक्तः।

एतन्मन्त्रसाध्यमुपधानं विधत्ते,—"पशवो वै एते यत् इष्टकाः चित्यां-चित्याम् ऋषभम् उप दधाति मिथुनमेव अस्य तत् यज्ञे करोति प्रजनना-य तस्मात् यूथेयूथे ऋषभः[१]" इति। या एता अन्याः 'इष्टकाः,' ताः सर्वा गोरूपाः। अतो 'यज्ञे' तासां मिथुनभावाय एताम् ऋषभाख्याम् इष्टकाम् उपदध्यात्। यस्मादत्र एकस्याश्चित्याम् ऋषभम् उपधीयते, तस्माल्लोकेऽपि एकैकस्मिन् गोयूथे एकैक 'ऋषभः' तिष्ठति। सर्वचितिषु अपेक्षितत्वादिदं ब्राह्मणं प्रथमचित्यन्ते द्रष्टव्यम्।

यदुक्तं सूत्रकारेण,—'संवत्सरस्य प्रतिमामिति प्राजापत्याम्' इति। तदिदं विधातुं मन्त्रमुत्पादयति,—"संवत्सरस्य प्रतिमां यां त्वा रात्रि उपासते। प्रजाꣳ सुवीरां कृत्वा विश्वमायुर्व्यश्नवद्[२]" इति। 'हे रात्रि' एकाष्टकारूपे, 'यां' 'त्वा' 'प्रतिमां' प्रतिनिधिरूपां सर्वे यजमानाः 'उपासते' सेवन्ते, 'एषा वै संवत्सरस्य पत्नी यदेकाष्टका एतस्यां वा एष एताꣳ रात्रिं रमति' इति हि अन्यत्राम्नातं। तां त्वां 'कृत्वा' दृष्ट्वोपधाय 'सुवीरां' शोभनभृत्योपेतां 'प्रजां' पुत्रादिरूपां 'विश्वमायुः' कृत्स्नमप्यायुष्यं 'व्यश्नवत्' विशेषेण व्याप्नोति।

एतन्मन्त्रसाध्यमुपधानं विधत्ते,—"प्राजापत्याम् एताम् उप दधाति इयं वाव एषा एकाष्टका यदेव एकाष्टकायाम् अन्नं क्रियते तदेव एतया अवरुन्धे एषा वै प्रजापतेः कामदुघा तयैव यजमानः अमुष्मिं लोकेऽग्निं दृहे[३]" इति। एकाष्टकायाः संवत्सररूपप्रजापति-पत्नीत्वात् तद्रूपेयमिष्टका प्राजापत्या, तामेतामुपदध्यात्। 'एषा' च 'एकाष्टका' 'इयम्' एव भूमिस्वरूपा। तथा हि भूमिरूपायाम्

एतस्याम् 'एकाष्टकायां' यत् 'अन्नं' मन्त्रान्तं तत् सर्वं प्राप्नोति। किञ्च इयम् एकाष्टका 'प्रजापतेः' संवत्सररूपस्य कामधेनुः, 'यजमानः' 'अमुष्मिन् लोके' कामान् दोग्धि दुग्धे*। एतच्च नक्षत्रेष्टकाब्राह्मणात् (५।४।१) ऊर्ध्वं द्रष्टव्यम्।

यदुक्तं सूत्रकारेण, 'येन देवा ज्योतिषोर्ध्वा उदायन्निति प्रादेशमात्रैः काष्ठैरुख्यमुपधमिन्धे' इति। तदिदं विधातुं मन्त्रमुत्पादयति, "येन देवाः ज्योतिषा ऊर्ध्वाः उदायन् येन आदित्याः वसवो येन रुद्राः। येन अङ्गिरसो महिमानम् आनशुः तेन एतु यजमानः स्वस्ति(५)" इति। 'देवाः' सर्वे 'येन' 'ज्योतिषा' अग्निना 'ऊर्ध्वाः' उपरितनलोकवर्तिनः 'उदायन्' उत्कर्षं प्राप्ताः। तथा 'आदित्याः' 'वसवः' च 'येन' उदायन्। 'रुद्राः' च 'येन' अग्निना उदायन्। 'अङ्गिरसः' महर्षयः 'येन' अग्निना 'महिमानम् आनशुः' स्वकीयं सामर्थ्यं प्राप्ताः, 'तेन' अग्निना 'यजमानः' अयं 'स्वस्ति' क्षेमम् 'एतु' प्राप्नोतु।

तमिमं मन्त्रं विनियुङ्क्ते,—"सुवर्गाय वा एष लोकाय चीयते यदग्निः येन देवा ज्योतिषा ऊर्ध्वाः उदायन् इति उख्यꣳ समिन्धे इष्टकाः एवैताः उप धत्ते वानस्पत्याः सुवर्गस्य लोकस्य समष्ट्यै(६)" इति। अस्य अग्नेः, स्वर्गार्थं चीयमानत्वात् स्वर्गस्यसर्वदेवप्रतिपादकेन मन्त्रेण इन्धने सति याभिः समिद्भिरिध्यते, ताः सर्वाः 'वानस्पत्याः' इष्टका एव उपहिता भवन्ति। तच्च स्वर्गप्राप्त्यै सम्पद्यते। एतच्च "विष्णुमुखा वै देवाः" (५।२।१।१) इत्यनुवाके द्रष्टव्यम्।

* एवमेव सर्वत्र पाठः। 'दुहे' दोग्धि इति पाठो भवितुं युक्तः।

यत्तु सूत्रकारेण,—'शतायुधाय शतवीर्यायेति पञ्चाज्यानीः प्रतिदिशमेकां मध्ये' इति। तत्र प्रथमामाह,—"शतायुधाय शतवीर्याय शतोतये अभिमातिषाहे। शतं यो न शरदो अजीतान् इन्द्रो नेषत् अति दुरितानि विश्वा" इति। 'यः' 'इन्द्रः' 'नः' अस्मान् 'शतं' 'शरदः' शतसङ्ख्याकान् संवत्सरान् 'अजीतान्' 'नेषत्' केनापि व्याधि-तस्करादिना यथा जिताः पीडिता न भवामः, तथा नेतुं समर्थः। किं कृत्वा ? 'विश्वा' 'दुरितानि' 'अति' सर्वाणि पापानि अतिक्रम्य :- यानि पापानि अस्माभिः कृतानि, तानि सर्वाणि विनाश्य; सर्वस्मिन्नप्यायुषि अस्मान् केनाप्यनुपद्रुतान् करोतीत्यर्थः। तस्मै इन्द्राय नमोऽस्त्वित्यध्याहारः। कीदृशाय ? शतसङ्ख्याकान्यायुधानि वज्रधनुरादीनि यस्यासौ शतायुधः, तस्मै। शतसङ्ख्याकानि वीर्याणि युद्धेषु विजयरूपाणि यस्यासौ शतवीर्यः, तस्मै। शतसङ्ख्याका ऊतयो-ऽस्मद्रक्षणानि यस्यासौ शतोतिः, तस्मै। 'अभिमातिषाहे" पाप्मानं महते अभिभवतीति अभिमातिषाट्, तस्मै।

अथ द्वितीयामाह,—"ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति। तेषां यः अज्यानिम् अजीनिम आवहात् तस्मै नो देवाः परिदत्त स्वस्ति" इति। 'द्यावापृथिवी' 'अन्तरा' द्यावापृथिव्योर्मध्ये, 'ये चत्वारः पथयः' मार्गाः 'वियन्ति' विविधं गच्छन्ति, प्रवर्तन्ते। कीदृशा मार्गाः ? 'देवयानाः' देवानां यानं गमनम् एषु ते देवयानाः; देवा हि देवलोक-पितृलोक-ब्रह्मलोक-मनुष्यलोकविषयेषु मार्गेषु विस्रम्भेण सञ्चरन्ति; 'तेषां' मार्गाणां

* 'अभिमातिम्' इति पदं पतितमिव प्रतिभाति।

'यः' इन्द्रः 'अज्यानिम् अजीतिम् आवहात्';—रक्षःप्रभृतिभिरनुपद्रवः 'अजीतिः', सा अजीतिः 'अज्यानिः' कदाचिदपि हानिरहिता; तादृशीम् अजीतिम् आवहति, तेषु मार्गेषु गच्छतामस्माकं नित्यमनुपद्रवं सम्पादयतीत्यर्थः। 'तस्मै' इन्द्राय, हे 'सर्वे' 'देवाः', 'इह' कर्मणि 'नः' अस्मान् 'परिदत्त' अयं यजमानः सर्वेषु मार्गेषु रक्षणीयः—इत्येवमस्मानिन्द्राय समर्पयत।

अथ तृतीयामाह,—"ग्रैष्मो हेमन्तः उत नो वसन्तः शरत् वर्षाः सवितं नः अस्तु। तेषामृतूनाꣳ शतशारदानां निवाते एषामभये स्याम[९]" इति। यो ग्रैष्माख्य ऋतुः, स 'नः' अस्मान् प्रति 'सवितम्' 'अस्तु' शोभनगतिं प्राप्नोतु, कालोचितभोग्यद्रव्यप्रदः अस्त्वित्यर्थः। एवं हेमन्तादिषु योज्यम्। 'शतशारदानां' अस्मदायुषि शतसंवत्सरसम्बन्धिनां 'तेषाम्' 'एषां' ग्रैष्मादीनाम् 'ऋतूनाम्' अनुग्रहाद् वयं 'निवाते' वाताद्युपद्रवरहिते 'अभये' भयरहितस्थाने 'स्याम' सुखेनावस्थिता भवेम।

अथ चतुर्थीमाह,—"इदूवत्सराय परिवत्सराय संवत्सराय इडुता इदम् नमः। तेषां वयꣳ सुमतौ यज्ञियानां ज्योक् अजीताः अहताः स्याम[१०]" इति। प्रभवादिसंवत्सराणां पञ्चके चतुर्थः इदूवत्सरः, द्वितीयः परिवत्सरः, प्रथमः संवत्सरः। एतच्च कृत्स्नकालस्याप्युपलक्षणम्। हे ऋत्विग्यजमानाः, इदूवत्सरादिरूपाय कालाय 'इदम् नमः' 'इडुत' अत्यन्तभक्तिपुरःसरं नमस्कारं कुरुत। 'यज्ञियानां' यज्ञनिष्पादकानां तेषां संवत्सरविशेषाणां 'सुमतौ' अनुग्रहबुद्धौ सत्यां 'वयं' सर्वे 'ज्योक्' चिरम् 'अजीताः' केनाप्यवशीकृताः, 'अहताः' अमारिताश्च 'स्याम' भवेम।

अथ पञ्चमीमाह,—"भद्रात् नः श्रेयः समनैष्ट देवास्त्वया अवसेन समशीमहि त्वा। म नो मयोभूः पितो आ विशस्व शं तोकाय तनुवे स्योनः[११]" इति। हे 'देवाः', 'भद्रात्' कल्याणाद् अस्मात् कर्मसाधनभूतात् 'श्रेयः' अधिकं प्रशस्तं फलं 'नः' अस्मान् 'समनैष्ट' सम्यक् प्रापयत। तथा चित्याग्नौ हूयमान हे सोम, 'त्वया' 'अवसेन' त्वदीयेन रक्षणेन वयं त्वां 'समशीमहि' सम्यक् व्याप्नुयाम। हे 'पितो' अन्नभूत सोम, 'म' त्वं 'मयोभूः' सुखस्य भावयिता सन् 'नः' अस्मान् 'आ'—'विशस्व' प्रविश। 'तोकाय' अस्मदपत्याय 'शं' सुखं कुरुत। 'तनुवे' शरीराय 'स्योनः' सुखप्रदो भव।

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते,—"अज्यानीः एताः उप दधाति एताः वै देवताः अपराजितास्ता एव प्र विशति नैव जयते[१९] इति। अज्यानिशब्दोपेतैर्मन्त्रैरुपधेया इष्टकाः अज्यानयः, ताः उपदधात्। एतैर्मन्त्रैः प्रतिपाद्या या इन्द्रादिदेवताः, 'एताः'* सर्वा देवताः क्वापि 'अपराजिताः,' अयं यजमानः 'ताः' 'एव' देवताः 'प्र'-'विशति'; केनाप्यन्येन शत्रुणा 'नैव' 'जीयते'। एतदपि नक्षत्रेष्टकाब्राह्मणसमीपे (५।४।१) द्रष्टव्यम्।

अथायुधप्रस्तावे यदुक्तं सूचकारेण,—'निरूप्तं हविरुपमन्त्रमयोक्षितं भवत्यथ पञ्चाज्यानीर्जुहोति शतायुधाय शतवीर्याय' इति।

तदिदं विधत्ते,—"ब्रह्मवादिनो वदन्ति यदर्धमासाः मासाः ऋतवः संवत्सरः ओषधीः पचन्ति अथ कस्मात् अन्याभ्यो देवताभ्य आयतनं निरुप्यते इति एता हि तत् देवताः उदजयन् यत् ऋतुभ्यो निर्वपेत्

* अत्र 'याः एताः' इति का० को० पुस्तकपाठः।

देवताभ्यः समदं दधात् आग्रयणं निरुप्य एताः आज्रतीर्जुहोति अर्धमासानेव मासान् ऋतून् संवत्सरं प्रीणाति न देवताभ्यः समदं दधाति[१२]" इति। 'ब्रह्मवादिनः' परस्परमेवं विचारयन्ति, अर्धमासमासर्तुसंवत्सररूपा देवताः ओषधीनां परिपाकं सम्पादयन्ति। एवं सति, ता देवताः उपेक्ष्य 'अन्याभ्यः' इन्द्राग्न्यादिभ्यो 'देवताभ्यः'। आग्रयणाख्यं नूतनधान्यरूपं हविः 'कस्मात्' कारणात् 'निरुप्यते इति?'। तत्राभिज्ञा एवमुत्तरमाहुः,—यस्मात् 'एताः' इन्द्राग्न्यादयो 'देवताः' इतरैर्देवैः सह समयं कृत्वा तत्र-तत्रौषधिविषये उत्कर्षेण जयं प्राप्ताः, तस्मात् इन्द्राग्न्यादिभ्यो निर्वापो युक्तः। एतच्च राजसूयप्रकरणे आग्रयणविधौ स्पष्टमाम्नातम्,—"देवा वा ओषधीष्वाजिमयुः ता इन्द्राग्नी उदजयताम्" (१।६।१।१०ब्रा०) इति। एवं सति जेतॄन् इन्द्राग्न्यादीन् उपेक्ष्य यदि ऋतुमासादिदेवताभ्यो 'निर्वपेत्,' तदानीमेतासां तासां च देवतानां कलहं संपादयेत्। एवं तर्हि ओषधिपरिपाकहेतूनाम् ऋतुमासादिदेवतानां परितोषः कथम्? इति चेत्। श्रूयताम्,—इन्द्राग्न्यादिभ्यः 'आग्रयणं' 'निरुप्य' घृतायुधायेति 'एताः' अज्यान्याज्रतीः मासादिदेवताभ्यो जुहुयात्। तेनार्धमासादिदेवान् प्रीणयति, ततो देवतानां कलहं न करोति।

यद्यपि सूत्रकारेणाग्रयणप्रस्तावे विहितम्,—'भद्रान्नः श्रेयः समनैष्ट देवा इति यजमानभागं प्राप्नोति' इति। तं विधिं मन्त्रव्याख्यानरूपार्थवादेनोन्नयति,—"भद्रात् नः श्रेयः समनैष्ट देवाः इति आह कृताद्याय यजमानस्य पराभावाय[१३]" इति। यजमानो भक्षणकाले 'भद्राद्'-इत्यादिमन्त्रं पठेत्। अथच मन्त्रो

ऋतशेषस्य भक्षणाय समर्थः। 'अग्नीमहि'-इति मन्त्रलिङ्गात् ऋतभक्षणेन यजमानः पराभूतो न भवति। एतच्च ब्राह्मणम् आग्रयणविधिसमीपे (१।६।१।८ ब्रा०) नेतव्यम् ॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे षष्ठमप्रपाठके द्वितीयोऽनुवाकः ॥०॥

इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पशः। यो नः पुरस्तादक्षिणतः पश्चादुत्तरतोऽधायुरभिदासत्येतꣳ सोऽग्मानमृच्छतु[1]। देवासुराः संयत्ता आसन्ते ऽसुरा दिग्भ्य आबाधन्त तान्देवा इषा च वज्रेण चापानुदन्त यद्वज्रिणीरुपदधातीषा चैव तद्वज्रेण च यजमानो भ्रातृव्यानप नुदते[2] दिक्षूप ॥ १ ॥

दधाति देवपुरा एवैतास्तनूपानीः पर्यूहते[3] अग्नाविष्णू सजोषसेमा वर्द्धन्तु वां गिरः। द्युम्नैर्वाजेभिरा गतं[4]। ब्रह्मवादिनो वदन्ति यन्न देवतायै जुहूत्यथ किंदेवत्या वसोर्धारेत्यग्निर्वसुस्तस्यैषा धारा विष्णुर्वसुस्तस्यैषा धाराग्नावैष्णव्यर्चा वसोर्धारां जुहोति भागधेयेनैवैनौ समर्धयत्यथो एतां ॥ २ ॥

एवाहुतिमायतनवतीं करोति यत्काम एनां जुहोति तदेवाव रुन्धे[5] रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोरान्या शिवान्या यच्छतरुद्रीयं जुहोति यैवास्य

घोरा तनूस्तां तेन शमयति यदसोर्धारां जुहोति यैवास्य शिवा तनूस्तां तेन प्रीणाति[६] यो वै वसोर्धारायै ॥ ३ ॥

प्रतिष्ठां वेद प्रत्येव तिष्ठति यदाज्यमुच्छिष्येत तस्मिन् ब्रह्मौदनं पचेत्तं ब्राह्मणाश्चत्वारः प्राश्नीयुरेष वा अग्निर्वैश्वानरो यद् ब्राह्मण एषा खलु वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियायामेवैना तनुवां प्रतिष्ठापयति[७] चतस्रो धेनूर्दद्यात्ताभिरेव यजमानोऽमुष्मिन्लोकेऽग्निं दुहे[८] ॥ ४ ॥

उप। एतां। धारायै। षट्चत्वारिꣳशच्च ॥ ३ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके तृतीयोऽनुवाकः ॥ ० ॥

द्वितीये ऋषभादीनामुपधानादिकं श्रुतम्।

अथ तृतीये वज्रिणोष्टकोपधानं विधातुं मन्त्रानुत्पादयति,—"इन्द्रस्य वज्रोऽसि वार्त्रघ्नः तनूपाः नः प्रतिस्पशः। यो नः पुरस्तात् दक्षिणतः पश्चात् उत्तरतः अघायुः अभिदासति एतꣳ सः अश्मानमृच्छतु[१]" इति। इष्टकास्थानीय हे अश्मन्, त्वम् 'इन्द्रस्य' 'वज्रोऽसि' वज्रसमानोऽसि। कीदृशस्त्वम्? 'वार्त्रघ्नः' वैरिघाती। 'नः' अस्माकं 'तनूपाः' शरीरस्य पालकः। 'प्रतिस्पशः' रोगाद्यनिष्टस्य विनाशयिता। किञ्च, 'यः' शत्रुः अघं पापं अस्मदुपद्रवम्

इच्छतीत्यर्थः तथाविधः सन् 'पुरस्तात्' पूर्वस्यान्दिशि 'नः' अस्मान् 'अभिदासति' हिनस्ति, 'सः' शत्रुः 'एतम्' 'अश्मानम्' उपधीयमानं पाषाणम् 'ऋच्छतु' प्राप्नोतु; पाषाणं प्राप्य स्वयमेव व्याधितो भवत्वित्यर्थः। 'दक्षिणतः' इत्यादिभिस्तिभिः पदैः त्रयो मन्त्रा भिद्यन्ते। तेषु त्रिष्वपि अवशिष्टमनुषज्यतेऽयम्।

तैरेतैस्तुर्भिर्मन्त्रैः साध्यमुपधानं विधत्ते,—"देवासुराः संयत्ता आसन् ते असुराः दिग्भ्यः आ अबाधन्त तान् देवाः इष्ट्वा च वज्रेण च अपानुदन्त यद्वज्रिणीरुपदधाति इष्ट्वा च एव तद्वज्रेण च यजमानो भ्रातृव्यान् अप नुदते[१]" इति। यदा 'देवासुराः' युद्धोद्यताः, तदानीम् 'असुराः' चतसृभ्यः 'दिग्भ्यः' आगत्य सर्वतो बाधितवन्तः। 'तान्' असुरान् 'देवाः' 'इष्ट्वा' वज्रसदृशेन पाषाणेन च तान् असुरान्* 'अपानुदन्त'। ततो 'यजमानः' भ्रातृव्यापनोदनाय 'वज्रिणीः' उपदध्यात्।

तस्य चोपधानस्य चितेर्बर्हिर्देशं विधत्ते,—"दिव उप दधाति देवपुराः एव एताः तनूपानीः पर्यूहते[२]" इति। याः 'एताः' वज्रिण्यः, ताः 'देवपुराः' 'एव' देवानामिन्द्रादीनां पुरस्थानीया एव। तनूपानीः अस्मच्छरीरस्य पालयित्रीः। एतादृशीः परितः स्थापयति। एतदपि नक्षत्रेष्टकाब्राह्मणाद् (५।४।२) ऊर्ध्वं द्रष्टव्यम्।

यत्पूर्वं विहितं "वमोर्धारां जुहोति" (५।४।८) इति।

---

* एवमेव सर्वत्र पाठः। अत्र पुनः 'तान् असुरान्' इति पाठः अधिक इव प्रतिभाति।

तदेतदनूद्य विशेषं वक्तुम्, आम्नातमपि (४।७।१) मन्त्रं पुनः पठति,—"अग्नाविष्णू सजोषसा इमाः वर्धन्तु वां गिरः द्युम्नैर्वाजेभिः आ गतम्"[४] इति। हे 'अग्नाविष्णू', 'इमाः' 'गिरः' अस्माभिः प्रयुक्ताः स्तुतिरूपा वाचः 'सजोषसा' 'वां' परस्परं समानप्रीतियुक्तौ युवां 'वर्धन्तु' परितोषयन्तु। युवाभ्यां 'द्युम्नैः' धनैः 'वाजेभिः' अन्नैश्च सहितौ 'आ' 'गतम्' इहागच्छतम्।

तमिमं मन्त्रं विनियुङ्क्ते,—"ब्रह्मवादिनो वदन्ति यत् न देवतायै जुह्वति अथ किंदेवत्या वसोर्धारा इति अग्निर्वसुः तस्य एषा धारा विष्णुर्वसुः तस्य एषा धारा अग्नाविष्णव्या ऋचा वसोर्धारां जुहोति भागधेयेनैव एनौ समर्धयति अथो एतामेव आकृतिम् आयतनवतीं करोति यत्कामः एनां जुहोति तदेव अव रुन्धे[५]" इति। अत्र 'ब्रह्मवादिनः' एवं विचारयन्ति, वसोर्धारायां मन्त्रे "वाजश्च मे प्रसवश्च मे" (४।७।१।२) इत्येवं फलप्रार्थनैव प्रतीयते, न तु काचिद्देवता प्रतिपाद्यते। विधिवाक्ये अपि आज्यधारारूपं द्रव्यमेव प्रतीयते, न तु काचिद्देवता। एवं सति, होतारः 'देवतायै' यस्मात् 'न' 'जुह्वति', तस्मात् 'किंदेवत्या' इयं 'वसोर्धारा'? इत्येवं प्रश्नः। तत्राभिज्ञा उत्तरमेवमाहुः,—विधिवाक्यगतेन वसुधारा-शब्देनैव द्रव्यदेवतासम्बन्धः प्रतीयते। वासयतीतिव्युत्पत्त्या 'वसुः' 'अग्निः', 'तस्य' इयमाज्यधारा वसोर्धारा। एवं विष्णावपि योजनीयम्। यद्यप्येतौ देवौ "वाजश्च मे" इत्यादिना न प्रतीयते, तथापि अनया ऋचा प्रतीयेत। तस्मात् एतया 'वसोर्धारां' जुह्वयात्। तथा सति, उचितेन भागेनैतौ तोषयति। अपि च

'एताम्' 'आकूतिं' देवतारूपाधारवतीं 'करोति'। किञ्च यत्फलं कामयित्वा 'जुहोति' तत्प्राप्नोति।

प्रकारान्तरेणैतां प्रशंसति,—"रुद्रो वै एष यदग्निस्तस्यैते तनुवौ घोरा अन्या शिवा अन्या यत् शतरुद्रीयं जुहोति या एव अस्य घोरा तनूः तां तेन शमयति यत् वसोर्धारां जुहोति या एव अस्य शिवा तनूः तां तेन प्रीणाति[६]" इति। शतरुद्रीयहोमेन उग्रातनोः शान्तावपि शिवातनोः प्रीत्यर्थोऽयं वसोर्धाराहोमः इति अस्य प्रशंसायां विशेषं विधातुमयं प्रसङ्गः कृतः।

तं विशेषं विधत्ते,—"यो वै वसोर्धारायै प्रतिष्ठां वेद प्रति एव तिष्ठति यत् आज्यमुच्छिष्येत तस्मिन् ब्रह्मौदनं पचेत् तं ब्राह्मणाः स्वयं प्राश्नीयुः एष वै अग्निर्वैश्वानरो यत् ब्राह्मणः एषा खलु वै अग्नेः प्रिया तनूः यत् वैश्वानरः प्रियायामेव एनां तनुवां प्रतिष्ठापयति[७]" इति। 'यः' यजमानः वसोर्धारायाः प्रतिष्ठाप्रकारं 'वेद,' सः 'प्रति'-'तिष्ठति' 'एव'। कासौ तस्याः प्रतिष्ठा? इत्युच्यते,—होमावशिष्टे आज्ये ब्रह्मौदनं एक्ता ब्राह्मणानां प्राशनं यत्, सैव प्रतिष्ठा। ब्राह्मणस्य सर्वपुरुषप्रियत्वेन वैश्वानररूपत्वात्, वैश्वानरस्य च अग्निप्रियशरीरत्वात् तस्मिन्नेव प्रियशरीरे तम् अग्निं 'प्रतिष्ठापयति'।

यदुक्तं सूत्रकारेण,—'यदाज्यमुच्छिष्येत तस्मिन् ब्रह्मौदनं पक्ता चतुरो ब्राह्मणान् भोजयेच्चतुःशरावमोदनं पक्ता तद्भक्षनं भोजयेत् प्राशितवद्भक्षयतस्तो धेनूर्दद्यात्' इति; तच्च दानं विधत्ते,—"चतस्रो धेनूर्दद्यात् ताभिरेव यजमानः अमुष्मिन् लोके अग्निं दुहे[८]" इति।

अत्र मीमांसा।

तृतीयाध्यायस्य षष्ठपादे (१२अ०) चिन्तितम्,—

अखण्डादीष्टकाधर्माः चिचिण्यादिषु नोचिताः।
सन्ति वा? वाक्यमप्यचानारभ्योक्तं ततो न ते॥
प्रकृतापूर्वसम्बन्धात्तादृग्वादपि वाक्यतः।
अखण्डत्वादयोऽन्यर्थास्चिचिण्यादिषु सन्ति ते॥

अनारभ्य श्रूयते,—'चिचिणीरुपदधाति' इति, 'वज्रिणीरुपदधाति' इति च। अग्निप्रकरणे इष्टकानां धर्माः श्रुताः 'अखण्डामक्षण्णां कुर्यात्' इति। पूर्वत्र अंश्वदाभ्ययोरुत्पत्तिवाक्यस्य अनारभ्याधीतत्वेऽपि विनियोजकवाक्यं प्रकरणाधीतम्। चिचिण्यादिनामकानाम् इष्टकाविशेषाणां विनियोजकवाक्यमप्यनारभ्याधीतम्। तच्च चित्यन्तरे तास्चिचिणीर्विनियुङ्क्ते। अखण्डत्वादिधर्मास्तु षण्णां चितीनां मध्ये प्रथमचितौ आम्नाताः। तस्मात्, ते 'चिचिण्यादिषु नोचिताः' इति प्राप्ते ब्रूमः,—यद्यपि उत्पत्तिविनियोजकवाक्ययोरन्यतरस्यापि प्रकरणपाठो नास्ति, तथापि "य एवं विद्वानग्निं चिनुते" इति प्रकृतम् यदेतदग्न्यपूर्वं, तत्सम्बन्धिलेनैव चिचिण्यादयोऽपि अप्रकरणपठितेनापि वाक्येन विनियुज्यन्ते। अखण्डत्वादयश्च अग्निसाधनभूतेष्टकाधर्माः, न तु प्रथमचितिधर्माः। तस्मादग्निसाधनभूतासु चिचिण्यादीष्टकास्वपि ते सन्ति।

पञ्चमाध्यायस्य तृतीयपादे (७अ०) चिन्तितम्,—

चिचिण्यादेरुत्तमायामुपधानं पुराऽथवा।
अव्यवायादुत्तमायां, मध्यमायान्तु वाक्यतः॥

उत्तमायां पञ्चम्यां चितौ चिचिण्यादेरनारभ्याधीतायाः दृष्टकायाः उपधानमुक्तम्। तथा सति, प्रकरणाधीतानां क्रमप्राप्तमाणामिष्टकानां परस्परव्यवधानं न प्रसज्येत—इति चेत्। नैवम्, 'याज्ञाश्चित् ब्राह्मणवतीमिष्टकामभिजानीयात्, तां मध्यमायां चितौ' इति वाक्येन अनारभ्याधीतेन ब्राह्मणेन विहितानामिष्टकानां मध्यमचितौ विनियोगः'॥ तत्रैव (८ अ०) अन्यच्चिन्तितम्,—

लोकं-पृणात ऊर्ध्वं स्याच्चिचिण्यूत ततः पुरा।
बादरायणदृष्ट्योर्ध्वं पूरणोक्तेस्ततः पुरा॥

'चिचिण्यारूपदधाति', 'वक्रिण्यारूपदधाति', 'भृतेष्टका उपदधाति' इति विहितम्। चिचिण्यादिकं मध्यमायां चितौ लोकं-पृणाभिधायाः दृष्टकायाः ऊर्ध्वमुपधेयम्। कुतः?। बादरायणेन तथा दृष्टत्वात्। "अन्ते तु बादरायणः" (मी० ५।२।१९) इति सूत्रेण बादरायणस्य मतमुपन्यस्तम्। न हि आगन्तूनामन्ते निवेशमाहुः,—लोकं-पृणा च प्रकरणपठितानाम् अन्तिमेष्टका, ततस्तस्या ऊर्ध्वं चिचिण्यादिकम्—इति प्राप्ते, ब्रूमः, "लोकं पृण छिद्रं पृण" (४।२।४।४) इत्यनेन मन्त्रेण उपधीयमाना दृष्टका लोकं-पृणा। तस्याः कर्मणि ऊनत्वदिदोषपरिहारेण सम्पूर्त्तिहेतुत्वं मन्त्रलिङ्गादवगम्यते। ब्राह्मणेऽप्येवमाम्नातम्,—'यद्देवास्त्रोनं यच्छिद्रं तदेतया प्रयति लोकं पृण छिद्रं पृण' इति। यद्येतस्या दृष्टकायाः ऊर्ध्वं चिचिण्यादयः उपधीयेरन्, तदानीं चिचिण्यादिगते ऊनत्वच्छिद्रत्वे न पूर्येयाताम्। तस्मात् लोकं-पृणातः पूर्वं चिचिण्यादयुपधानम्।

* विनियोगविशेषः—इति आदर्शपुस्तकपाठः।

इति मायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके द्वितीयोऽनुवाकः ॥ ० ॥

चित्तिं जुहोमि मनसा घृतेनेत्याहादाभ्या वै नामैषाहुतिर्वैश्वकर्मणी नैनं चिक्यानं भ्रातृव्यो दभ्नोत्यथो देवता एवाव रुन्धे[१] अग्ने तमद्येति पञ्चक्त्या जुहोति पञ्चाक्षरा पङ्क्त्याहुत्या यज्ञमुखमा रभते[२] सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह हेचा एवाव रुन्धेऽग्निर्देवेभ्योऽपाक्रामद्भागधेयम् ॥ १ ॥

इच्छमानस्तस्मा एतद्भागधेयं प्रायच्छन्नेतद्वा अग्नेरग्निहोत्रमेतर्हि खलु वा एष जातो यर्हि सर्वश्चितो जातायैवास्मा अन्नमपि दधाति स एनं प्रीतः प्रीणाति वसीयान् भवति[३] ब्रह्मवादिनो वदन्ति यदेष गार्हपत्यश्चीयतेऽथ कास्याहवनीय इत्यसावादित्य इति ब्रूयादेतस्मिन् हि सर्वाभ्यो देवताभ्यो जुह्वति ॥ २ ॥

य एवं विद्वानग्निं चिनुते साक्षादेव देवता ऋध्नोति[४] अग्ने यशस्विन् यशसेममर्पयेन्द्रावतीमप चितीमिहावह। अयं मूर्धा परमेष्ठी सुवर्चाः समानानां-

मुत्तमश्लोको अस्तु[५]। भद्रं पश्यन्त उप सेदुरग्रे तपो दीक्षामृषयः सुवर्विदः। ततः क्षत्रं बलमोजश्च जातं तदस्मै देवा अभि सन्नमन्तु[६]। धाता विधाता परमा ॥ ३ ॥

उत संहैक् प्रजापतिः परमेष्ठी विराजा। स्तोमाश्छन्द्रांसि निविदो म आहरेतस्मै राष्ट्रमभि सन्नमाम[७]। अभ्यावर्त्तध्वमुप मेत साकमयः शास्ताधिपतिर्वो अस्तु। अस्य विज्ञानमनु संरभध्वमिमं पश्चादनु जीवाथ सर्वे[८]। राष्ट्रभृत एता उप दधात्येषा वा अग्नेश्चितो राष्ट्रमृत्तयैवास्मिन्नाष्ट्रं दधाति, राष्ट्रमेव भवति नास्माद्राष्ट्रं भ्रंशते ॥ ४ ॥

भागधेयं। जुह्वति। परमा। राष्ट्रं दधाति। सप्त च ॥ ४ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके चतुर्थोऽनुवाकः ॥०॥

चिचिण्डश्च त्रयोधाराम्रतायै मयूरीणाः।

अथ चतुर्थे होमविशेषाः राष्ट्रमदाख्या दर्शकाण्डाभिधीयन्ते। यदुक्तं सूचकारेण,—'चितिं जुहोम्यग्ने नमद्याग्निमिति दे आहुतीर्जुहोति' इति।

तत्र प्रथमाऽऽकूतेर्विधिं मन्त्रव्याख्यानेनोन्नयति, "चिक्तिं जुहोमि मनसा घृतेन इति आह अदाभ्या वै नाम एषा आऽऽकूतिः वैश्वकर्मणी न एनं चिक्यानं भ्रातृव्यो दभ्नोति अथो देवताः एव अव रुन्धे[१]" इति। अयं मन्त्रः पूर्वम् "आपो वरुणस्य पत्नयः" (५।५।१४) इत्यनुवाके समाम्नातो व्याख्यातश्च। तमिमं होमसाधनत्वेन पठेत्। अस्या आऽऽकूतेः* 'अदाभ्या' इति 'नाम', रक्षोभिः कैरपि विनाशयितुमशक्यत्वात्। सा च विश्वकर्मदेवताका, तस्मिन् मन्त्रे 'विश्वकर्मणे' इत्याम्नानात्। अस्यामाऽऽकूतौ कृतायां चिक्यानम् 'एनं' यजमानं 'भ्रातृव्यो' 'न' हिनस्ति। तस्मादेतां जुहुयात्। अपि चैतां जुह्वत् पुरुषो 'देवताः' प्राप्नोति 'एव'।

अथ द्वितीयामाऽऽकूतिं विधत्ते,—"अग्ने तम् अद्य इति पङ्क्त्या जुहोति पङ्क्त्या आऽऽकूत्या यज्ञमुखम् आ रभते[२]" इति। अयं मन्त्रश्चतुर्थकाण्डे "अग्निर्मूर्धा" (४।४।४) इत्यनुवाके पठितो व्याख्यातश्च। पङ्क्तिश्छन्दसा हूयमाना येयमाऽऽकूतिः, तया यज्ञप्रारम्भं प्राप्नोति।

"प्राचीमनु प्रदिशम्" (५।४।७) इत्यस्मिन् ब्राह्मणानुवाके 'पूर्णया जुहोति' इति यद्विहितं, तदेवानूद्य प्रपञ्चयति,—"यत्ते अग्ने समिधः यत्ते जिह्वाः इति आह होत्राः एव अव रुन्धे अग्निर्देवेभ्यो अपाक्रामत् भागधेयम् इच्छमानः तस्मै एतद्भागधेयं प्रायच्छन् एतत् वै अग्नेः अग्निहोत्रम् एतर्हि खलु वै एष जातो

* 'अस्याऽऽकूतेः' इति सर्वत्र पाठो न समीचीनः।

यर्हि सर्वस्मितो जातायै एव अस्मै अन्नम् अपि दधाति स एनं प्रीतः प्रीणाति वसीयान् भवति[२]" इति। अथास्य मन्त्रस्तुर्यकाण्डे "प्राचीम्" (४।६।५) इत्यनुवाके समाम्नातो व्याख्यातश्च। तस्मिन् मन्त्रे 'सप्त होत्राः' इत्यभिधानात् अनया आकृत्या होत्रकान् प्रस्तावादीन् अधीनान् करोति। किञ्च देवैर्दत्तो योऽयमग्निर्भागः, तद्रूपत्वात् इयमाकृतिः अस्य चीयमानस्य 'अग्निः' 'अग्निहोत्रम्' इत्युच्यते। यस्मिन् काले साकल्येन अयमग्निः 'चितः,' तदैवायम् उत्पन्नो भवति; उत्पन्नाय च तस्मै तदाकृतिरूपम् 'अन्नं' मन्त्रादितं भवति। तेन च हुतोऽग्निर्यजमानं प्रीणयति। स च यजमानो धनपतिर्भवति। एतदृक्कं सर्वं "प्राचीम्" (४।६।५) इत्यनुवाके एव द्रष्टव्यम्।

अथाच चीयमानमग्निं प्रश्नोत्तराभ्यामादित्यरूपेण प्रशंसति,—"ब्रह्मवादिनो वदन्ति यत् एष गार्हपत्यः चीयते अथ क्व अस्य आहवनीयः इति अमौ आदित्ये इति ब्रूयात् एतस्मिन् हि सर्वाभ्यो देवताभ्यो जुह्वति य एवं विद्वान् अग्निं चिनुते साक्षात् एव देवताः ऋध्नोति[४]" इति। अन्यत्र 'अग्निर्होता गृहपतिः' इत्यादिषु मन्त्रेषु अग्नेर्गृहपतित्वमुक्तम्। गृहपतिस्वामिकः कश्चित्* प्रदेशो गार्हपत्यः। एवं सति पूर्वस्मिन् वाक्ये 'एतदा अग्नेरग्निहोत्रम्' इति चितेऽग्नौ हूयमानायाः पूर्णाहुतेरग्निस्वामिकत्वाभिधानात् सर्वोऽप्ययं चीयमानो गार्हपत्यः संपन्नः। तस्मात् आहवनीयो न लभ्यते। यो समन्तात् सर्वे देवा यत्र हूयन्ते सोऽयम् आहवनीयः। सर्वस्यापि

* 'गृहपतिस्वामिकश्चित्' इति आदर्शपुस्तके पाठः एवं 'गृहपतिस्वामी कश्चित्' इति का० की० पुस्तके पाठो न समीचीनः।

चितप्रदेशस्य अन्यार्थहोमाधारत्वेन गार्हपत्यत्वे सति देवतान्तरहोमार्थः आहवनीयः 'अस्य' यजमानस्य कुत्र सम्भवेत्?—इत्येवं ब्रह्मवादिनां प्रश्नः। तत्राभिज्ञः कश्चित् उत्तरमेवं ब्रूयात्,—'असौ आदित्यः' एव यजमानस्य आहवनीय इति, आदित्ये हि सर्वदेवार्थो होमः क्रियते; 'अग्नौ प्राप्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते' इति स्मृतेः*। एवं सति यो यजमानश्चीयमानस्य अग्नेरादित्यरूपत्वं ज्ञात्वा चयनं करोति, सोऽयं 'साक्षादेव' अव्यवधानेन 'देवताः' तोषयति।

यदुक्तं सूत्रकारेण,—'अग्ने यज्ञस्त्रिरिति चतसो राष्ट्रभृतः पुरस्तादुपधाय' इति। तदेतद्विधातुम् उत्पादनीयेषु मन्त्रेषु प्रथमामृचमाह,—"अग्ने यज्ञस्त्वं यज्ञसा दमम् अर्पय इन्द्रावतीम् अपचितीम् इह आ वह। अयं मूर्धा परमेष्ठी सुवर्चाः समानानाम् उत्तमश्लोकः अस्तु(४)" इति। प्रभूतं यज्ञो यस्यास्ति स यज्ञस्त्वं, तादृश हे अग्ने, 'दमं' यजमानं 'यज्ञसा' 'अर्पय' संयोजय। 'इन्द्रावतीम्' इन्द्रस्य योग्यां 'अपचितीं' पूजाम् 'इह' कर्मणि 'आ-वह' सम्पादय। 'अयं' यजमानः त्वत्प्रसादात् 'समानानां' यजमानानां मध्ये 'मूर्धा' शिरस्थानीयः, 'परमेष्ठी' उत्तमस्थाननिवासी, 'सुवर्चाः' शोभनकान्तिः, 'उत्तमश्लोकः' सत्कीर्त्तियुक्तश्च 'अस्तु'।

अथ द्वितीया,—"भद्रं पश्यन्त उप सेदुः अग्रे तपो दीक्षाम् ऋषयः सुवर्विदः। ततः क्षत्रं बलम् ओजश्च जातं तदस्मै देवा अभिसंनमन्तु(५)" इति। 'अग्रे' पूर्वस्मिन् काले 'ऋषयः' केचित् महात्मानः 'भद्रं' कल्याणं कर्मफलं 'पश्यन्तः' शास्त्रदृष्ट्या निश्चिन्वानाः

* 'अतेः' इति का० क्री० पुस्तके पाठः।

'सुवर्विदः' स्वर्गं लब्धुकामाः 'तपः' कर्माङ्गभूतम् अनशनादिकं, 'दीक्षां' मौण्ड्यादिनियमविशेषञ्च 'उप'—'सेदुः' अनुष्ठितवन्तः। ततोऽनुष्ठानात् तेषां 'त्वचं' त्वगादिनिष्टात् त्रणं रक्षणं, 'बलं' शरीरसामर्थ्यं, 'ओजः' धातुपुष्टिञ्च इत्येतत् सर्वं 'जातं' सम्पन्नं; 'तत्' फलं सर्वम् 'अस्मै' यजमानाय 'देवाः' 'अभि'—'मन्त्रयन्तु' सर्वतः सम्पादयन्तु।

अथ तृतीयामाह,—"धाता विधाता परमा उत सन्दृक् प्रजापतिः परमेष्ठी विराजा सोमाः छन्दाꣳसि निविदः मे आशुः एतस्मै राष्ट्रम् अभि मन्त्रयाम[७]" इति। 'परमा' परमः उत्तमो 'धाता' पोषको यो देवः, यश्च 'विधाता' स्रष्टा, 'उत' अपिच 'सन्दृक्' सम्यगभिज्ञः 'प्रजापतिः' प्रजानां पालकः, परमे उत्कृष्टे सत्यलोकादौ तिष्ठति इति 'परमेष्ठी', 'विराजा' ब्रह्माण्डरूपया विराण्मूर्त्या सहितः, तादृशो यो देवः, ये च 'सोमाः' चित्तादयः, यानि च 'छन्दांसि' गायत्र्यादीनि, यानि च 'निविदः' 'देवेद्धमन्विद्ध'—इत्यादीनि निवित्पदानि, सर्वे 'मे' मदर्थम् 'आशुः' ब्रुवन्तु। तैर्वक्तव्यं प्रदर्श्यते,—'एतस्मै' यजमानाय 'राष्ट्रम्' 'अभि'—'मन्त्रयाम' देशाधिपत्यं सर्वतः सम्पादयाम। तदिदं तैर्वक्तव्यम्।

अथ चतुर्थी,—"अभ्यावर्त्तध्वम् उप मा एत माकम् अयꣳ शास्ता अधिपतिर्वः अस्तु। अस्य विज्ञानम् अनु मꣳरभध्वम् इमं पश्यात् अनु जीवाथ सर्वे[८]" इति। हे मनुष्याः, 'सर्वे' यूयं 'अभ्यावर्त्तध्वं' सर्वतः आगच्छत। 'माकं' परस्परं मिलित्वा 'मा' मदीयं यजमानं 'उप' समीपम् 'एत' आगच्छत। 'अयं' यजमानः 'वः' युष्माकं 'शास्ता' अनुशासकः 'अधिपतिः' अधिकं पालयिता च 'अस्तु'।

'अस्य' यजमानस्य 'विज्ञानं' चित्तवृत्तिम् अनुसृत्य 'संरभध्वं' सम्यक् प्रवर्तध्वं। 'इमं' यजमानम् अनुसृत्य 'पश्चात्' 'जीवाथ' एनं यजमानं संविज्ञानेन दत्तं जीवितं गृह्णीत इत्यर्थः।

एतैर्मन्त्रैः माध्यमुपधानं विधत्ते,—"राष्ट्रभृत एताः उप दधाति एषा वै अग्नेः चितिः राष्ट्रभृत् तया एव अस्मिन् राष्ट्रं दधाति राष्ट्रमेव भवति न अस्मात् राष्ट्रं भ्रश्यते(९)" इति। राष्ट्रशब्दोपेतान् मन्त्रान् विभक्ति तैरुपधीयन्ते इति 'राष्ट्रभृतः'; एतदुपधानेन निष्पन्ना या 'चितिः', सा 'एषा' 'अग्नेः' मन्त्रसम्बन्धिनी 'राष्ट्रभृत्'—इत्युच्यते। 'तया' 'एव' 'अस्मिन्' यजमाने 'राष्ट्रं' स्थापयति। तच्च 'राष्ट्रम्' अस्याधीनमेव 'भवति' 'अस्मात्' यजमानात् तत् 'राष्ट्रं' कदाचिदपि 'न' भ्रष्टं भवति। एतच्च नचत्रेष्टकाब्राह्मणात् (५।४।१) ऊर्ध्वं द्रष्टव्यम्॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके चतुर्थोऽनुवाकः॥०॥

यथा वै पुत्रो जातो म्रियत एवं वा एष म्रियते यस्याग्निरुद्यं उद्यायति यन्निर्मथ्यं कुर्यादिच्छिद्रा-द्भ्रातृव्यमस्मै जनयेत्स एव पुनः परीध्यः स्यादेवैनं योने-र्जनयति नास्मै भ्रातृव्यं जनयति तमो वा एतं गृह्णाति यस्याग्निरुद्यं उद्यायति मृत्युस्तमः कृष्णं वासः कृष्णा धेनुर्दक्षिणा तमसा॥ १॥

एव तमो मृत्युमपहते[२] हिरण्यं ददाति ज्योतिर्वै हिरण्यं ज्योतिरेव तमोऽपहतेऽथो तेजो वै हिरण्यं तेज एवात्मन्धत्ते[३] सुवर्न घर्मः स्वाहा सुवर्नार्कः स्वाहा सुवर्न शुक्रः स्वाहा सुवर्न ज्योतिः स्वाहा सुवर्न सूर्यः स्वाहा[४] अर्को वा एष यदग्निरसावादित्यः ॥ २ ॥

अश्वमेधो यदेता आहुतीर्जुहोत्यर्काश्वमेधयोरेव ज्योतींष्यपि सन्दधात्येष ह त्वा अर्काश्वमेधो यस्यैतद्गृहे क्रियते[५] आपो वा इदमग्रे सलिलमासीत् स एतां प्रजापतिः प्रथमाश्चितिमपश्यत्तामुपाधत्त तदियमभवत्[६] तं विश्वकर्माऽब्रवीदुप त्वायानीति नेह लोकोऽस्तीति ॥ ३ ॥

अब्रवीत्स एतां द्वितीयाश्चितिमपश्यत्तामुपाधत्त तदन्तरिक्षमभवत्[७] स यज्ञः प्रजापतिमब्रवीदुप त्वायानीति नेह लोकोऽस्तीत्यब्रवीत्स विश्वकर्माणमब्रवीदुप त्वायानीति केन मोपैष्यसीति दिश्याभिरित्यब्रवीत्तं दिश्याभिरुपैत्ता उपाधत्त ता दिशः ॥ ॥ ४ ॥

अभवन्[८] स परमेष्ठी प्रजापतिमब्रवीदुप त्वायानीति नेह लोकोऽस्तीत्यब्रवीत्स विश्वकर्माणं च यज्ञञ्चाब्रवीदुप मायानीति नेह लोकोऽस्तीत्यब्रूताꣳ स

एतां तृतीयाच्चितिमपश्यत्तामुपाधत्त तदसावभवत्[९] स आदित्यः प्रजापतिमब्रवीदुप त्वा ॥ ५ ॥

आयानीति नेह लोकोऽस्तीत्यब्रवीत्स विश्वकर्माणं च यन्नञ्चाब्रवीदुप वामायानीति नेह लोकोऽस्तीत्यब्रूताꣳ स परमेष्ठिनमब्रवीदुप त्वायानीति केन मोपैष्यसीति लोकंपृणयेत्यब्रवीत्तꣳ लोकंपृणयोऽपैत्तस्मादयातयामा लोकंपृणायातयामा ह्यसौ ॥ ६ ॥

आदित्यः[१०] तान्दर्भयोऽब्रवन्नुप व आयामेति केन न उपैष्यथेति भूम्नेत्यब्रुवन् तान् द्वाभ्याञ्चितीभ्यामुपायन् स पञ्चचितीकः समपद्यत[११] य एवं विद्वानग्निं चिनुते भूयानेव भवत्यभीमान् लोकान् जयति विदुरेनं देवा अथो एतासामेव देवतानाꣳ सायुज्यं गच्छति[१२] ॥ ७ ॥

तमसा। आदित्यः। अस्तीति। दिशः। आदित्यः प्रजापतिमब्रवीदुप त्वा। असौ। पञ्चचत्वारिꣳशच्च ॥ ५ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके पञ्चमोऽनुवाकः ॥ ० ॥

तिस्र आज्यतन्त्रो राद्धभृतस्तुर्ये समीरिताः।

अथ पञ्चमे पुनः परीध्यनादयो विधीयन्ते। यदुक्तं सूत्रकारेण,—'यस्याग्निरुद्धृत उदायेद्गार्हपत्यादन्यं प्रणयेत्स एव पुनः परीध्यः' इति।

तदिदं विधत्ते,—"यथा वै पुत्रो जातो म्रियते एवं वै एष म्रियते यस्याग्निरुख्यः उद्दायति यत् निर्मन्थं कुर्यात् विच्छिन्द्याद् भ्रातृव्यम् अस्मै जनयेत् स एव पुनः परीप्सः स्यात् एव एनं योनेर्जनयति न अस्मै भ्रातृव्यं जनयति[१]" इति। 'यस्य' यजमानस्य उख्याग्निः म्रास्यति, तस्य पुत्रमरणवत् अग्निनाशनिमित्तं दुःखं जायते। तस्य निर्मन्थ्येन अग्न्यन्तरोत्पादने सति पूर्वः* अग्निं 'विच्छिन्द्यात्'। स च विच्छिन्नः अस्य यजमानस्य वैरिणं 'जनयेत्'। अतस्तत्परिहाराय गार्हपत्यनिष्टः 'सः' अग्निः 'एव' पुनरपि आनीय परितः काष्ठप्रक्षेपेण इन्धनीयः; तथा सति स्वकारणादेव उत्पन्नत्वात् वैरिणं 'न' 'जनयति'।

अत्रैव प्रायश्चित्तरूपां दक्षिणां विधत्ते,—"तमो वै एतं गृह्णाति यस्याग्निरुख्य उद्दायति मृत्युस्तमः कृष्णं वासः कृष्णा धेनुर्दक्षिणा तमसा एव तमो मृत्युम् अपहते[२]" इति। 'यस्य' यजमानस्य उख्याग्निः नश्येत्, एनं यजमानं 'तमः' 'गृह्णाति;' तच्च मृत्युरूपम्। अतस्तत्परिहाराय कृष्णवर्णमेकं वस्त्रं कृष्णवर्णा च 'धेनुः' 'दक्षिणा' तेन दातव्या। एवं सति तमोरूपत्वात् दक्षिणायाः तं मृत्युरूपं 'तमः' विनाशयति।

अथ तत्रैव दानान्तरं विधत्ते,—"हिरण्यं ददाति ज्योतिर्वै हिरण्यं ज्योतिषा एव तमः अपहते अथो तेजो वै हिरण्यं तेज एव आत्मन् धत्ते[३]" इति। हिरण्यरूपेण 'ज्योतिषा' मृत्युरूपस्य तमसो विनाशनं युक्तम्। अपि च हिरण्यस्य तेजस्त्वात् आत्मनि 'तेजः' सम्पादयति। तदेतत् ब्राह्मणं सर्वान्ते द्रष्टव्यम्।

* 'पूर्वम्' इति पाठो भवितुं युक्तः।

यदुक्तं सूत्रकारेण,—'सुवर्न घर्मः स्वाहेति पञ्चार्काऽऽहुतीर्जुहोति' इति। तदिदं विधातुं मन्त्रानुत्पादयति,—"सुवर्न घर्मः स्वाहा सुवर्न अर्कः स्वाहा सुवर्न शुक्रः स्वाहा सुवर्न ज्योतिः स्वाहा सुवर्न सूर्यः स्वाहा[४]" इति। 'सुवर्न' स्वर्ग इव, यथा स्वर्गे अवस्थिता देवाः दीप्यमानाः, एवं 'घर्मः' दीप्यमानो योऽग्निः, तस्मै 'स्वाहा' हुतमस्तु। एवमुत्तरत्रापि योज्यम्। 'अर्कः' अर्चनीयः। 'शुक्रः' अतिनिर्मलः। 'ज्योतिः' प्रकाशरूपः। 'सूर्यः' सूर्यवर्णः आदित्यरूपः।

एतैर्मन्त्रैर्होमं विधत्ते,—"अर्को वै एष यदग्निः असौ आदित्यः अश्वमेधः यत् एताः आहुतीर्जुहोति अर्काश्वमेधयोरेव ज्योतींष्यवरुन्धे एष ह वै अर्काश्वमेधौ यस्य एतत् अग्नौ क्रियते[५]" इति। योऽयं चीयमानः 'अग्निः' क्रतुसाधनभूतः, 'एषः' अर्चनीयत्वात् 'अर्कः' इत्युच्यते। योऽयम् 'आदित्यः', स एष क्रतुफलरूपत्वात् 'अश्वमेधः' इत्युच्यते। 'सुवर्न' इत्येतन्मन्त्रहोमेन 'अर्काश्वमेधयोः' अग्न्यादित्ययोः यानि 'ज्योतींषि' तानि सम्पादयति। 'यस्य' यजमानस्य अग्निचयने तत् 'एतत्' आहुतिपञ्चकं 'क्रियते', स 'एषः' एव यजमानः 'अर्काश्वमेधौ' क्रतुसाधन-तत्फलाभ्यामुपेतः। एतच्च ब्राह्मणं "अग्निर्देवेभ्यः"(५।४।९) इत्यनुवाकान्ते द्रष्टव्यम्।

अथ चितीनां पञ्चानां प्रशंसा। तत्र प्रथमाञ्चितिं प्रशंसति,—"आपो वै इदमग्रे सलिलमासीत् स एतां प्रजापतिः प्रथमां चितिम् अपश्यत् ताम् उपाधत्त तत् इयम् अभवत्[६]" इति। यदिदं भूम्यन्तरिक्षादिरूपं जगत्, तद् 'इदं' सृष्टेः प्राक् अनेन रूपेण विश्वतं नासीत्, किन्तु 'आपः' एव आसीत्। तासु अप्सु भूतान्तरं

न मिलितम्, किन्तु नैरन्तर्येण 'सलिलम्' एव 'आसीत्'। तदानीं 'प्रजापतिः' अवस्थातुमाधारः को वा भविष्यति ?—इति विचार्य 'एतां' 'प्रथमाचितिं' दृष्ट्वा 'उपाधत्त'। तदानीं सा चितिः 'इयं' भूमिरूपा 'अभवत्', तत्रायं प्रजापतिरवस्थितः।

अथ द्वितीयाचितिं प्रशंसति, -"तं विश्वकर्मा अब्रवीत् उप त्वा आयानि इति नेह लोकः अस्ति इति अब्रवीत् स एतां द्वितीयां चितिम् अपश्यत् ताम् उपाधत्त तत् अन्तरिक्षम् अभवत्[७]" इति। विश्वकर्माख्यः कश्चित् अन्यः अवस्थातुमाधारम् अलभमानः 'तं' भूमौ अवस्थितं प्रजापतिम् इदम् 'अब्रवीत्',—अहमपि त्वाम् 'उप' आगच्छानि त्वत्समीपे उपविशानि 'इति'। स च प्रजापतिः 'इह' भूमौ तव अवकाशो 'न' 'अस्ति' 'इति' 'अब्रवीत्'। ततः 'सः' विश्वकर्मा स्वस्याधारः को भविष्यति ?—इति विचार्य 'एतां' 'द्वितीयाचितिं' दृष्ट्वा 'ताम्' 'उपाधत्त'। तदानीं सा द्वितीया चितिः 'अन्तरिक्षम्' 'अभवत्'। तत्रायं विश्वकर्मा अवस्थितः।

अथ दिश्याख्या इष्टकाः प्रशंसति,—"स यज्ञः प्रजापतिम् अब्रवीत् उप त्वा आयानि इति नेह लोकः अस्ति इति अब्रवीत् स विश्वकर्माणम् अब्रवीत् उप त्वा आयानि इति केन मा उपेष्यसि इति दिश्याभिः इति अब्रवीत् तं दिश्याभिः उपैत् ताः उपाधत्त ता दिशः अभवन्[८]" इति। यज्ञाख्येन पुरुषेण स्थाने पृष्टे सति प्रजापतिः परिजहार। विश्वकर्मा तु 'केन' उत्कोचरूपेण साधनेन मह मां प्रत्यागमिष्यसि ?—इति पप्रच्छ। स च यज्ञः 'दिश्याभिः' इष्टकाभिः सह आगमिष्यामि—इत्युक्त्वा तथैव

गतवान्। "राज्ञ्यसि प्राची दिक्" (४।४।२) इत्यादिभिर्मन्त्रैर्दिक्षु उपधेया 'दिशाः', 'ताः' च उपहिताः सत्यो दिव्यूपाः 'अभवन्'। ततो यज्ञस्य अवकाशोऽभूत्।

अथ तृतीयाग्निचितिं प्रशंसति,—"स परमेष्ठी प्रजापतिमब्रवीत् उप त्वा आयानि इति नेह लोकः अस्ति इति अब्रवीत् स विश्वकर्माणं च यज्ञञ्च अब्रवीत् उप वाम् आयानि इति नेह लोकः अस्ति इति अब्रूताम् स एतां तृतीयां चितिम् अपश्यत् ताम् उपाधत्त तत् असौ अभवत्[९]" इति। प्रजापतिर्विश्वकर्मा परमेष्ठी—इत्येते त्रयोऽपि एतस्यैव* मूर्त्तिभेदाः। तच्च परमेष्ठिना प्रार्थितः प्रजापतिः भूमौ अवकाशम् अदत्त्वा परिजहार; विश्वकर्मा यज्ञस्य—इत्येतावपि अन्तरिक्षे दिक्षु च अवकाशमदत्त्वा परिजह्रतुः। ततः परमेष्ठी विचार्य 'तृतीयाग्निचितिं' दृष्ट्वा 'उपाधत्त'। सापि चितिर्द्यौः 'अभवत्'। तत्रायं परमेष्ठी स्वयमवस्थितः।

अथ लोकंपृणेष्टकां प्रशंसति,—"स आदित्यः प्रजापतिम् अब्रवीत् उप त्वा आयानि इति नेह लोकः अस्ति इति अब्रवीत् स विश्वकर्माणञ्च यज्ञञ्च अब्रवीत् उप वाम् आयानि इति नेह लोकः अस्ति इति अब्रूताम् स परमेष्ठिनम् अब्रवीत् उप त्वा आयानि इति केन मा उपैष्यसि इति लोकंपृणया इति अब्रवीत् तं लोकंपृणया उपैत् तस्मात् अयातयामा लोकंपृणा अयातयामा हि असौ आदित्यः[१०]" इति। 'स आदित्यः' लोकंपृणाम् आनीतवान्। तस्याम् उपहितायाम् आदित्यस्य

* 'एकस्यैव' इति पाठो भवितुं युक्तः।

अवकाशोऽभूत्। यस्मादियमादित्येन आनीता, 'तस्मात्' अगतसारा 'लोकंपृणा'; आदित्योऽपि अगतसारः पुनःपुनरावर्त्तमानोऽपि तस्मिन् जगदुपकारकस्य प्रकाशरूपस्य सारस्य अक्षीयमाणत्वात्। आदित्यवत् लोकंपृणा पुनःपुनः प्रयुज्यमानापि अक्षीयमाणसारा। यत्र यत्र* क्षितौ छिद्रमस्ति, तत्र तत्र लोकंपृणा प्रयुज्यते।

अथ चतुर्थपञ्चमचितौ प्रशंसति, "तान् ऋषयः अब्रुवन् उप वः आयाम इति केन न उपैष्यथ इति भूम्ना इति अब्रुवन् तान् द्वाभ्यामिष्टकाभ्याम् उपाधत्त सः पञ्चचितीकः समपद्यत[११]" इति। 'तान्' प्रजापति-विश्वकर्म-यज्ञ-परमेष्ठ्यादित्यान् अन्ये केचित् 'ऋषयः' स्वामं प्रार्थितवन्तः; ततः प्रजापत्यादिभिरुत्कोचे याचिते सति उत्कोचबाहुल्यं प्रतिज्ञाय चितिद्वयमानीतवन्तः। अतस्तेषामवकाशोऽभूत्। तदेवं प्रशस्ताभिश्चितिभिः अयमग्निः 'पञ्चचितीकः' अभूत्।

एतद्वेदनपूर्वकमनुष्ठानं प्रशंसति,—"य एवं विद्वान अग्निं चिनुते भूयान् एव भवति अभि इमान् लोकान् जयति विट् एनं देवाः अथो एतासामेव देवतानाꣳ सायुज्यं गच्छति[१२]" इति। विद्यादि-गुणसमृद्धिः भूयस्त्वम्। लोकत्रयस्य स्वाधीनत्वं जयः। देवैर्वेदनं नाम एतदीया कीर्त्तिः†। अपि च 'एतासां' 'देवतानां' सहभावं प्राप्नोति।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके पञ्चमोऽनुवाकः ॥०॥

---

* 'यत्र क्वच' इति आदर्शादिपुस्तकपाठो न सम्यक्।
† 'ऐक्षतदीया कीर्त्तिः' इति का० की० पु० पाठः।

वयो वा अग्निर्यदग्निचित्यक्षिणोऽश्नीयात्तमेवाग्नि-मद्यादात्तिमार्च्छेत् संवत्सरं व्रतञ्चरेत् संवत्सरꣳ हि व्रतं नाति[1] पशुर्वा एष यदग्निर्हिनस्ति खलु वै तं पशुर्य एनं पुरस्तात् प्रत्यञ्चमुपचरति तस्मात् पश्चात् प्राङुपचर्य आत्मनोऽहिꣳसायै[2] तेजोऽसि तेजो मे यच्छ पृथिवीं यच्छ ॥ १ ॥

पृथिव्यै मा पाहि ज्योतिरसि ज्योतिर्मे यच्छान्तरिक्षं यच्छान्तरिक्षान्मा पाहि सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहि[3] इत्याहैताभिर्वा इमे लोका विधृता यदेता उपदधात्येषां लोकानां विधृत्यै[4] स्वयमातृण्णा उपधाय हिरण्येष्टका उप दधातीमे वै लोकाः स्वय-मातृण्णा ज्योतिर्हिरण्यं यत्स्वयमातृण्णा उपधाय ॥ २ ॥

हिरण्येष्टका उपदधातीमानेवैताभिर्लोकान् ज्योति-ष्मतः कुरुतेऽथो एताभिरेवास्मा इमे लोकाः प्रभान्ति[5] यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः। ताभिः सर्वाभी रुचे जनाय नस्कृधि[6]। या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः। इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते[7]। रुचं नो धेहि ॥ ३ ॥

ब्राह्मणेषु रुचꣳ राजसु नस्कृधि। रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचं[8] देवा वा अग्निं चिक्यानस्य

यश इन्द्रियं गच्छत्यग्निं वा चितमीजानं वा यदेता आहुतीर्जुहोत्यात्मन्नेव यश इन्द्रियं धत्ते[९] ईश्वरो वा एष आर्तिमार्तोर्योऽग्निं चिन्वन्नधिक्रामति तच्चा यामि ब्रह्मणा वन्दमान इति वारुण्यर्चा ॥ ४ ॥

जुहुयाच्छान्तिरेवैषाग्नेर्गुग्निरात्मनः[१०] हविष्कृतो वा एष योऽग्निं चिनुते यथा वै हविस्कन्दत्येवं वा एष स्कन्दति योऽग्निं चित्वा स्त्रियमुपैति मैचावरुण्यामिक्षया यजेत मैचावरुणतामेवोपैत्यात्मनोऽस्कन्दाय[११] यो वा अग्नि-मृतुस्थां वेदर्तुर्ऋतुरस्मै कल्पमान एति प्रत्येव तिष्ठति संवत्सरो वा अग्निः ॥ ५ ॥

ऋतुस्थास्तस्य वसन्तः शिरो ग्रीष्मो दक्षिणः पक्षो वर्षाः पुच्छꣳ शरदुत्तरः पक्षो हेमन्तो मध्य पूर्वपक्षा-श्चितयोऽपरपक्षाः पुरीषमहोरात्राणीष्टका एष वा अग्निर्ऋतुस्था य एवं वेदर्तुर्ऋतुरस्मै कल्पमान एति प्रत्येव तिष्ठति[१२] प्रजापतिर्वा एतं ज्यैष्ठ्यकामो न्यधत्त ततो वै स ज्यैष्ठ्यमगच्छद्य एवं विद्वानग्निं चिनुते, ज्यैष्ठ्यमेव गच्छति[१३] ॥ ६ ॥

पृथिवीं यच्छ। यत्त्वयमातृण्णा उपधाय। धीष्टं। ऋचा। अग्निः। चिनुते। वीणि च ॥ ६ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके षष्ठोऽनुवाकः ॥०॥

पुनःपरीन्धनाद्यच पञ्चमे समुदीरितम्।

अथ षष्ठे व्रतचरणादिकमभिधीयते।

यदुक्तं सूचकारेण,—'संवत्सरं न किञ्चन प्रत्यवरोहेन्न च रात्रामुपेयान्न पक्षिणोऽश्नीयात्' इत्यादि। तत्र पक्ष्यग्रननिषेधरूपं संवत्सरव्रतं विधत्ते,—"वयो वै अग्निः यत् अग्निचित् पक्षिणः अश्नीयात् तमेवाग्निम् अद्यात् आर्त्तिमार्च्छेत् संवत्सरं तं चरेत् संवत्सरꣳ हि व्रतं न अति(१)" इति। योऽयं चीयमानः 'अग्निः' स पक्षिस्वरूप एव। "वयसां वा एष प्रतिमया चीयते" (५।५।३।२) इति पूर्वमुक्तम्। एवं सति अयम् 'अग्निचित्' यदि 'पक्षिणः' भक्षयेत्, तर्हि 'अग्निम् एव' भक्षितवान् भवति। ततो म्रियेत। अतस्तत्परिहाराय संवत्सरमाचं पक्षिभक्षणवर्जनरूपं 'व्रतं' 'चरेत्'। तस्मात् संवत्सरमतीत्य व्रतचरणं न क्वापि दृष्टम् तस्मात्तद्व्रतपर्याप्तम् एतद्ब्राह्मणं, पूर्वोक्तञ्च (५।७।५।५) चिति-प्रशंसारूपं ब्राह्मणं सर्व्वान्ते द्रष्टव्यम्।

अथ चित्यारोहणस्य पश्चिमदिङ्नियमं विधत्ते,—'पशुर्वै एष यदग्निर्हिनस्ति खलु वै तं पशुः य एनं पुरस्तात् प्रत्यञ्चम् उपचरति तस्मात् पश्चात् प्राङ् उपचर्य आत्मनः अहिꣳसायै(२)" इति। अग्नेः पशुरूपत्वात् पुरस्तात् आरोहणे यथा पशुः मुखाभ्यां हिनस्ति तद्वत् अयमपि हिंस्यात्। 'तस्मात्' पश्चिमायां दिशि प्राङ्मुखः 'उपचर्य' आरोहणीयः। तच्च 'आत्मनः' आरोढुः अहिंसार्थं भवति एतच्च "अग्ने तव श्रवो वयः" (५।२।१।६) इत्यनुवाके द्रष्टव्यम्।

यदुक्तं सूचकारेण,—'तेजोऽसि तेजो मे यच्छेति हिरण्मेष्टकाम्'—

इति, 'ज्योतिरसि ज्योतिर्मे यच्छेति हिरण्मेष्टकाम्' इति च, 'सुवरसि सुवर्मे यच्छेति हिरण्मेष्टकाम्' इति च। तदेतद्विधातुं मन्त्रानुत्पादयति,—"तेजोऽसि तेजो मे यच्छ पृथिवीं यच्छ पृथिव्यै मा पाहि ज्योतिरसि ज्योतिर्मे यच्छ अन्तरिक्षं यच्छ अन्तरिक्षात् मा पाहि सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहि[२]" इति। प्रथमचितौ उपधातव्ये हे हिरण्मेष्टके, त्वं तेजोरूपासि। 'मे' मदर्थं 'तेजः' देहि। तथा 'पृथिवीं' देहि। यद्वा पृथिवीं मदुपकारित्वेन नियमय। तस्याः पृथिव्याः सकाशान्मां 'पाहि', यथा पृथिवी नोपद्रवं करोति तथा कुरु। एवं तृतीयपञ्चमचितिविषययोरुत्तरयोर्मन्त्रयोर्योज्यम्। 'सुवः' स्वर्गसुखम्। 'दिवं' द्युलोकम्।

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते,—"इत्याह एताभिर्वै इमे लोकाः विधृताः यत् एताः उपदधाति एषां लोकानां विधृत्यै[४]" इति। इत्युक्तान् मन्त्रानुपधानकाले पठेत्। 'एताभिः' हिरण्मेष्टकाभिः 'इमे' त्रयो 'लोकाः' 'विधृताः'। अतः एतदुपधानं लोकधृत्यै भवति।

अस्योपधानस्य तत्तच्चितिगतस्वयमातृण्णाभ्य ऊर्ध्वकालं विधत्ते,—"स्वयमातृण्णा उपधाय हिरण्मेष्टका उप दधाति इमे वै लोकाः स्वयमातृण्णा ज्योतिर्हिरण्यं यत् स्वयमातृण्णाः उपधाय हिरण्मेष्टकाः उपदधाति इमान् एव एताभिर्लोकान् ज्योतिष्मतः कुरुते अग्ने एताभिरेव अग्ने इमे लोकाः प्र भासि[५]" इति। एतच्च "स्वयमातृण्णाम्" (५।२।८) इत्यनुवाके द्रष्टव्यम्।

यदुक्तं सूचकारेण,—'यासो अग्ने सूर्ये रुचो दिवि तिस्रो रुचो'

दृति। रुगाख्या आहुतीर्जुहुयादित्यर्थः। तत्र प्रथमामाह,—"याते अग्ने सूर्य रुचः उद्यतो दिवम् आतन्वन्ति रश्मिभिः ताभिः सर्वाभिः रुचे जनाय नः कृधि[१]" दृति। हे 'अग्ने', 'सूर्य' सूर्यमण्डले स्थितस्य 'ते' तव 'उद्यतः' उदयं गच्छतः 'याः' 'रुचः' दीप्तयः 'दिवं' द्युलोकम् 'आतन्वन्ति' सर्वतो व्याप्नुवन्ति, 'ताभिः' 'सर्वाभिः' 'रश्मिभिः' 'नः' 'जनाय' अस्मदीयजनार्थं 'रुचे' 'कृधि' रुचं दीप्तं कुरु।

अथ द्वितीयामाह,—"या वो देवाः सूर्य रुचः गोषु अश्वेषु या रुचः दून्द्राग्नी ताभिः सर्वाभिः रुचं नः धत्त बृहस्पते[२]"—दृति। हे 'देवाः', 'वः' युष्माकं सम्बन्धिन्यः सूर्यमण्डले 'याः' 'रुचः' दीप्तयो वर्त्तन्ते, तथा 'गोषु' 'अश्वेषु' च 'या रुचः' वर्त्तन्ते, हे 'दून्द्राग्नी', 'ताभिः सर्वाभिः' दीप्तिभिः 'नः' अस्मदर्थं 'रुचं' 'धत्त' दीप्तं कुरुत।

अथ तृतीयामाह,—"रुचं नो धेहि ब्राह्मणेषु रुचꣳ राजसु नः कृधि रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम्[३]"—दृति। हे अग्ने, 'नः' अस्मदीयेषु 'ब्राह्मणेषु' 'रुचं' 'धेहि' प्रकाशं कुरु। 'नः' अस्मदीयेषु 'राजसु' 'रुचं' 'कृधि' प्रकाशं कुरु। तथा 'विश्येषु' वैश्येषु 'शूद्रेषु' च 'रुचं' प्रकाशं कुरु। तथा च 'रुचा' त्वदीयया दीप्त्या 'मयि' 'रुचं' 'धेहि' प्रकाशं कुरु।

एतेर्मन्त्रैः साध्यं स्तोमं विधत्ते,—"त्रेधा वै अग्निं चिक्यानस्य यज्ञः दून्द्रियं गच्छति अग्निं वा चितम् ईजानं वा यदेता आहुतीः जुहोति आत्मन्नेव यज्ञः दून्द्रियं धत्ते[४]" दृति। यो यजमानः

अग्निं चितवान् तस्य 'यशः' कीर्तिः 'इन्द्रियं' सामर्थ्यं वा अन्यत्र गच्छति। कुत्र? इति चेत्। श्रूयताम्, योऽयमिदानीं चितः अग्निः तं वा प्राप्नोति। यस्तु ईजानः पूर्वं चिते अग्नौ यागं कृतवान् तं वा प्राप्नोति। सर्वथापि अस्मद्यजमानात् अपगच्छति। एतैर्मन्त्रैर्होमे तु तत् 'यशः' इन्द्रियं च स्वात्मन्येव धारयति। एतच्च "अग्निर्देवेभ्यः" (५।४।८) इत्यनुवाकादूर्ध्वं द्रष्टव्यम्।

यदुक्तं सूत्रकारेण,—'तत्त्वा यामि ब्रह्मणा वन्दमान इति ग्रालामुखीये ऊक्त्वा' इति। तदिदं विधत्ते,—"ईश्वरो वै एष आर्तिम् आ अर्तोः यः अग्निं चिन्वन् अधिक्रामति तत् त्वा यामि ब्रह्मणा वन्दमान इति वारुण्या ऋचा जुहुयात् ग्लानिरेव एषा अग्नेर्गुप्तिः आत्मनः(१०)" इति। 'यः' यजमानः चयनकाले 'अग्निम्' अधिरुह्य पादेनाक्रामति, 'एषः' यजमानो विनाशं प्राप्तुं समर्थः। तत्परिहाराय 'तत्त्वा यामि'-इति 'ऋचा' जुहुयात्। सेयम् ऋक् "इन्द्रं वो विश्वतस्परीन्द्रं नरः" (२।१।११) इत्यनुवाके व्याख्याता। 'एषा' आहुतिः 'अग्नेः' ग्रमनहेतुः, 'आत्मनः' यजमानस्य च रक्षणहेतुः। तच्च "अग्ने तव श्रवो वयः" (५।२।६) इत्यनुवाके द्रष्टव्यम्।

यथाग्निचयनादूर्ध्वं तदङ्गत्वेन मौचामणी पूर्वं विहिता एवमेव मैचावरुणीं विधत्ते,—"हविष्कृतो वै एष योऽग्निं चिनुते यथा वै हविः स्कन्दति एवं वै एष स्कन्दति योऽग्निं चित्वा स्त्रियम् उपैति मैचावरुण्या आमिक्षया यजेत मैचावरुणताम् एव उपैति आत्मनः अस्कन्दाय(११)" इति। 'यः' यजमानः 'अग्निं' 'चिनुते',

'एषः' हविःस्वरूपं प्राप्नः। तथा सति स्त्रीगमनस्य स्वरूपनाशो हविर्नाशसमानः। अतस्तत्परिहारार्थं 'यजेत'। तेन यागेन स्वयं मित्रावरुणसम्बन्धितां प्राप्य यागादूर्ध्वं हविषः उपयुक्तत्वात् हविःस्थानीयस्य स्वस्य गमनेऽपि नास्ति विनाशः।

अथ अग्निं संवत्सररूपकल्पनया प्रशंसति,—"यो वै अग्निम् ऋतुस्थां वेद ऋतुः ऋतुः अस्मै कल्पमानः एति प्रति एव तिष्ठति संवत्सरो वै अग्निः ऋतुस्थाः तस्य वसन्तः शिरः ग्रीष्मो दक्षिणः पक्षः वर्षाः पुच्छꣳ शरत् उत्तरः पक्षः हेमन्तो मध्यं पूर्वपक्षाश्चितयः अपरपक्षाः पुरीषम् अहोरात्राणि इष्टका एष वै अग्निः ऋतुस्था यम् एव वेद ऋतुः ऋतुः अस्मै कल्पमानः एति प्रति एव तिष्ठति[१२]" इति। ऋतुषु तिष्ठतीति ऋतुस्थाः संवत्सरः। तद्रूपम् 'अग्निं' 'यः' 'वेद' मनसा भावयेत्, 'अस्मै' यजमानाय स स ऋतुः स्वोचित-भोगप्रदानसमर्थः सन् एनं प्राप्नोति। तद्भोगेन च अयं 'प्रति'-'तिष्ठति'। 'संवत्सरो वै अग्निः' इत्यादि भावनाप्रकारः। 'य एवं वेद' इत्यादि पूर्वोक्तफलोपसंहारः।

अथ फलान्तरेण प्रशंसति, "प्रजापतिर्वै एतं ज्यैष्ठ्यकामो न्यधत्त ततो वै स ज्यैष्ठ्यमगच्छत् य एवं विद्वान् अग्निं चिनुते ज्यैष्ठ्यमेव गच्छति[१३]"—इति। 'न्यधत्त' चितवानित्यर्थः। 'ज्यैष्ठ्यं' वयोगुणाभ्यामाधिक्यम्। एतच्च सर्वमन्त्रे द्रष्टव्यम्।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके षष्ठोऽनुवाकः॥ ०॥

यदाकूतात्समसुस्रोद्धृदो वा मनसो वा संभृतश्चक्षुषो वा। तमनु प्रेहि सुकृतस्य लोकं यत्रर्षयः प्रथमजा ये पुराणाः[१]। एतꣳ सधस्थ परि ते ददामि यमावहाच्छेवधिं जातवेदाः अन्वागन्ता यज्ञपतिर्वो अत्र तꣳ स्म जानीत परमे व्योमन्[२]। जानीतादेनं परमे व्योमन् देवाः सधस्था विद रूपमस्य। यदागच्छात् ॥ १ ॥

पथिभिर्देवयानैरिष्टापूर्त्ते कृणुतादाविरस्मै[३]। सं प्र ञ्चवध्वमनु सं प्र याताग्ने पथो देवयानान् कृणुध्वम्। अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत[४]। प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा। ऋचेमं यज्ञं नो वह सुवर्देवेषु गन्तवे[५]। यदिष्टं यत् परादानं यद्दत्तं या च दक्षिणा तत् ॥ २ ॥

अग्निर्वैश्वकर्मणः सुवर्देवेषु नो दधत्[६]। येना महस्रं वहसि येनाग्ने सर्ववेदसं। तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे[७]। येनाग्ने दक्षिणा युक्ता यज्ञं वहन्त्यृत्विजः। तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे[८]। येनाग्ने सुकृतः पथा मधोर्धारा व्यानशुः। तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे[९]। यच्च धारा अनपेता मधोर्घृतस्य च याः। तदग्निर्वैश्वकर्मणः सुवर्देवेषु नो दधत्[१०]॥ ३ ॥

आगच्छात्। तद्। व्यानशुः। तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे। चतुर्दश च ॥ ७ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके सप्तमोऽनुवाकः ॥

व्रतेष्टकाप्रशंसा हि सर्वाः षष्ठे समीरिताः।

अथ सप्तमे आकूतिमन्त्रा उच्यन्ते। यदुक्तं सूत्रकारेण,—'यदाकूतादिति। दशाकूतीर्जुहोति'।

तत्र प्रथमामाह,—"यद् आकूतात् समसुस्रोत् हृदो वा मनसो वा संभृतं चक्षुषो वा। तमनु प्रेहि सुकृतस्य लोकं यत्र ऋषयः प्रथमजाः ये पुराणाः[१]" इति। आकूतादिभिः 'सम्भृतं' सम्पादितं यत्फलं पूर्वो यजमानसङ्घः 'समसुस्रोत्' संम्यक् प्राप्तवान्। हे यजमान, त्वं 'सुकृतस्य लोकं' त्वदीयस्य कर्मणः फलभूतं 'तं' भोगम् 'अनु प्रेहि' अनुक्रमेण प्राप्नुहि। आकूतं संकल्पः अक्षयं सुखं प्राप्नोमीत्येवंरूपः। हृदयं चित्तं श्रुतिस्मृत्युदितसाधनोपायचिन्तनम्। मनः अन्तःकरणं तदनुकूलप्रवृत्तिनिवृत्त्यात्मकम्। चक्षुषः चक्षुषा लक्ष्यन्ते यानि सम्यगनुष्ठानेनाभिमतं फलं साधयन्ति। एतैः सर्वैः सम्पादितं प्राप्नुहीत्यन्वयः। 'यत्र' यस्मिन् सुकृतस्य लोके 'प्रथमजाः' स्वयम्भूप्रभृतयः 'ऋषयः' सर्वज्ञाः आसते। 'ये' च 'पुराणाः' पूर्वे यजमानाः सन्ति, तेऽपि यत्र आसते, 'तम्' 'अनु-प्रेहि'।

अथ द्वितीयामाह,—"एतꣳ सधस्थ परि ते ददामि यम् आवहात् प्रेवधिं जातवेदाः। अन्वागन्ता यज्ञपतिर्वः अत्र तꣳ स

जानीत परमे व्योमन्[२]" इति। हे 'सधस्थ' ऋत्विग्यजमानैरस्माभिः सह अस्यां यज्ञभूमाववस्थित, हे अग्ने, 'ते' तुभ्यं 'एतं' यजमानं 'परि'-'ददामि' रक्षार्थं त्वद्भक्ते ददामीत्यर्थः। 'जातवेदाः' उत्पन्नानां प्राणिनां योगक्षेमाभिज्ञः त्वं 'ग्रेवधिं' निधिवद्रक्षणीयं, 'यं' यजमानम् 'आवहात्' आवहसि,—मदीयोऽयमिति स्वीकरोषि, तं यजमानं परिददामीति पूर्वत्राऽन्वयः। हे देवाः, 'यज्ञपतिः' अयं यजमानः 'वः' युष्मान् 'अभ्यागन्ता' युष्माकं पृष्ठे आगमिष्यति। 'अत्र' अस्मिन् 'परमे' 'व्योमन्' उत्कृष्टविग्रिष्टरक्षणयोग्ये स्थाने भवदीये लोके 'तं' यजमानं 'जानीत' 'स्म' सर्वथा रक्षणीयोऽयमिति स्मरत।

अथ द्वतीयामाह,—"जानीतात् एनं परमे व्योमन् देवाः सधस्था विद् रूपम् अस्य यत् आगच्छात् पथिभिर्देवयानैः दृष्टापूर्त्तं कृणुतात् आविरस्मै[३]" इति। हे देवाः, 'परमे' स्थाने भवदीये लोके 'एनं' 'जानीतात्' यजमानम् अविस्मृत्य सर्वदा रक्षार्थं स्मरत। हे 'सधस्थाः' यजमानेन सह तस्मिन् पुण्यलोके स्थिताः, देवाः, 'अस्य' यजमानस्य, 'रूपं' अग्निचयनाद्यनुष्ठानयुक्तं स्वरूपं 'विद' जानीत,—तस्मिन् लोके पुनः पुनः स्मरत। 'देवयानैः' भवदीयगमनयोग्यैः 'पथिभिः' मार्गैः, 'यत् आगच्छात्' यो यजमान आगच्छति, 'अस्मै' एतद्-यजमानार्थं, 'दृष्टापूर्त्तं' श्रौतस्मार्तकर्मफलं, 'आविः'-'कृणुयात्' प्रकटीकुरुत, हे यजमान, तवेदं श्रौतकर्मफलं, इदं च स्मार्त्तकर्मफलमित्येवं सावधाना अनुपश्यतेत्यर्थः।

अथ चतुर्थीमाह,—"मं प्र यवध्वमनु मं प्र यातामग्ने पथो देव-

यानान् कृणुध्वं। अस्मिन् सधस्थे अधि उत्तरस्मिन् विश्वे देवा यजमानश्च सीदत[४]" इति। हे 'अग्ने', त्वं, 'विश्वे देवाः' सर्वेऽपि देवाः, यजमान इत्येते यूयं सर्वेऽपि 'सं प्र-च्यवध्वं' अस्मात् भूलोक-'स्थानात् सम्यक् प्रचलिता* च 'अनु- सं प्र यात' अनन्तरं यजमानेन सङ्गता एव गच्छत, गमनकाले च 'देवयानान्' 'पथः' 'कृणुध्वं'। न तु नरकलोकमनुष्यलोकमार्गः कर्त्तव्यः। 'सधस्थे' यजमानेन सहावस्थानयोग्ये 'अस्मिन्' यज्ञभूमिरूपे भूलोके 'अधि' 'उत्तरस्मिन्' फलभोगस्थाने, स्वर्गलोके च 'सीदत' यजमानो यूयं च सह तिष्ठत।

अथ पञ्चमीमाह,—"प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा। ऋचेमं यज्ञं नो वह सुवर्देवेषु गन्तवे[५]" इति। हे अग्ने, प्रस्तरादिभिः सर्वैर्यज्ञसाधनैः सहितं नः अस्मदीयम् इमं यज्ञं 'सुवः' स्वर्गलोके 'वह' प्रापय। किमर्थं ?—'देवेषु गन्तवे' देवानां मध्ये गन्तुं, तेषां प्रदर्शनार्थमित्यर्थः।

अथ षष्ठीमाह,—"यदिष्टं यत्परादानं यद्दत्तं या च दक्षिणा तदग्निर्वैश्वकर्मणः सुवर्देवेषु नो दधत्[६]" इति। दर्शपूर्णमासादिरूपं 'यत्' कर्म 'इष्टम्' अनुष्ठितं, 'यत्' च 'परादानं' दीनान्धकृपणादिभ्यः स्वल्पदानं, 'यत्' अपि 'दत्तं' बर्हिर्वेदिपाचभूतेभ्योऽनूचानेभ्यो वस्तु द्रव्यं समर्पितं, 'या च' अन्या 'दक्षिणा' यज्ञमध्ये गवादिरूपा दत्ता,

* एवमेव सर्व्वत्र पाठः। 'प्रचलत, चलिता च' इत्येवंरूपः कश्चित् पाठः पतित इव प्रतिभाति।

'नः' अस्मदीयं 'तत्' सर्वं 'वैश्वकर्मणः' कृत्स्नकर्मस्वामिभूतोऽयम् 'अग्निः' 'सुवर्देवेषु' स्वर्गलोकनिवासिषु मध्ये 'दधत्' स्थापयतु।

अथ सप्तमीमाह,—"येना सहस्रं वहसि येनाग्ने सर्ववेदसन्तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे[७]" इति। हे 'अग्ने', त्वं 'येन' मार्गेण 'सहस्रं' 'वहसि' सहस्रदक्षिणाकं यज्ञं नयसि; 'येन' च 'सर्ववेदसं' सर्वस्वदक्षिणाकं यज्ञं नयसि, 'तेन' मार्गेण 'नः' अस्मदीयम् 'इमं' 'यज्ञं' 'वह'। 'नय सुवः' इत्यादि पूर्ववत्।

अथाष्टमीमाह,—"येनाग्ने दक्षिणाः युक्ताः यज्ञं वहन्ति ऋत्विजः। तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे[८]" इति। 'ऋत्विजः' सर्वे 'युक्ताः' योग्याः शास्त्रीयाः 'दक्षिणाः' 'यज्ञं' च 'इमं' येन शास्त्रीयेण मार्गेण 'वहन्ति' निर्वहन्ति अनुतिष्ठन्तीत्यर्थः, 'तेन' एव शास्त्रीयेण मार्गेण 'इमं यज्ञम्' इत्यादि पूर्ववत्।

अथ नवमीमाह,—"येनाग्ने सुकृतः पथा मधोर्धारा व्यानशुः। तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे[९]" इति। हे 'अग्ने', 'सुकृतः' पूर्वं पुण्यकृतो* यजमाना 'येन' मार्गेण गत्वा 'मधोः' मधुरस्य पीयूषस्य 'धारा' 'व्यानशुः' व्याप्तवन्तः। तेनेत्यादि पूर्ववत्।

अथ दशमीमाह,—"यत्र धारा अनपेता मधोः घृतस्य च याः तद्दग्निर्वैश्वकर्मणः सुवर्देवेषु नो दधद्[१०]" इति। 'यत्र' यस्मिन् लोके 'मधोः' माक्षिकस्य 'घृतस्य' च 'धाराः' 'अनपेताः' अविच्छिन्नाः, तत्र लोके 'अग्निः'-इत्यादि पूर्ववत्। एते च दश मन्त्राः पूर्वस्मिन् मन्त्रकाण्डे "समाग्ने (४।३।१४)" इत्यनुवाकादूर्ध्वं द्रष्टव्याः।

* पूर्वपुण्यकृत इति का० औ० पु० पाठः।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके सप्तमोऽनुवाकः ॥ ० ॥

यास्ते अग्ने समिधो यानि धाम या जिह्वा जातवेदो यो अर्चिः ये ते अग्ने मेडयो य इंदवस्तेभिरात्मानं चिनुहि प्रजानन्[१]। उत्सन्नयज्ञो वा एष यदग्निः किं वाहैतस्य क्रियते किं वा न यद्वा अध्वर्युरग्नेश्चिन्वनंतरेत्यात्मनो वै तदंतरेति यास्ते अग्ने समिधो यानि ॥ १ ॥

धामेत्याहैषा वा अग्ने स्वयञ्चितिरग्निरेव तदग्निं चिनोति नाध्वर्युरात्मनोन्तरेति[२] चतस्र आशाः प्र चरन्त्वग्नय इमन्वो यज्ञन्वयतु प्रजानन्। घृतं पिन्वन्नजरꣳ सुवीरं ब्रह्म समिद्भवत्याहुतीनां[३]। सुवर्गाय वा एष लोकायोपधीयते यत्कूर्मश्चतस्र आशाः प्र चरन्त्वग्नये इत्याह ॥ २ ॥

दिशा एवैतेन प्र जानाति[४] इमन्वो यज्ञं नयन्तु प्रजानन्नित्याह सुवर्गस्य लोकस्याभिनीत्यै[५] ब्रह्म समिद्भवत्याहुतीनामित्याह ब्रह्मणा वै देवाः सुवर्गं लोकमायन्[६] यद् ब्रह्मखत्योपदधाति ब्रह्मणैव तद् यजमानः

सुवर्गं लोकमेति[७] प्रजापतिर्वा एष यदग्निस्तस्य प्रजाः पशवश्छन्दांसि रूपꣳ सर्वाण्यर्णानिष्टकानां, कुर्याद् रूपेणैव प्रजान् पशूंश्छन्दांस्यव रुन्धे[८] अथो प्रजाभ्य एवैनं पशुभ्यश्छन्दोभ्योवरुध्य चिनुते ॥ ३ ॥

एति यास्ते अग्ने समिधो यानि। अग्नय इत्याह। इष्टकानाꣳ। षोडश च ॥ ८ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके अष्टमोऽनुवाकः ॥

आकूत्याऽऽकूतिमन्वा ये ते सप्तम उदीरिताः।

अथाष्टमे स्वयंचित्यादिकमभिधीयते। यदुक्तं सूत्रकारेण,—'यास्ते अग्ने समिध इति स्वयंचित्याभिमृशति' इति। तदेतदिधातुं मन्त्रमुत्पादयति,—"यास्ते अग्ने समिधो यानि धाम या जिह्वा जातवेदो यो अर्चिः। ये ते अग्ने मेडयो य इन्द्वस्तेभिरात्मानं चिनुहि प्रजानन्[१]" इति। हे 'जातवेदः' 'अग्ने', ते त्वदीयाः 'समिधः' समिन्धनक्रिया 'याः' सन्ति, 'यानि' च 'धाम' त्वदीयानि स्थानानि गार्हपत्यादीनि, 'या' च 'जिह्वा' त्वदीया 'काली कराली' इत्यादिकाः, 'यः' 'अर्चिः' प्रकाशनसामर्थ्यं, हे 'अग्ने', 'ते' त्वदीया 'ये' 'मेडयः', शब्दविशेषाः, 'ये' 'इन्द्वः' इन्दुसदृशा विस्फुलिङ्गाः, 'तेभिः' तैः सर्वैः प्रजानन्, चयनप्रकाराभिज्ञस्त्वं 'आत्मानं' 'चिनुहि' स्वकीयस्वरूपमुपचितं कुरु।

अनेन मन्त्रेण साध्यस्य चेत्राभिमर्शनस्य विधिमुन्नयति, "उत्सन्नयज्ञो वै एष यदग्निः किं वा अस्यैतस्य क्रियते किं वा न यदै अध्वर्युरग्नेश्चित्वन्नन्तरेत्यात्मनो वै तदन्तरेति यास्ते अग्ने समिधो यानि धामेत्याहैषा वै अग्नेः स्वयञ्चितिरग्निरेव तदग्निं चिनोति नाध्वर्युरात्मनोऽन्तरेति[१]" इति। योऽयञ्चीयमानोऽग्निः सोऽयम् 'उत्सन्नयज्ञः', बहुष्वङ्गेषु यस्य-कस्यचिद्विस्मृतिसम्भवेन विनष्ट-यज्ञत्वम्, अतः 'अस्य' यज्ञस्य 'किम्' अङ्गमनुष्ठितं 'किं वा' नेति ज्ञातुमशक्यम्। एवं च सति चिन्वानः अयम् 'अध्वर्युः' 'अग्नेः' सम्बन्धि 'यत्' 'अङ्गम्' अन्तरितं करोति, 'तत्' 'आत्मनः' एवाङ्गमन्तरितं कुर्यात्; अतस्तत्परिहाराय चेत्राभिमर्शनकाले 'यास्ते अग्ने' इत्येतामृचं ब्रूयात्। येयं 'यास्ते अग्ने'-इत्यृक्, सैषा 'स्वयञ्चितिः'-इत्यभिधीयते, 'आत्मानं चिनुहि' इत्येवं स्वेन स्वस्यैव चीयमानत्वाभिधानात्। तेन मन्त्रपाठेन 'तत्' 'अग्निः' 'एव' स्वयम् 'अग्निम्' स्वात्मानं 'चिनोति'। ततः 'अध्वर्युः' स्वसम्बन्धि किञ्चिदपि 'अङ्गं' 'न' 'अन्तरेति'। एतदपि 'अग्ने तव श्रवो वयः (५।२।६)" इत्यनुवाके द्रष्टव्यम्।

यदुक्तं सूचकारेण,—"'मधुवाता ऋतायते' इति तिसृभिर्द्रप्सा मधुमिश्रेण कूर्ममभ्यज्य 'महो द्यौः पृथिवी च न (४।२।८)' इति पुरस्तात्स्वयमातृण्णायाः प्रत्यञ्चं जीवन्तं कूर्मं प्राङ्मुखं उपदधाति इति। 'चतस्र आशाः प्र चरन्तु अग्नयः' इति वा उपधाय"-इति। तच कूर्मोपधाने विकल्पितं मन्त्रमुत्पादयति,—"चतस्र आशाः प्र चरन्तु अग्नय इमं नो यज्ञं नयतु प्रजानन्। घृतं पिन्वन्नजरꣳ सुवीरं ब्रह्म

समिद् भवति आकृतीनाम्[२]" इति। 'अग्नयः' आहवनीयादयः सन्ति, ते 'चतस्रः' चतुःसङ्ख्याका दिशः पूर्वाद्याः 'प्र चरन्तु' कूर्मस्य स्वर्गमार्गाभिज्ञानाय सर्वासु दिक्षु प्रकाशं कुर्वन्तु। अयं च कूर्मः 'प्रजानन्' अस्मदीयं कर्म प्रकर्षेण अवगच्छन्, 'नः' अस्मदीयमिमं यज्ञं 'नयतु' स्वर्गं प्रापयतु। किं कुर्वन्?—'अजरं' विनाशरहितं 'सुवीरं' शोभनवीर्यप्रदं। 'घृतं' मधुमिश्रमाज्यं, 'पिन्वन्' पिबन्, आकृतिप्रदानां यजमानानां 'ब्रह्म समिद्' 'भवति', मन्त्र एव स्वर्गमार्गप्रकाशको भवति। अनेन मन्त्रेण साध्यं कूर्मोपधानं पूर्वमेव विहितं "यज्जीवन्तं कूर्ममुपदधाति (५।८।२)" इति। अत्र तु मन्त्रमेतं विनियोक्तुमादौ तदर्थः प्रकाश्यते।

तत्र प्रथमपादस्य तात्पर्यं दर्शयति,—"सुवर्गाय वै एष लोकाय उपधीयते यत्कूर्मश्चतस्र आशाः प्रचरन्त्वग्नय इत्याह दिशा एवैतेन प्र जानाति[३]" इति। सुवर्गलोके नेतुमयं कूर्म उपधीयते, अतः मार्गाभिज्ञानाय एतेन पादेन दिक्प्रकाशनं प्रार्थ्यते।

द्वितीयपादस्य तात्पर्यं दर्शयति,—"इमं नो यज्ञं नयतु प्रजानन्नित्याह सुवर्गस्य लोकस्याभिनीत्यै[४]" इति। 'नयतु' इति सामान्येनोक्तोऽपि स्वर्गं प्रत्यवगमनमत्र विवक्षितम्।

चतुर्थपादस्य तात्पर्यं दर्शयति,—"ब्रह्म समिद्भवत्याकृतीनामित्याह ब्रह्मणा वै देवाः सुवर्गं लोकमायन्[५]" इति। आकृतिप्रदाः पूर्वे देवाः मन्त्रसामर्थ्येनैव स्वर्गं प्राप्ताः, अतो मन्त्र एव प्रकाशसाधनं।

व्याख्यातमेतं मन्त्रं विनियुङ्क्ते,—"यद् ब्रह्मणेत्या उपदधाति ब्रह्मणैव तद्यजमानः सुवर्गं लोकमेति[६]" इति। ब्रह्मशब्दो यस्माम्

ऋचि अस्ति सेयं ब्राह्मणवती। तदिदं ब्राह्मणं "स्वयमातृण्णामुपदधाति (५।२।८)"—इत्यनुवाके द्रष्टव्यम्।

यदुक्तं सूत्रकारेण,—'सर्वान्वर्णानिष्टकानां कुर्यात्तेषाधिकारो भवति इति विज्ञायते त्र या दक्षिणातस्त्रा दक्षिणत उपदध्यात् स व्यावृत उत्तरत ऋजुलेखाः पश्चात्पुरस्ताच्च अलिखिता मध्ये' इति। तदेतत्सर्वं विधत्ते,—"प्रजापतिर्वै एष यदग्निस्तस्य प्रजाः पशवश्छन्दाꣳसि रूपꣳ सर्वान् वर्णानिष्टकानां कुर्यादूपेणैव प्रजां पशून् छन्दांस्यव रुन्धे[८]" इति। चीयमानः 'अग्निः' प्रजापतिजन्यत्वात् 'प्रजापतिः' एव, 'तस्य' च प्रजापतेः प्रजा-पशु-च्छन्दांसि परस्परविलक्षणानि स्वरूपम्। अतस्तद्रूपप्रत्यभिज्ञानाय 'दृष्टकानां' 'सर्वान् वर्णान्' बहुविधरेखाविशेषान् 'कुर्यात्'। एवं सति प्रजापतिरूपेणैव प्रजापतिं प्राप्नोति।

"अथो प्रजाभ्य एवैनं पशुभ्यश्छन्दोभ्योऽवरुध्य चिनुते" इति। अपि च प्रजादिभिः 'एव' 'एनम्' अग्निं स्वाधीनं कृत्वा चितवान् भवति। एतदपि "स्वयमातृण्णामुपदधाति (५।२।८)" इत्यनुवाके द्रष्टव्यम्।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके अष्टमोऽनुवाकः ॥०॥

मयि गृह्णाम्यग्ने अग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय। मयि प्रजां मयि वर्चो दधाम्यरिष्टा स्याम तनुवा सुवीराः[१]। यो नो अग्निः पितरो हृत्स्वन्तर्मर्त्यो मर्त्याꣳ आविवेश। तमात्मन् परि गृह्णीमहे वयं मा सो अस्माꣳ अवहाय परा गात्[२]। यदध्वर्युरात्मन्नग्निमगृहीत्वाग्निं चिनुयाद्योऽस्य स्वोऽग्निस्तमपि॥१॥

यजमानाय चिनुयादग्निं खलु वै पशवोऽनूपं तिष्ठन्तेऽपक्रामुका अस्मात् पशवः स्युर्मयि गृह्णाम्यग्ने अग्निमित्याहात्मन्नेव स्वमग्निन्दाधार नास्मात् पशवोऽपक्रामन्ति[३] ब्रह्मवादिनो वदन्ति यन्मृच्चापश्चाग्नेरनाद्यमथ कस्मान् मृदा चाद्भिश्चाग्निश्चीयते इति यदद्भिः संयौति॥२॥

आपो वै सर्वा देवता देवताभिरेवैनꣳ सꣳ सृजति यन्मृदा चीनोतीयं वा अग्निर्वैश्वानरोऽग्निनैव तदग्निं चिनोति[४] ब्रह्मवादिनो वदन्ति यन्मृदा चाद्भिश्चाग्निः चीयतेऽथ कस्मादग्निरुच्यत इति यच्छन्दोभिः चिनोत्यग्नयो वै छन्दाꣳसि तस्मादग्निरुच्यतेऽथो इयं वा अग्निर्वैश्वानरो यत्॥३॥

मृदा चिनोति तस्मादग्निरुच्यते[५] हिरण्येष्टका उप दधाति ज्योतिर्वै हिरण्यं ज्योतिरेवास्मिन् दधात्यथो

तेजो वै हिरण्यं तेज एवात्मन्धत्ते[१] यो वा अग्निꣳ सर्व-तोमुखं चिनुते सर्वासु प्रजास्वन्नमत्ति सर्वा दिशोऽभि जयति गायत्रीं पुरस्तादुप दधाति चिष्टुभं दक्षिणतो जगतीं पश्चादनुष्टुभमुत्तरतः पङ्क्तिं मध्य एष वै, अग्निः सर्वतोमुखस्तं य एवं विद्वाꣳश्चिनुते सर्वासु प्रजास्वन्न-मत्ति सर्वा दिशोऽभि जयत्यथो दिश्येव दिशं प्र वयति तस्माद्दिशि दिक् प्रोता[२] ॥ ४ ॥

अपि। संयौति। वैश्वानरो यत्। एष वै। पञ्चविꣳ-शतिश्च ॥ ९ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके नवमोऽनुवाकः ॥०॥

स्वयञ्चितिश्च कूर्मादिरष्टमे समुदीरितः।

अथ नवमेऽग्नियहणादिकमभिधीयते। यदुक्तं सूत्रकारेण,—'मयि गृह्णाम्यग्रे अग्निं, यो नो अग्निः पितर इति द्वाभ्यामात्मन्नग्निं गृह्णीत' इति।

तत्र प्रथमामाह,—"मयि गृह्णाम्यग्रे अग्निꣳ रायस्पोषाय सुप्रजा-स्त्वाय सुवीर्याय। मयि प्रजां मयि वर्चो दधाम्यरिष्टा स्याम तनुवा सुवीराः[१]" इति। 'अग्ने', परकीयस्याग्नेश्चयनात् पूर्वम् 'अग्निं' स्वकीयं पूर्वसिद्धं वह्निं 'मयि गृह्णामि' स्वात्मन्येव यथा स्थिरो भवति तथा स्वीकरोमि। किमर्थं? धनपुष्टि-शोभनापत्य-शोभनभृत्यार्थं।

अस्य गृहीतस्याग्नेः प्रसादात् 'प्रजाम्' उत्पत्स्यमानां पुत्रादिकां, 'मयि' स्थापयामि, 'वर्चः' शारीरं बलं च मयि स्थापयामि। 'सुवीराः' शोभनपुत्रभृत्योपेताः वयं 'तनुवा' मदीयेन शरीरेण सह 'अरिष्टाः' हिंसारहिताः 'स्याम'।

अथ द्वितीया,—"यो नो अग्निः पितरो हृत्सु अन्तर् अमर्त्यो मर्त्याꣳ आविवेश। तम् आत्मन् परि-गृह्णीमहे वयं मा सो अस्माꣳ अवहाय परा-गात्[१]" इति। हे 'पितरः' पालकाः. अस्मच्छरीर-गता भूतेन्द्रियविशेषाः, 'अमर्त्यः' मरणरहितः 'अग्निः' 'हृत्सु' 'अन्तः' हृदयाद्यवयवेषु मध्ये 'मर्त्यान्' मरणयोग्यान् अस्मान् 'आविवेश' सर्वतः प्रविष्टः। 'तम्' अग्निं 'वयं' 'आत्मन्' 'परि-गृह्णीमहे' स्वशरीरे एव स्थिरं धारयामः। 'सो'ऽग्निः 'अस्मान्' 'अवहाय' परित्यज्य 'मा' 'परा-गात्' अन्यत्र मा गच्छतु।

एतन्मन्त्रद्वयसाध्यमग्निग्रहणं विधत्ते,—"यदध्वर्युरात्मन्नग्निम् अगृहीत्वा अग्निं चिनुयाद् यः अस्य स्वोऽग्निः तमपि यजमानाय चिनुयादग्निं खलु वै पशवोऽनूप तिष्ठन्ते अपक्रामुका अस्मात् पशवः स्युर्मयि गृह्णामि अग्ने अग्निमित्याह आत्मन्नेव स्वमग्निं दाधार न अस्मात् पशवः अप क्रामन्ति[२]" इति। यदि अयम् 'अध्वर्युः' 'मयि गृह्णामि' इति मन्त्राभ्यां स्वकीयम् 'अग्निं' स्वस्मिन् 'अगृहीत्वा' परार्थम् 'अग्निं' 'चिनुयात्', तदानीम् 'अस्य' अध्वर्योः 'यः' स्वकीयः पूर्वमेव चितोऽग्निः 'तमपि' यजमानार्थमेव चितवान् भवति। 'पशवः' च सर्वेऽपि 'अग्निम्' अनुसेवन्ते। अतोऽपक्रामन्तं तमग्निमनु 'पशवः' अपि 'अस्मात्' अध्वर्योः अपक्रामन्ति। अतस्तत्परिहर्तुमग्निग्रहणाय

'मयि गृह्णामि' इति मन्त्रद्वयं ब्रूयात्। तेन स्वकीयमग्निं स्वस्मिन् अवधारयति, पशवोऽपि अस्मात् न अपक्रामन्ति। एतदपि पूर्व-ब्राह्मणेन सह द्रष्टव्यम्।

अथ प्रश्नोत्तराभ्यां चयनं प्रशंसति,—"ब्रह्मवादिनो वदन्ति यत्, मृच्च आपश्च अग्नेरन्नाद्यम् अथ कस्मात् मृदा चाद्भिश्चाग्निश्चीयते इति, यदद्भिः संयौति आपो वै सर्वा देवता देवताभिरेवैनꣳ सꣳ सृजति, यत् मृदा चिनोति इयं वै अग्निर्वैश्वानरोऽग्निनैव तद् अग्निं चिनोति(४)" इति। मृत्तिका च आपश्चेति यदस्ति तदु-भयमग्नेर्भक्ष्यं न भवति, अतो भक्ष्यम् आज्यपुरोडाशादिकं विहाय कस्मादेताभ्यां मृज्जलाभ्यां दृष्टकारूपाभ्यामग्निश्चीयते इति ब्रह्म-वादिनां प्रश्नः। तत्राभिज्ञा एवमुत्तरमाहुः, यद्यपि आपो न भक्ष्याः तथापि, अद्भिर्मृत्तिकां मिश्रयति इति 'यत्', तेन 'देवताभि-रेव' अग्निं संयोजयति, अपां सर्वदेवतात्मकत्वात्। दृंहणधादाविन्द्रस्य बृहत्कारित्वेन अपां सर्वदेवोपकारित्वात् सर्वदेवतात्मकत्वम्। अतः सर्वदेवतासंयोजनाय अद्भिश्चयनं युक्तम्। तथा मृदा चयनं यदस्ति, तदपि युक्तम्, भूमेर्वैश्वानराग्निरूपत्वात् तद्रूपत्वं च "तस्मादिमां वयाꣳसि नक्तं नाध्यासते" इत्यत्रोपपादितम्। अतो मृद्रूपेणाग्निनैव तम् 'अग्निं चिनुते' इत्येतदुपपन्नम्।

इदानीं मृज्जलाभ्यां चयनमङ्गीकृत्य तस्याग्नेरग्निवं प्रश्नो-त्तराभ्यां प्रतिपादयति,—"ब्रह्मवादिनो वदन्ति यत् मृदा चाद्भि-श्चाग्निश्चीयते अथ कस्मादग्निरुच्यते इति, यच्छन्दोभिश्चिनोत्यग्नयो वै छन्दाꣳसि तस्मादग्निरुच्यते अथो इयं वै अग्निर्वैश्वानरो यन्मृदा

चिनोति तस्मादग्निरुच्यते[५]" इति। इयमग्व्याख्या चितिर्मृज्जलाभ्यामेव निष्पाद्यते, न त्वङ्गारैर्ज्वालाभिर्वा। तथा सति कस्मात् कारणाद् अग्निनाम सम्पन्नमिति ब्रह्मवादिनां प्रश्नः। तत्राभिज्ञा उत्तरमाहुः, न केवलं मृज्जलाभ्यामेव चयनम्, किन्तु छन्दोयुक्तैर्मन्त्रैरपि। छन्दांसि चाग्निस्वरूपाणि "अभित्वा देव सवितः"(३।५।१।१) इत्यादिभिर्मन्त्रगतैश्छन्दोभिर्मथनहेतुभिरग्नेरुत्पाद्यत्वात्। अतश्छन्दोद्वारा चितेरग्नित्वम्। अपि च भूमेर्वैश्वानरत्वमिदानीमेवोदाहृतम्, अतो मृत्कार्यत्वादग्नित्वं युक्तम्। एतद्ब्राह्मणमन्त्रे द्रष्टव्यम्।

यदुक्तं सूत्रकारेण,—'हिरण्मेष्टकाभिः सर्वतोमुखमुपदधाति गायत्रीं पुरस्तादुपदधातीत्युक्तम्' इति। तदिदं विधत्ते,—"हिरण्मेष्टका उप दधाति ज्योतिर्वै हिरण्यं ज्योतिरेवास्मिन् दधाति अथो तेजो वै हिरण्यं तेज एवात्मन् विधत्ते[६]" इति। ज्योतिष्ट्वम् इतरप्रकाशकत्वं। तेजः प्रसिद्धं, कान्तिः।

प्रपाठकादौ "आग्नेय्या गायत्रिया (५।७।१)" इत्यादिना नाचिकेतचयनप्रकरणाम्नाता मन्त्रादय उदाहृताः। तांश्च मन्त्रान् अत्र हिरण्मेष्टकोपधाने विनियुङ्क्ते,—"यो वै अग्निꣳ सर्वतोमुखं चिनुते सर्वासु प्रजासु अन्नमत्ति सर्वा दिशोऽभि जयति गायत्रीं पुरस्तादुप दधाति चिष्टुभं दक्षिणतो जगतीं पश्चादनुष्टुभमुत्तरतः पङ्क्तिं मध्ये एष वै अग्निः सर्वतोमुखस्तं य एवं विदाꣳश्चिनुते सर्वासु प्रजासु अन्नमत्ति सर्वा दिशोऽभि जयति अथो दिश्येव दिशं प्र वयति तस्माद्दिशि दिक् प्रोता[७]" इति। या हिरण्मेष्टका तदेवाग्नेर्मुखं, ता इष्टकाः सर्वा दिशोऽभिजयन्तः सर्वासु दिक्षु विधन्त इत्ययम् 'अग्निः

सर्वतोमुखः', एतस्य चयने सति खगटहवर्त्तिप्रजाखिव सर्वदिग्वर्त्ति-प्रजासु स्निग्धो भूत्वा अन्नमत्ति, अत एव सर्वा दिशोऽनेन जिता भवन्ति। पुनरन्ते फलाभिधानम् उपसंहाराय। अपि च सर्वासु दिक्षु प्रधानेनैकस्यां 'दिग्नि' अन्यां 'दिग्नं' 'प्र-वयति' सूच्या वस्त्रमिव स्निष्टां करोति। अत एव लोकेऽपि एकस्यां 'दिग्नि' अन्या 'दिक्' 'प्रोता' वर्त्तते। आग्नेयादिविदिक्षु द्वयोर्दिगन्तयोः संश्लेषात्। इदं च ब्राह्मणं नचचेष्टकाभ्यः (४।४।१०) ऊर्ध्वं द्रष्टव्यम्।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके नवमोऽनुवाकः ॥०॥

प्रजापतिरग्निमसृजत सोऽस्मात् सृष्टः प्राङ्प्राद्रवत् तस्मा अश्वं प्रत्यास्यत् स दक्षिणावर्त्तत तस्मै वृष्णिं प्रत्यास्यत् स प्रत्यङावर्त्तत तस्मा ऋषभं प्रत्यास्यत् स उदङावर्तत तस्मै बस्तं प्रत्यास्यत् स ऊर्ध्वोऽद्रवत् तस्मै पुरुषं प्रत्यास्यत् पशुशीर्षाण्युपदधाति सर्वत एवैनम् ॥ १ ॥

अवरुध्य चिनुते। एता वै प्राणभृतश्चक्षुमतीरिष्टका यत् पशुशीर्षाणि यत् पशुशीर्षाण्युपदधाति ताभिरेव यजमानोऽमुष्मिंल्लोके प्राणित्यथो ताभिरेवास्मा

इमे लोकाः प्र भान्ति[१] मृदाभिलिप्योप दधाति मेध्यत्वाय[२] पशुर्वा एष यदग्निरन्नं पशव एष खलु वा अग्निर्यत् पशुशीर्षाणि यं कामयेत कनीयोऽस्यान्नम् ॥ २ ॥

स्यादिति सन्तरान्तस्य पशुशीर्षाण्युप दध्यात्कनीय एवास्यान्नं भवति यं कामयेत समावदस्यान्नं स्यादिति मध्यतस्तस्योप दध्यात्समावदेवास्यान्नं भवति यं कामयेत भूयोऽस्यान्नꣳ स्यादित्यन्तेषु तस्य व्युद्ह्योप दध्यादन्तत एवास्मा अन्नमवरुन्धे भूयोऽस्यान्नं भवति ॥ ३ ॥

एनम्। अस्यान्नम्। भूयोऽस्यान्नं भवति ॥ १० ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके दशमोऽनुवाकः ॥

अग्निग्रहः सर्वमुखं सप्रोतं नवमे श्रुतम्।

अथ दशमे पशुशीर्षाण्युच्यन्ते। यत्पूर्वं द्वितीयप्रपाठके विहितं "पशुशीर्षाण्युपदधाति (५।२।८)" इति। तदनूद्य प्रशंसति,—"प्रजापतिरग्निमसृजत सोऽस्मात् सृष्टः प्राङ् प्र-अद्रवत्तस्मै अश्वं प्रति-आस्यत् स दक्षिणा आ-अवर्त्तत तस्मै दक्षिणं प्रति-आस्यत् स प्रत्यङ्-आवर्त्तत तस्मै ऋषभं प्रति-आस्यत् स उदङ् आ-अवर्त्तत तस्मै वस्तं प्रति-आस्यत् स ऊर्ध्वोऽद्रवत्तस्मै पुरुषं प्रति-आस्यत् यत् पशुशीर्षाण्युपदधाति सर्वत एवैनं अवरुध्य चिनुते[१]" इति। प्रजापतिना 'सृष्टः'

अग्निर्यदा पूर्वस्माद्दिग्भ्यः पलायते, तदा तन्निवारणायाग्रं तत्प्राति-कूल्येन स्थापितवान्। एवं दिगन्तरेष्वपि योज्यम्। अतः पशुशीर्षा-णामुपधाने सति अग्नेः पूर्वतः पलायनं निवार्य तमग्निं चिनोति।

प्रकारान्तरेण पशुशीर्षाणि प्रशंसति,—"एता वै प्राणभृतश्चक्षु-मतीरिष्टका यत् पशुशीर्षाणि यत् पशुशीर्षाण्युपदधाति ताभि-रेव यजमानोऽमुष्मिन् लोके प्र-अणिति अथो ताभिरेवास्मै इमे लोकाः प्र भान्ति[२]" इति। पशुशीर्षाणां प्राणभृतां चक्षुष्मत्त्वञ्च भूतपूर्वगत्या द्रष्टव्यम्। तदुपधानेन यजमानः सुवर्गे 'प्राणिति' चिरञ्जीवति। अपि च यजमानार्थमिमे सर्वे लोकाः पशुशीर्षेष्टकाभिः प्रकर्षेण भासन्ते।

तदुपधाने कञ्चिद्विशेषं विधत्ते,—"मृदा अभिलिप्योप दधाति मेध्यत्वाय[३]" इति। मृतानां पशुशीर्षाणां मृल्लेपेन मृन्मयत्वे सति यज्ञयोग्यं भवति।

अथान्वयव्यतिरेकाभ्यामपरं विशेषं विधत्ते,—"पशुर्वा एष यदग्निरन्नं पशव एष खलु वै अग्निर्यत् पशुशीर्षाणि यं कामयेत कनीयोऽस्यान्नं स्यादिति सन्तरान्तस्य पशुशीर्षाण्युप दध्यात्कनीय एवास्यान्नं भवति यं कामयेत समावदस्यान्नꣳ स्यादिति मध्यतस्तस्योप दध्यात् समावदेतास्यान्नं भवति यं कामयेत भूयोऽस्यान्नꣳ स्यादिति अन्तेषु तस्य बुदूह्य उप दध्यादन्तत एवास्मै अन्नमव रुन्धे भूयोऽस्यान्नं भवति[४]" इति। अयमग्निः पशुसाधनत्वात् पशुस्वरूपः पशवश्चान्न-साधनत्वादन्नरूपः पशुशीर्षाणि चाग्निनिष्पादकत्वादग्निरूपाणि। एवं सति अन्नाल्पत्वकामनायां 'सन्तरां' सन्निकृष्टतराणि यथा भवन्ति,

तथा 'उप-दध्यात्', ततोऽन्नमल्पमेव भवति। अथात्यल्पं नापि बहुलं किन्तु 'समावत्' समं जीवनमात्रपर्याप्तमन्नं स्यादिति कामनायां मध्यत 'उप-दध्यात्', नात्यन्तं सन्निकर्षः, नाप्यतिविकर्षः। तथा सति जीवनमात्रपर्याप्तमेवान्नं भवति। अथान्नभूयस्त्वकामनायां चितेरन्तेषु पुरस्तरं 'व्युदूह्य' यथा भवति, तथा पशुशीर्षाणि अपसार्य 'उप-दध्यात्', तथा सति सर्वस्मादपि दिगन्तरतोऽस्यान्नमधीनं भवति, ततोऽतिबहुलं सम्पद्यते। एतच्च सर्वम् "एषां वा एतल्लोकानाम्" (५।२।८) इत्यनुवाके द्रष्टव्यम्।

इति भायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके दशमोऽनुवाकः ॥ ० ॥

स्तेगान्, दꣳष्ट्राभ्यां[१] मण्डूकान् जम्भ्यैभिः[२] आदꣳकां खादेन[३] ऊर्जꣳ * सꣳसूदेन[४] आरण्यं जाम्बीलन्[५] मृदं बर्स्वेभिः[६] शर्कराभिरवकाम्[७] अवकाभिः शर्कराम्[८] उत्सादेन जिह्वाम्[९] अवक्रन्देन तालुꣳ[१०] सरस्वतीं जिह्वाग्रेण[११] ॥ १ ॥

स्तेगान्। द्वाविꣳशतिः ॥ ११ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके एकादशोऽनुवाकः ॥

---

* 'उर्जं' इति आदर्शपुस्तकपाठः।

विशेषः पशुशीर्षेषु दशमे समुदीरितः ।

समाप्तं चैतावताग्निब्राह्मणम् ।

अथाश्वमेधमन्त्राः * केचिदत्रोच्यन्ते। यदुक्तं सूचकारेण,— 'हविषा प्रचर्याज्यमवदानं हुत्वा, स्तेगान् दंष्ट्रा †(१) मण्डूकान् जम्भ्येभिः(२)—इत्येतैश्चतुर्दशभिरनुवाकैः प्रतिमन्त्रं शरीरहोमान् जुहोति' इति ।

तत्र प्रथमानुवाकगतान् मन्त्रनाह,—"स्तेगान्दंष्ट्राभ्यां(१) मण्डूकान् जम्भ्येभिः(२) आदकां खादेन(३) ऊर्जं मंसूदेन(४) आरण्यं जाम्बीलेन(५) मृदं बर्स्वेभिः(६) शर्कराभिरवकाम्(७) अवकाभिः शर्कराम्(८) उत्खादेन जिह्वाम्(९) अवक्रन्देन तालुं(१०) सरस्वतीं जिह्वायेण(११)" इति । अत्र द्वितीयान्तनिर्दिष्टा देवताः, तृतीयान्तनिर्दिष्टानि अश्वस्य अङ्गानि । इमां देवतामनेनाङ्गेन प्रीणयामीति होमकाले उभयं स्मर्तव्यमिति मन्त्राभिप्रायः । स्तेगाः क्षुद्रजन्तुविशेषाः, 'गोकर्णगाः' इति लोके प्रसिद्धाः । तदधिष्ठात्री काचिद्देवतेह लक्ष्यते । दंष्ट्रे उच्यते । स्तेगाभिमानिनी देवता दंष्ट्राभ्यां यजामि । स एको मन्त्रः। एवमुत्तरत्रापि द्रष्टव्यं ।

मण्डूकाः प्रसिद्धाः। दन्तमूलं जम्भः, तत्र भवा जम्भ्याः, पार्श्वदन्ताः। आदका भक्षयित्री, प्राणाभिमानिनी देवता। खादः भक्षणहेतुर्दन्तविशेषः । ऊर्क् रसाभिमानिनी देवता । संसूदं सन्ततचरणो नासिकादिः। आरण्यं प्रसिद्धं । जाम्बीलं आमाशयः ।

---

* "अथाश्वमेधाः समम्नाः" इति आदर्शपुस्तकपाठः ।

यच्च भक्षितं तृणं निधीयते तत् मृदं। वर्खभिः* दन्तमूलमांसादीनि। ग्रर्करा: तत्सदृशानि कठिनास्थीनि। अवका: ग्रैवालसदृशानि मांसानि। ग्रर्करा प्रसिद्धा। उत्साद उच्चप्रदेशः। जिह्वा प्रसिद्धा। अवक्रन्दः आन्तरं काधिक†ग्रब्दाभिव्यक्तिस्थानं। तालु जिह्वामूलं। ग्ररखतौ जिह्वायश्चेत्युभयं प्रसिद्धम्।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके एकादशोऽनुवाकः ॥०॥

वाजꣳ, हनूभ्याम्[१] अप आस्येन[२] आदित्यान् प्रमश्रुभिः[३] उपयामम् अधरेणोष्ठेन[४] सदुत्तरेण[५] अन्तरेणानूकाशं[६] प्रकाशेन वाघ्यꣳ[७] स्तनयित्नुं निर्बाधेन[८] सूर्याग्नी चक्षुर्भ्यां[९] विद्युतौ कनानकाभ्याम्[१०] अशनिं मस्तिष्केण[११] बलं मज्जभिः[१२] ॥ १ ॥

वाजं। पञ्चविꣳशतिः ॥ १२ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके द्वादशोऽनुवाकः ॥

---

* एवमेव सर्व्वत्र पाठः। वर्खा इति पाठो भवितुं युक्तः।

† एवमेव सर्व्वत्र पाठः। 'काधिक'इत्येवंरूपः कश्चित् पाठो भवितुं युक्तः।

विच्छिनेषु चतुर्दशसु द्वितीयानुवाकगतान्मन्त्रानाह,—"वाजभू हनूभ्याम्(१) अप आस्येन(२) आदित्यान् दन्तेभिः(३) उपयाममधरेणोष्ठेन(४) मद् उत्तरेण(५) अन्तरेणानूकाश्यं(६) प्रकाश्येन वाश्भू(७) स्तनयित्नुं निर्बाधेन(८) सूर्याग्नी चक्षुर्भ्यां(९) विद्युतौ कनानकाभ्याम्(१०) अग्निं मस्तिष्केण(११) बलं मज्जभिः(१२)" इति। वाजोऽङ्गं। हन्वादीनां पञ्चानां पदानामर्थाः प्रसिद्धाः। उपयामः पृथिवी, 'इयं वा उपयामः' इति श्रुत्यन्तरात्। अधरमोष्ठं प्रसिद्धं। मच्छब्देन द्यौरुच्यते, मीदन्त्यस्यां पुण्यकृत इति व्युत्पत्तेः। उत्तरेणेत्यूर्ध्वोष्ठेनेत्यनुवर्तते*। अन्तरम् ओष्ठयोर्मध्यम्। अनूकाश्यं द्यावापृथिव्योर्मध्यं, अनुक्रमेण काश्यन्ते भासन्ते ज्योतींषि अस्मिन्निति व्युत्पत्तेः। प्रकाश्योऽभ्यन्तरं प्रकाश्यस्थानं। वाश्भू ब्रह्माण्डात् बहिस्थानं। स्तनयित्नुः प्रसिद्धः। निर्बाधो गमनकालीनः शब्दः। सूर्याग्नी चक्षुषी चेत्युभयं प्रसिद्धं। विद्युतौ वृष्टिकालेतरकालीने। कनानके अक्षिस्थे कृष्णमण्डले। अग्निः प्रसिद्धः। मस्तिष्कः शिरोमांसं। बलं मज्जेत्युभयं प्रसिद्धम्।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके द्वादशोऽनुवाकः ॥०॥

---

* अत्र 'उत्तरेण ऊर्ध्वेन, ओष्ठेनेति अनुवर्त्तते' इत्येवंरूपः कश्चित्पाठो भवितुं युक्तः।

कूर्मान्, ग्रफैः(१) अच्छलाभिः कपिञ्जलान्(२) साम कुष्टिकाभिः(३) जवं जङ्घाभिः(४) अगदं जानुभ्यां(५) वीर्यं कुहाभ्यां(६) भयं प्रचालाभ्यां(७) गुहोपपक्षाभ्यां(८) अश्विनावꣳसाभ्याम्(९) अदितिꣳ श्रोणीभ्यां(१०) निर्ऋतिं निर्जाल्मकेन श्रोणीभ्यां(११) ॥ १ ॥

कूर्मान्। चयोविꣳशतिः ॥ १३ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके चयोदशोऽनुवाकः ॥

अथ तृतीयगतान्मन्त्रानाह,—'कूर्मान् ग्रफैः(१) अच्छलाभिः कपिञ्जलान्(२) साम कुष्टिकाभिः(३) जवं जङ्घाभिः(४) अगदञ्जानुभ्यां(५) वीर्यं कुहाभ्यां(६) भयं प्रचालाभ्यां(७) गुहा उपपक्षाभ्याम्(८) अश्विनौ अꣳसाभ्याम्(९) अदितिꣳ श्रोणीभ्यां(१०) निर्ऋतिं निर्जाल्मकेन श्रोणीभ्यां(११) इति। कूर्माः* ग्रफाश्च प्रसिद्धाः। अच्छलाः ग्रकलमांसानि। कपिञ्जलाः प्रसिद्धाः। साम गीतिः। कुष्टिकाः प्रकोष्ठारोग्य-जानुनी (?) जङ्घाभ्यामधःप्रदेशः। जवो वेगः। जङ्घाः सन्धिभ्योऽधः-प्रदेशः। अगदः आरोग्यं। जानुनी प्रसिद्धे। वीर्यं बलं। कुहा हस्तयोर्मध्यसन्धी। भयं प्रसिद्धं। प्रचालौ पादयोरुपरिप्रदेशौ। गुहा गुह्यनी। उपपक्षौ पार्श्वे। अꣳसशब्दौ प्रसिद्धौ। अदितिर्भूमिः।

* कूर्माः इति पाठो भवितुं युक्तः।

शीर्ष्णा शिरसा। निर्ऋतिः प्रसिद्धा। निर्ज्ञाल्मकेन केशरहितेन। शीर्ष्णा शिरसा।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके चतुर्दशोऽनुवाकः ॥ ० ॥

योक्त्रं, गृध्राभिः(१) युगमाननेन(२) चित्तं मन्याभिः(३) संक्रोशान् प्राणैः(४) प्रकाशेन त्वचं(५) पराकाशेनान्तरां(६) मशकान् केशैः(७) इन्द्रꣳ स्वपसा वहेन(८) बृहस्पतिꣳ शकुनिसादेन(९) रथमुष्णिहाभिः(१०) ॥ १ ॥

योक्त्रम्। एकविꣳशतिः ॥ १४ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके चतुर्दशोऽनुवाकः ॥

अथ चतुर्थगतान्मन्त्रानाह,—"योक्त्रं गृध्राभिः(१) युगमाननेन(२) चित्तम् मन्याभिः(३) संक्रोशान् प्राणैः(४) प्रकाशेन त्वचं(५) पराकाशेनान्तरां(६) मशकान् केशैः(७) इन्द्रꣳ स्वपसा वहेन(८) बृहस्पतिꣳ शकुनिसादेन(९) रथमुष्णिहाभिः(१०)" इति। योक्त्रं दर्भमयं बन्धनसाधनं। गृध्राः कक्षाः। युगं कृतचेतादि। आननं ग्रीवाप्रदेशः। चित्तं प्रसिद्धं। मन्या ग्रीवारेखाः। संक्रोशाः घोषाः। प्राणाश्चक्षुरादयः। प्रकाशो बाह्यं रूपं। त्वक् त्वगिन्द्रियाभिमानिनी। पराकाशोऽभ्यन्तरं

रूपं। अन्तरा अभ्यन्तरप्रदेशाभिमानिनौ। मशकशब्दाः प्रसिद्धाः। खपसा वक्षेन शोभनव्यापारेण अङ्गबलेन। बृहस्पतिः प्रसिद्धः। शकुनिसादः पृष्ठं, यच्च शकुनयः शक्ता वीराः सीदन्ति। रथः प्रसिद्धः। उष्णिहा रथवाहनदेशः।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके चतुर्दशोऽनुवाकः ॥ ० ॥

मित्रावरुणौ श्रोणीभ्याम्[१] इन्द्राग्नी श्रिखण्डाभ्याम्[२] इन्द्राबृहस्पती ऊरुभ्याम्[३] इन्द्राविष्णू अष्ठीवद्भ्याꣳ[४] सवितारं पुच्छेन[५] गन्धर्वान् शेपेन[६] अप्सरसो मुष्काभ्यां[७] पवमानं पायुना[८] पवित्रं पोताभ्याम्[९] आक्रमणꣳ स्थूराभ्याꣳ[१०] प्रतिक्रमणं कुष्ठाभ्याम्[११] ॥ १ ॥ १५ ॥

इति तैत्तिरियसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके पञ्चदशोऽनुवाकः ॥

अथ पञ्चमगतान्मन्त्रानाह,—"मित्रावरुणौ श्रोणीभ्याम्[१] इन्द्राग्नी श्रिखण्डाभ्याम्[२] इन्द्राबृहस्पती ऊरुभ्याम्[३] इन्द्राविष्णू अष्ठीवद्भ्याꣳ[४] सवितारं पुच्छेन[५] गन्धर्वान् शेपेन[६] अप्सरसो मुष्काभ्यां[७] पवमानं पायुना[८] पवित्रं पोताभ्याम्[९] आक्रमाणꣳ स्थूराभ्यां[१०] प्रतिक्रमणं कुष्ठाभ्याम्[११]" इति। श्रोणी जघनगते मांसे। श्रिखण्डे ततोऽप्यधस्तने।

ऊरू ततोऽप्यधस्तने। अष्ठीवती जङ्घयोः पृष्ठभागगते मांसे। पोच्चा-स्थूर-कुष्ठशब्दैः पायुसमीपवर्त्तिन एव मांसविशेषा उच्यन्ते। देवतानामानि तु स्पष्टानि।

इति मायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके पञ्चदशोऽनुवाकः ॥०॥

इन्द्रस्य, क्रोडः(१) अदित्यै पाजस्यं(२) दिशां जत्रवः(३) जीमूतान् हृदयौपशाभ्याम्(४) अन्तरिक्षं पुरितना(५) नभ उदर्येण(६) इन्द्राणीं श्रोणी(७) वल्मीकान् क्लोम्ना गिरीन् श्राग्निभिः(८) समुद्रमुदरेण(९) वैश्वानरं भस्मना(१०) ॥ १ ॥

मित्रावरुणौ। इन्द्रस्य। द्वाविंशतिः। द्वाविंशतिः* ॥ १६ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके षोडशोऽनुवाकः ॥

अथ षष्ठगतान्मन्त्रनाह,—'इन्द्रस्य क्रोडः(१) अदित्यै(२) पाजस्यं दिशां यत्रवः(३) जीमूतान् हृदयौपशाभ्याम्(४) अन्तरिक्षं पुरितता(५) नभ उदर्येण(६) इन्द्राणीं श्रोणी(७) वल्मीकान् क्लोम्ना(८) गिरीन् श्राग्निभिः(९) समुद्रमुदरेण(१०) वैश्वानरं भस्मना(११)" इति। क्रोडो

---

* 'इन्द्रस्य'। द्वाविंशतिः' इति आदर्शपुस्तकपाठः।

गलभागः। पाजस्यं पादतलं। जघनेऽंसस्यसमीपवर्तीनि अस्थीनि। हृदयमध्यम्* अष्टदलं मांसपद्मं। औपश्यं तदेष्टनं मांसं। पुरितताः† अन्त्राणि। उदर्यमुदरगतं मांसं। श्रोणिक्लोमग्रहण्याभ्यां उदरपार्श्ववर्तिनी मांसखण्डे उच्येते। तत्समीपवर्त्तीनि मांसानि श्राण्यानि। उदरं प्रसिद्धं। भस्म जीर्णदृणादि। यथा द्वितीयया देवतानिर्देशः, एवम् 'इन्द्रस्य' इत्यादौ षष्ठीचतुर्थीभ्यामपि देवतानिर्देशो द्रष्टव्यः।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके षोडशोऽनुवाकः ॥०॥

पूष्णः, वनिष्टुः(१) अन्धाहेः स्थूरगुदा(२) सर्पान् गुदाभिः(३) कृतून् पृष्टीभिः(४) दिवं पृष्ठेन(५) वसूनां प्रथमा कीकसा(६) रुद्राणां द्वितीया(७) आदित्यानां तृतीया(८) अङ्गिरसां चतुर्थी(९) साध्यानां पञ्चमी(१०) विश्वेषां देवानाꣳ षष्ठी(११) ॥ १७ ॥

पूष्णः। चतुर्विꣳशतिः ॥ १७ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके सप्तदशोऽनुवाकः ॥

---

* 'अत्र हृदयं हृदयमध्यं किं वा हृदयमध्यम्' इत्येवंरूपः कश्चित् पाठो भवितुं युक्तः।

† 'पुरितत्' इति पाठो भवितुं युक्तः।

† आदर्शपुस्तके १ इत्यङ्कोऽस्ति।

अथ सप्तमगतान्मन्त्रानाह,—"पूष्णो वनिष्टुः(१) अन्धाहेः स्थूरगुदा(२) सर्पान् गुदाभिः(३) ऋतून् पृष्टीभिः(४) दिवं पृष्ठेन(५) वसूनां प्रथमा कीकसा(६) रुद्राणां द्वितीया(७) आदित्यानां तृतीया(८) अङ्गिरसां चतुर्थी(९) साध्यानां पञ्चमी(१०) विश्वेषां देवानाꣳ षष्ठी(११)" इति। वनिष्टुः प्रौढम् अन्त्रम्। स्थूरगुदा गुदकाण्डे स्थूलो भागः। गुदा गुदकाण्डस्य सूक्ष्मभागाः। पृष्ठ्यो गुदसमीपवर्तिन्यः शिराः। पृष्ठमुपरिभागः। तत्समीपवर्तिनोऽस्थिविशेषाः कीकसाः, ताश्च षट्संख्याकाः क्रमेण वस्वादीनां भागाः।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके सप्तदशोऽनुवाकः ॥०॥

ओजः, ग्रीवाभिः(१) निर्ऋतिमस्थभिः(२) इन्द्रꣳ स्वपसा वहेन(३) रुद्रस्य विचलः स्कन्धः(४) अहोरात्रयोर्द्वितीयः(५) अर्धमासानां तृतीयः(६) मासां चतुर्थः(७) ऋतूनां पञ्चमः(८) संवत्सरस्य षष्ठः(९) ॥ १८* ॥

ओजः। विꣳशतिः ॥ १८ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके अष्टादशोऽनुवाकः ॥०॥

---

* आदर्शपुस्तके १—इत्यङ्कोऽस्ति। एवं परत्रापि।

अथाष्टमगतान्मन्त्रानाह,—'ओजो ग्रीवाभिः(१) निष्कृतिमस्थभिः(२) इन्द्रꣳ खपसा वहेन(३)रुद्रस्य विचलः स्कन्धः(४) अहोरात्रयोर्द्वितीयः(५) अर्धमासानां तृतीयः(६) मासां चतुर्थः(७) ऋतूनां पञ्चमः(८) संवत्सरस्य षष्ठः(९)" इति। ग्रीवास्तदवयवाः। अस्थीनि तत्त्यानि। योऽयं 'वहो' वहनयोग्यप्रदेशः 'खपाः' शोभनकर्मा, वहेनेत्यन्तः खपाः, सोऽयमिन्द्रस्य भागः। स्कन्धोऽवयवभेदेन षोढा भिन्नः, तत्रात्यन्तचञ्चलोऽवयवो रुद्रस्य। तत्तदनन्तरभाविनोऽहोरात्रादीनाम्।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके अष्टादशोऽनुवाकः ॥०॥

आनन्दं, नन्दथुना(१) कामं प्रत्यासाभ्यां(२) भयꣳ-श्रितीमभ्यां(३) प्रशिषं प्रशासाभ्यां(४) सूर्याचन्द्रमसौ वृक्षाभ्यां(५) श्यामशबलौ मनसाभ्यां(६) व्युष्टिꣳ रूपेण(७) निम्रुक्तिमरूपेण(८) ॥ ९ ॥

आनन्दꣳ। षोडश ॥ १९ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके एकोनविंशोऽनुवाकः ॥०॥

अथ नवमगतान्मन्त्रानाह,—"आनन्दं नन्दथुना(१) कामं प्रत्या-साभ्यां(२) भयꣳ श्रितीमभ्यां(३) प्रशिषं प्रशासाभ्यां(४) सूर्याचन्द्रमसौ

वृक्याभ्याम्(५) श्यामशबलौ मतस्नाभ्याम्(६) वृष्टिम् रूपेण(७) निरुक्तिमरूपेण(८)" इति। नन्दथुर्गुह्येन्द्रियम्। प्रत्यासन्नितीम-प्रशासशब्दैर्गुह्यसमीपवर्तीनि अवयवयुगलानि अभिधीयन्ते। वृक्यौ पार्श्वद्वयवर्तिन्यौ मांसग्रन्थी। तत्समीपवर्त्तिनी मतस्ने। रूपं समीचीन आकारः। तद्विपरीतम् अरूपम्।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके एकोनविंशोऽनुवाकः ॥०॥

अहः, मा॒ꣳसेन॒(१) रा॒चिं पी॒वसा॒(२) अपो यू॒षेण॒(३) घृत॒ꣳ रसे॑न॒(४) श्यां वस॑या॒(५) दू॒षीका॑भिः ह्रादु॒नि॑(६) अश्रु॑भिः पृ॒ष्वां(७) दिव॒ꣳ रू॒पेण॒(८) नक्ष॑त्राणि प्रति॒रू॒पेण॒(९) पृ॒थि॒वीं च॒र्मणा॒(१०) छ॒वीं छ॒व्या॒(११) उपा॑क्ताय॒ स्वाहा॒(१२) आल॑ब्धाय॒ स्वाहा॒(१३) हु॒ताय॒ स्वाहा॒(१४) ॥ १० ॥

अहः। अ॒ष्टाविं॒शति॒ः ॥ २०॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके विंशोऽनुवाकः ॥०॥

अथ दृग्मगतान्मन्त्रानाह,—'अहर्मा॒ꣳसेन॒(१) राचिं पीवसा॒(२) अपः यू॒षेण॒(३) घृत॒ꣳ रसे॑न॒(४) श्यां वसया॒(५) दूषीकाभिर्ह्रादुनिं॑(६) अश्रु॑भिः पृ॒ष्वां(७) दिव॒ꣳ रू॒पेण॒(८) नक्षत्राणि प्रतिरूपेण॒(९) पृथिवीं

चर्मणा[१०] क्रवीं क्रव्या[११] उपाक्रताय स्वाहा[१२] अक्रताय स्वाहा[१३] क्रताय स्वाहा[१४]" इति। पीवो-यूष-रस वसा-शब्दास्तत्यद्रवाणां विशेषाः। दूषीका नेत्रयोर्मलं। अश्रूणि नेत्र-जलानि। पृष्वा (?)। रूपं नेत्रगोलकं। प्रतिरूपं तत्त्यं प्रति-बिम्बं। चर्म पक्ष्मपटलम्। क्रवी नेत्रगता कान्तिः। योऽयमुपा-क्रतमश्वमभिमान्यमानो देवः तस्मै इदं स्वा क्रतमस्तु*। तथैवाक्रत-मभिमन्यमानाय, क्रतमभिन्यमानाय च देवाय तत्तद्वस्थापन्नमिदं क्रतमस्तु।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके विंशोऽनुवाकः ॥०॥

अग्नेः, पङ्क्तिः[१] सरस्वत्यै निपङ्क्तिः[२] सोमस्य त्रैष्टुभी[३] अपां चतुर्थी[४] ओषधीनां पञ्चमी[५] संवत्सरस्य षष्ठी[६] मरुतां सप्तमी[७] बृहस्पतेरष्टमी[८] मित्रस्य नवमी[९] वरुणस्य दशमी[१०] इन्द्रस्यैकादशी[११] विश्वेषां देवानां द्वादशी[१२] द्यावापृथिव्योः पार्श्व[१३] यमस्य पाटूरः[१४] ॥ ११ ॥

अग्नेः। एकान्नविंशत् ॥ २१ ॥

---

* एवमेव सर्वत्र पाठः। 'स्वाहा' क्रतमस्तु' इत्यवंरूपः कश्चित्पाठो भवितुं युक्तः।

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके एकविंशोऽनुवाकः ॥०॥

अथैकादशगतान्मन्त्रनाह,—"अग्नेः पक्तिः(१) सरस्वत्यै निपक्तिः(२) सोमस्य तृतीया(३) अपां चतुर्थी(४) ओषधीनां पञ्चमी(५) संवत्सरस्य षष्ठी(६) मरुताꣳ सप्तमी(७) बृहस्पतेरष्टमी(८) मित्रस्य नवमी(९) वरुणस्य दशमी(१०) इन्द्रस्यैकादशी(११) विश्वेषां देवानां द्वादशी(१२) द्यावापृथिव्योः पार्श्वं(१३) यमस्य पाटूरः(१४)" इति। दक्षिणपार्श्वस्य मूले वर्त्तमाना येयं वङ्क्रिः सा पक्तिः। तदनन्तरभाविनी वङ्क्रिः निपक्तिः। एवं तत्तदनन्तरभाविन्यो वङ्क्रयो द्वितीयादिशब्दैरुच्यन्ते। एता वङ्क्रयो यस्मिन् पृष्ठभागगतेऽस्थिपार्श्वविशेषे सम्बध्यन्ते, सोऽयं पाटूरः।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके एकविंशोऽनुवाकः ॥०॥

वायोः, पक्षतिः(१) सरस्वतो निपक्षतिः(२) चन्द्रमसः तृतीया(३) नक्षत्राणां चतुर्थी(४) सवितुः 'पञ्चमी(५) रुद्रस्य षष्ठी(६) सर्पाणांꣳ सप्तमी(७) अर्यम्णोऽष्टमी(८) त्वष्टुर्नवमी(९) धातुर्दशमी(१०) इन्द्राण्या एकादशी(११) अदित्यै द्वादशी(१२) द्यावापृथिव्योः पार्श्वे(१३) यम्यै पाटरः(१४) ॥ १२ ॥

वायोः। अष्टाविंशतिः ॥ २२ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके द्वाविंशोऽनुवाकः ॥०॥

अथ द्वादशगतान्मन्त्रानाह,—"वायोः पक्षतिः(१) सरस्वतो निपक्षतिः(२) चन्द्रमसः द्वतीया(३) नक्षत्राणां चतुर्थी(४) सवितुः पञ्चमी(५) रुद्रस्य षष्ठी(६) सर्पाणाꣳ सप्तमी(७) अर्यम्णोऽष्टमी(८) त्वष्टुर्नवमी(९) धातुर्दशमी(१०) इन्द्राण्या एकादशी(११) अदित्यै द्वादशी(१२) द्यावापृथिव्योः पार्श्वं(१३) यम्ये पाटूरः(१४)" इति। पूर्वोक्तदक्षिणपार्श्ववदुत्तरपार्श्वपरत्वेनेदं सर्वं व्याख्येयम्।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुः-संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके द्वाविंशोऽनुवाकः ॥०॥

पन्थाम्, अनूदृग्भ्याꣳ(१) सन्तिꣳ स्रावण्याभ्याꣳ(२) शुकान् पित्तेन(३) हरिमाणं यक्ना(४) हलीक्ष्णान् पापवातेन(५) कूष्माान् शकभिः(६) शवर्त्तान् जवध्येन(७) शुनो विशसनेन(८) सर्पान् लोहितगन्धेन(९) वयाꣳसि पक्वगन्धेन(१०) पिपीलिकाः प्रशादेन(११) ॥ १३ ॥

पन्थां। द्वाविंशतिः ॥ २३ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके त्रयोविंशोऽनुवाकः ॥०॥

अथ चयोदशगतान्मन्त्रनाह,—"पन्थामनूवृग्भ्याꣳ(१) सन्ततिꣳ स्नावन्याभ्याꣳ(२) गुल्फान् पित्तेन(३) हरिमाणं यक्ना(४) हलीक्ष्णान् पापवातेन(५) कुक्षान् ग्रकभिः(६) ग्रवर्त्तान् ऊवध्येन(७) शुनो विग्रसनेन(८) सर्पान् लोहितगन्धेन(९) वयाꣳसि पक्वगन्धेन(१०) पिपीलिकाः प्रग्रादेन(११)" इति। अनूवृक्ग्रब्देन पूर्वोक्तयोर्वृक्क्ययोः समीपवर्त्तिनी मांसखण्डे उच्येते। स्नावन्यग्रब्देन सूक्ष्माणां स्नायुविग्रेषाणां मूले, ते पार्श्वद्वयवर्तिन्यौ द्वे गिरे उच्येते। पित्तं प्रसिद्धं। यक्ना यकृत्ग्रब्देन* पित्तगतो वर्णविग्रेषः। पापवातोऽपानवायुः। ग्रकानि ग्रकृत्पिण्डान्। ऊवध्यं अपक्वं ग्रकृत्। विग्रसनं छिन्नस्थानं। लोहितगन्धपक्वगन्धौ प्रसिद्धौ। प्रग्रादो विग्रसनकालपतितो मांसलेग्रविग्रेषः।

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाग्रे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके चयोविंग्रोऽनुवाकः॥०॥

क्रमैः, अत्यक्रमीद्वाजी विश्वैर्देवैर्यज्ञियैः संविदानः। स नो नय सुकृतस्य लोकं तस्य ते वयꣳ स्वधया मदेम॥ १४॥

क्रमैः। अष्टादग्र॥ २४॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके चतुर्विंग्रोऽनुवाकः॥०॥

* 'यक्ना' यकृता। यकृन्ग्रब्देन पित्तगतो वर्णविग्रेषोऽभिप्रेत इत्येवंरूपः कश्चित् पाठो भवितुं युक्तः।

अथ चतुर्दशीकं मन्त्रमाह,—"क्रमैरत्यक्रमीद्वाजी विश्वेर्देवैर्यज्ञियैः संविदानः। स नो नय सुकृतस्य लोकं तस्य ते वयꣳ स्वधया मदेम" इति। अयं 'वाजी' पूर्वोक्तावयवसंपन्नोऽश्वो 'यज्ञियैः' यज्ञार्हैः 'विश्वेर्देवैः' पूर्वोक्तैस्त्रेगादिभिः पिपीलिकान्तैः सर्वैर्देवैः ऐकमत्यङ्गतः 'क्रमैः' पादविन्यासैः 'अत्यक्रमीत्' भूलोकमतिक्रम्य स्वर्गं गतवान्। हे वाजिन्, 'सः' त्वं 'नः' अस्मान् 'सुकृतस्य' फलभूतं 'लोकं' 'नय' प्रापय। तस्य 'ते' तृप्त्यर्थं 'वयं' स्वधाशब्दोपलक्षितेनाज्येन हविषा हर्षं जनयाम।

इति मायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्संहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके चतुर्विंशोऽनुवाकः ॥०॥

द्यौः, ते॑ पृ॒ष्ठं पृ॑थि॒वी स॒धस्थ॑मात्मान्तरि॑क्षꣳ समु॒द्रो योनि॒ः सूर्य॑स्ते॒ चक्षु॑र्वा॒तः प्रा॒णश्च॒न्द्रमा॒ः श्रोत्रं॑ मासा॒श्चार्द्ध॑मासाश्च॒ पर्वा॑ण्यृ॒तवो॒ऽङ्गा॑नि संवत्स॒रो म॑हि॒मा ॥ १५॥

द्यौः । पञ्च॑विꣳश॒तिः ॥ २५ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके पञ्चविंशोऽनुवाकः ॥०॥

एवमाज्याऽऽहुतिसाधनभूतास्चतुर्दशानुवाकगता मन्त्रा उक्ताः। अथ यद्विहितमश्वमेधब्राह्मणे,—"द्यौस्ते पृष्ठं पृथिवी सधस्थमित्यश्वम-

नुमन्त्रयते"(३।८।५।८ब्रा०)इति। तं मन्त्रमस्मिन् पञ्चविंशानुवाके पठति,—"द्यौस्ते पृष्ठं पृथिवी मधस्थम् आत्मा अन्तरिक्षं समुद्रो योनिः सूर्यस्ते चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रं मासाश्च अर्द्धमासाश्च पर्वाण्यृतवोऽङ्गानि संवत्सरो महिमा" इति। हे अश्व, येयं 'द्यौः', सा 'ते' तव 'पृष्ठम्' उपरिभागः। या च 'पृथिवी' सा यजमानादिभिः सह तवावस्थानहेतुः। यच्च 'अन्तरिक्षं' तत्तव 'आत्मा,' उदरभागः। योऽयं 'समुद्रः' स तदीय-'योनिः', "अप्सुयोनिर्वा अश्वः"(५।३।१२) इति श्रुत्यन्तरात्। यः 'सूर्यः' स विराड्रूपस्य तव 'चक्षुः'। यो 'वातः' स तव 'प्राणः'। यः 'चन्द्रमाः,' स तव 'श्रोत्रं'। 'मासाः' पक्षाश्च तव 'पर्वाणि'। वसन्ताद्यृतवः तव हस्तपादाद्यङ्गानि। 'संवत्सरः' तव युद्धजयादिरूपो 'महिमा'।

इति मायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके पञ्चविंशोऽनुवाकः ॥०॥

अग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयद् यस्मिन्नग्निः स ते लोकस्तञ्जेष्यस्यथाव जिघ्र वायुः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन् वायुः स ते लोकस्तस्मात् त्वान्तरेष्यामि यदि नावजिघ्रस्यादित्यः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्, आदित्यः स ते लोकस्तं जेष्यसि यद्यवजिघ्रसि ॥ १ ॥

यस्मिन्। अष्टौ च ॥ २६ ॥

यो वै अयथादेवतम् (१)। त्वामग्ने (२)। इन्द्रस्य (३)। चित्तिं (४)। यथा वै (५)। वयो वै (६)। यदाकूतात् (७)। यास्ते अग्ने (८)। मयि गृह्णामि (९)। प्रजापतिः—सोऽस्मात् (१०)। स्तेगान् (११)। वाजं (१२)। कूर्मान् (१३)। योक्तं (१४)। मित्रा-वरुणौ (१५)। इन्द्रस्य (१६)। पूष्णः (१७)। ओजः (१८)। आनन्दम् (१९)। अहः (२०)। अग्ने (२१)। वायोः (२२)। पन्थाम् (२३)। क्रमैः (२४)। द्यौस्ते (२५)। अग्निः पशुरासीत् (२६)। षड्विंशतिः ॥ २६ ॥

यो वै (१।१)। एवाहुतिम् (३।३)। अभवन् (५।५)। पथिभिः (७।२)। अवरुध्य (१०।२)। आनन्दम् (१९)। अष्टौ-पञ्चाशत् ॥ ५८* ॥

सावित्राणि (१)। विष्णुमुखाः (२)। उत्सन्नयज्ञः (३)। देवासुराः (४)। यदेकेन (५)। हिरण्यवर्णाः (६)। यो वै अयथादेवतम् (७)। सप्त ॥ ७ ॥

इति तैत्तिरीयसंहितायां पञ्चमकाण्डे सप्तमप्रपाठके षड्विंशोऽनुवाकः ॥०॥

पञ्चमाष्टकः समाप्तः।

* प्रथमेऽनुवाके २ द्वितीये ५ तृतीये ४ चतुर्थे ४ पञ्चमे ७ षष्ठे ६ सप्तमे ३ अष्टमे ३ नवमे ४ दशमे ३ एकादशात् षड्विंशपर्यन्तं प्रत्येकं एकैक-मिति १६। मिलित्वा ५८।

अथ यदुक्तमश्वमेधब्राह्मणे "अग्निः पशुरासीदित्यवघ्रापयेत्" (३।८।५।८ब्रा०) इति तमिमं मन्त्रमस्मिन् षड्विंशानुवाके पठति,—"अग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयद् यस्मिन् अग्निः स ते लोकस्तञ्जेष्यस्यथाव जिघ्र, वायुः पशुरासीत्तेनायजन्त स एतं लोकमजयद् यस्मिन् वायुः स ते लोकस्तस्मात् त्वान्तरेष्यामि यदि नावजिघ्रसि, आदित्यः पशुरासीत्तेनायजन्त स एतं लोकमजयद् यस्मिन्नादित्यः स ते लोकस्तञ्जेष्यसि यद्यवजिघ्रसि"—इति। हे अश्व, अयम् 'अग्निः' देवः पुरा कस्मिंश्चित् जन्मनि त्वमिवाश्वमेधे यागहेतुश्चाश्वः 'पशुरासीत्', 'तेन' अग्निरूपेण पशुना केचित् यजमानाः 'अयजन्त', 'स' च पशुरग्निर्देवो भूत्वा 'लोकम्' 'एतम्' 'अजयत्,' 'यस्मिन्' लोके सः 'अग्निः' इदानीं तिष्ठति, 'सः' एव तवापि 'लोको' भविष्यति, त्वं च तं लोकं जेष्यसि। अथेवं सति त्वमुत्सुकः सन् इदमुदकं जिघ्र*। एवं वाय्वादित्यवाक्ययोरपि योज्यम्। वायुवाक्ये तु व्यतिरेकोपन्यासः, यदि† उदकं 'नावजिघ्रसि,' तर्हि 'तस्मात्' वायुलोकात् त्वाम् 'अन्तः' 'एष्यामि,' त्वमन्तरितस्तस्माल्लोकाद्भ्रष्टो यथा भवसि‡ तथा करिष्यामि। आदित्यवाक्ये तु अग्निवाक्यवदन्वयः,—यदुदकं 'अवजिघ्रसि', तर्हि तमादित्यलोकं जेष्यसि।

---

* 'अव-जिघ्र' इति पाठो भवितुं युक्तः।

† 'यदुदकम्' इति आदर्शपुस्तक-का० ज्ञी० पुस्तकयोः पाठः।

‡ अत्र 'भवति' इति आदर्शपुस्तक-का० ज्ञी० पुस्तकयोः पाठः।

अत्रास्य प्रपाठकस्य विनियोगसंग्रहः।

गायत्र्यादिभिराग्नेयमन्त्रैः पञ्च चितीः स्पृशेत्।
'अग्ने देवानिह'-इत्याद्या नाचिकेतचितीरिताः॥
गायत्र्याद्याः पञ्च मन्त्रा दहानेया यथाक्रमम्।
सौरी चिच्चवती 'चित्रं देवानाम्' इत्यसौ भवेत्[१]॥
'त्वमग्ने वृषभं' दध्यात् प्रत्येकचितिपञ्चके।
'संवत्सरस्य'-इति दध्यात् प्राजापत्यामिहेष्टकाम्॥
'येन देवाः' उख्यमिन्ये, दध्यादज्यानिमंत्रिकाः।
'शतायुधाय'-इति पञ्चमन्त्रैः पञ्चेष्टका इमाः[२]॥
'इन्द्रस्य' वज्रिणोर्दध्याद् 'अग्नाविष्णू' घृताहुतिः[३]।
'चित्तिं जुहोमि' च 'अग्ने तं' 'मन्न ते' चौन् जुहोति हि॥
'अग्ने यज्ञ'-इत्युपादध्याद्राष्ट्रमृत्संज्ञकेष्टकाः[४]।
'सुवर्ण'-पञ्चभिर्ऋक्त्वा[५] 'तत्त्वम्'-तिस्रो दधाति हि॥
'यास्ते'-तिस्रो जुहोत्येवं 'तत्त्वा यामि'-इति होमकः[६]।
'यदाकूतात्'-इति प्रोक्तैर्मन्त्रैराकूतिहोमकः[७]॥
'यास्ते' स्पर्शग् 'चतस्र'-इतिमन्त्रात् कूर्मं दधाति हि[८]।
'मयि'-इत्यग्निग्रहो गाय—त्राद्याः पूर्वमुदीरिताः॥
ताभिः पञ्चेष्टका दध्याद्[९] अग्निकाण्डमितीरितम्[१०]।
'श्लोकान्' इत्यथमेधाङ्गमन्त्राः षोड़शसु[११—२५] स्मृताः॥
अनुवाकेषु काण्डं यत्पञ्चमं यद्धि मुष्टितं।
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्॥
पुमर्थांश्चतुरो देयादिद्यातीर्थमहेश्वरः।

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्क-भूपालसाम्राज्यधुरन्धरेण सायनाचार्येण विरचिते माधवीये वेदार्थ-प्रकाशनामकतैत्तिरीययजुःसंहिताभाष्ये पञ्चमकाण्डे सप्तमप्रपाठके षड्विंशोऽनुवाकः ॥०॥

॥०॥ समाप्तं पञ्चमं काण्डम् ॥०॥